श्रीमदम्बिकादत्तव्यासविरचितः

शिवराजविजयः

प्रथमविरामस्य

द्वितीयो निःश्वासः

महाकविश्रीमदम्बिकादत्तव्यासस्य व्यक्तित्वं कृतित्वञ्च

''अभिनवबाण:'' इति उपाधिना विभूषित: स्वनामधन्य: पण्डित-अम्बिकादत्तव्यासस्य नाम संस्कृतगद्यपरम्परायां को वा न जानाति? पण्डित-अम्बिकादत्तव्यासस्य स्थितिकाल: १८५८ ईसवीयाब्दात् १९०० ईसवीयाब्दपर्यन्तं विविधप्रमाणै: सिद्ध: भवति। एते मूलत: जयपुरराज्यनिवासिन: आसन्। अस्य पितामह: राजाराम: काशीनगरं गत्वा तत्रैव निवासं कृतवान्। राजारामस्य द्वौ पुत्रौ आस्तां – दुर्गादत्त: देवीदत्तश्च। दुर्गादत्तस्य एव द्वितीयपुत्र: अम्बिकादत्तव्यास: आसीत्। व्यासमहोदय: बाल्यकालादेव प्रतिभासम्पन्न: आसीत्। विद्यालयीयजीवनादेव अनेन काव्यरचना प्रारब्धा। कवित्वप्रतिभाकारणादेव ''सुकवि:'' इति उपाधिना अलङ्कृत: जात:।

व्यासमहोदयस्य पारिवारिकं जीवनम् अधिकं सुखकरं नासीत्। त्रयोदशवर्षस्यावस्थायां विवाह: सम्पन्न:। अस्य पितृचरणा: पौरोहित्यकर्मणा स्वीयजीविकोपार्जनं करोति स्म। अत: आर्थिकदृष्ट्या सम्पन्नता नासीत्। एकादशवर्षस्य अवस्थायामेव अम्बिकादत्तव्यासस्य माता दिवङ्गता। पुनश्च सप्तदशवर्षस्यावस्थायामस्य जनकोऽपि स्वर्गवासी जात:। एवं प्रकारेण सत्सु अपि अनेककष्टेषु अनेन १९३७ तमे वर्षे काशीनगरस्थराजकीयमहाविद्यालयात् ''साहित्याचार्य:'' परीक्षा उत्तीर्णा। प्रतिभासम्पन्नेनानेन एकघटिकायां शतं श्लोकरचनाकारणादेव ''घटिकाशतक'' इति उपाधिना विभूषितोऽयं १९३८ तमे वर्षे 'काशीब्रह्मामृतवर्षिणी' सभायाम्। १९४० तमे वर्षे विहारराज्यस्थायां मधुबनीसंस्कृतपाठशालायां प्रधानाध्यापकरूपेण अध्यापनं प्रारब्धवान्। १९४४ तमे वर्षे भागलपुरमण्डलविद्यालये प्रधानपण्डित: सञ्जात:। मीमांसाशब्दै: श्रीव्यासस्य कर्मभूमिस्तु बिहाररज्यमेवासीत्। एवमपि श्रूयते यत् १९५० तमे वर्षे अयं व्यासमहोदय: अवकाशं स्वीकृत्य भारतभ्रमणाय अगच्छत्। एतस्मिन् अवसरे समस्तदेशेऽस्य महान् आदरो जात:। एतदपि कथ्यते यत् अनेन शतं प्रश्नान् श्रुत्वा तेषामुत्तरं तेनैव क्रमेण दीयते स्म। अत एव ''शतावधानी'' इत्युपाधिनापि समादृत: आसीत् अयं जन:। विचित्रविलक्षणविद्वत्तासम्पन्नोऽयं व्यासमहोदय: १९५७ तमे वर्षे अल्पायुषि एव दिवङ्गत: सञ्जात:।

श्रीमदम्बिकादत्तव्यासस्य काव्यानि –

संस्कृतगद्यकाव्यलेखनपरम्परायां सुबन्धु-बाणभट्ट-दण्डिप्रमुखकवीनां नामानि सादरं स्मर्यन्ते। अस्यामेव शृङ्खलायां स्वनामधन्यपण्डिताम्बिकादत्तव्यासस्य नामापि सुप्रसिद्धमस्ति। अनेन विरचितानां ग्रन्थानां संख्या प्रायश: अशीति: (८०) इति मन्यते। तेषु मुख्यरूपेण एते सन्ति – गणेशशतकं, कथाकुसुमं, साङ्ख्यसागरसुधा, पातञ्जलप्रतिबिम्बं, दु:खद्रुमकुठार:, अवतारमीमांसाकारिका, प्राकृतगूढशब्दकोष:, संस्कृताभ्यासपुस्तकं, शिवराजविजय:, उपन्यास:, सामवतं (नाटकं) च।

उल्लिखितेषु ग्रन्थेषु ''सामवतं'' नाटकमिदं भाष्य-भाव-वर्ण्य-दृष्ट्या अत्यन्तमुत्कृष्टं प्रतीयते। पुनरपि अम्बिकादत्तव्यासस्य सर्वश्रेष्ठा कृतिस्तु ''शिवराजविजय:'' एवास्ति। 'शिवराजविजय:' संस्कृतगद्यसाहित्ये अन्यतमं स्थानं धत्ते। बाण-दण्डि-सुबन्धु-पश्चात् व्यासमहोदयस्यैव नाम स्वीक्रियते। यद्यपि अन्येऽपि अनेके गद्यकारा: सन्ति, परन्तु साहित्यिकोत्कृष्टता-बौद्धिकप्रतिभासामाजिकाकलनादिवैशिष्ट्यकारणाद् व्यासमहोदय: प्रमुखगद्यकारेषु परिगण्यते। अत्र च कारणभूतो विद्यते 'शिवराजविजय:'।

शिवराजविजयस्य संक्षिप्तकथावस्तु

श्रीमदम्बिकादत्तव्यासविरचितोऽयमेतिहासिकोपन्यासः त्रिषु विरामेषु विभक्तो विद्यते। प्रत्येकमपि विरामः चतुर्षु निःश्वासेषु विभक्तोऽस्ति। अस्य कथावस्तु संक्षिप्तरूपेण एवम् अस्ति –

दक्षिणभारते यवनानामाधिपत्येन अत्याचारैश्च खिन्नः शिववीरः स्वतन्त्रतायै संघर्षं प्रारब्धवान्। तदा तेन प्रतिगव्यूति आश्रमान् स्थापयित्वा यवनानां गतिविधीनां ज्ञानं प्राप्यते स्म। शिववीरस्य निरन्तरविजयाभियानेन उद्विग्नो भूत्वा बीजापुरनरेशः तेन सह योद्धुं ससेनम् अपजलखानं प्रेषितवान्। तदानीं शिववीरः प्रतापदुर्गे निवासं कुर्वन् आसीत्। अपजलखानोऽपि भीमानद्यास्तटे स्वीयशिविरं स्थापितवान् आसीत्। बीजापुरनरेशः सन्धिव्याजेन शिववीरं जीवन्तं ग्रहीतुम् इच्छति स्म। किन्तु तस्य सम्पूर्णयोजनां शिववीरः ज्ञातवान्। एकः यवनगुप्तचरः बीजापुरतः पत्रं नयन् आसीत्। मार्गे तेन एका ब्राह्मणकन्या अपहृता। परञ्च सा कन्या एकस्य आश्रमाध्यक्षस्य शिष्याभ्यां श्यामसिंहगौरसिंहाभ्यां रक्षिता यवनगुप्तचरश्च मारितः। तस्मादेव पत्रमधिगत्य गौरसिंहमाध्यमेन अनन्तरकाले शिववीरेण सम्पूर्णयोजना अवगता। पत्रेण इदमपि अवगतं यत् बीजापुरनरेशः सन्धिव्याजेन शिववीरं छलयितुमिच्छति एतदर्थञ्च शिवस्य सकाशं गोपीनाथपण्डितः प्रेषितः अस्ति। तदनुसारं गोपीनाथः शिवराजं प्राप्नोति। बहुप्रकारेण शिववीरेण सह संलप्य प्रतापदुर्गात् समीपे एव अपजलखानशिववीरयोः मेलनस्य व्यवस्थामपि करोति। अपरपक्षे गौरसिंहोऽपि 'तानसेनः' इति गायकवेषेण अपजलखानस्य शिविरं प्राप्य तदीयां सर्वां योजनां ज्ञात्वा शिववीरस्य समीपे आगच्छति। रात्रिकाले एव शिववीरः स्वीयसेनाम् अपजलखानशिविरस्य पृष्ठभागे लतागुल्मेषु दुर्गप्राचीरव्यवधानेषु च योजयति। प्रातःकाले अपजलखानः शिववीरेण सह मेलितुमागच्छत्। शिववीरस्तु स्ववस्त्राणामन्तः कवचं हस्तयोश्च व्याघ्रनखनामकं शस्त्रं परिधाय आगतवान्। परस्परम् आलिङ्गनावसरे प्रगाढालिङ्गनव्याजेन शिववीरः अपजलखानस्य स्कन्धौ ग्रीवां च प्रछिद्य भुवि पातयति। पूर्वयोजनानुसारं शिवसैनिकाः अपजलखानस्य सामग्रीः शिविराणि च दग्ध्वा अकस्मादेव आक्रमणं कुर्वन्ति। एतेन बहवः यवनसैनिकाः हन्यन्ते अन्ये च पलायन्ते।

अपतरः गौरसिंहः यां विप्रकन्यामरक्षत्। तस्याः संरक्षकः कोऽपि वृद्धब्राह्मणः आसीत्। तस्यागमनेन रहस्यमिदम् उद्घाटितं यत् इयं कन्या गौरसिंहश्यामसिंहयोः भगिनी सौवर्णी अस्ति। वृद्धः ब्राह्मणश्च तयोः पुरोहितः देवशर्मा चास्ति। तत्पश्चात् ब्रह्मचारिगुरोः अनुरोधेन गौरसिंहः स्वीयसमाचारं श्रावयन् कथयति यत् एते गौरसिंहश्यामसिंहौ सौवर्णी च उदयपुरराज्यस्य कस्यश्चित् लघुक्षेत्रस्य प्रशासकस्य खड्गसिंहस्य तनुजाः सन्ति। दुर्भाग्यवशात् परलोकं गतवतोः पित्रोः ते त्रयोऽपि पुरोहितस्य देवशर्मणः संरक्षणे उषितवन्तः। एकदा आखेटं क्रीडन्तौ उभौ अपि भ्रातरौ लुण्ठाकैः अपहतौ। परञ्च तत्र कश्चित् पान्थसार्थं लुण्ठनाय गतेषु तौ लुण्ठकेषु बन्धनानि छित्वा शस्त्रैः सुसज्जीभूय रक्षणार्थं स्थितं प्रहरिणं भाययित्वा च अश्वौ आरुह्य पलायनं कृतवन्तौ। सायं यावच्च सुदीर्घमार्गमतीत्य तौ एकस्य लघुग्रामस्य समीपे विद्यमानं हनुमन्मन्दिरं प्राप्तवन्तौ। मन्दिरपूजकः अतीव स्नेहेन तयोः भोजनविश्रामादिव्यवस्थां विदधाति। तस्य साहाय्येन च तौ महाराष्ट्रदेशं प्राप्तवन्तौ। अत्र च भीमानद्यास्तटे तयोः साक्षात्कारः शिववीरेण सह सञ्जातः। ततः परं तौ अस्मिन् आश्रमे निवासम् आरब्धवन्तौ।

अपरत्र शाइस्तखानः पूनानगरमधिकृत्य तत्रैव शिवराजस्य भवनेषु निवासम् आरब्धवान्। अतः शिवराजेन सह तस्य युद्धं निश्चितमासीत्। शिववीरः सिंहदुर्गात् स्वकीयमेकं सन्देशं रघुवीरसिंहमाध्यमेन तोरणदुर्गाध्यक्षं प्रति प्रेषितवान्। सः सन्देशवाहकः वातवर्षादिबाधामुपेक्ष्य तोरणदुर्गं गत्वा दुर्गाध्यक्षाय सन्देशं प्रदाय तस्य दुर्गाध्यक्षस्याज्ञया रात्रौ हनुमत्मन्दिरे तिष्ठति। मन्दिरस्य वाटिकायां गीतं गायन्तीं सौवर्णीं दृष्ट्वा रघुवीरसिंहस्य हृदये अनुरागः उत्पन्नो भवति। शिवराजाज्ञया रघुवीरसिंहः शाइस्तखानेन सह भावियुद्धस्य फलं प्रष्टुं मन्दिरस्य अर्चकस्य देवशर्मणः सकाशं गतवान्।

देवशर्मा सौवर्ण्या तस्मै एकं मोदकं ददाति। मोदकं खादयित्वा सा तस्य ग्रीवायामेकां मालां परिधापयति कथयति च प्रातःकाले रात्रौ दृष्टस्वप्नं श्रावयतु। प्रातःकाले दुर्गाध्यक्षात् सन्देशस्य उत्तरम् आदाय सः रघुवीरसिंहः देवशर्माणं प्रतिगच्छति। ततश्च यवनैः सह युद्धे जयः आर्यैः सह युद्धे च पराजयः इति भविष्यफलं विज्ञाय वाटिकामागच्छति। तत्र पुनः सौवर्णीं दृष्ट्वा तदनुज्ञया च रत्नमालां तत्कण्ठे परिधापयति। ततश्च सः भगवतः मारुतेः प्रसादं स्वीकृत्य सिंहदुर्गं प्रत्यागच्छति।

द्वितीये पक्षे शिवराजोऽपि पण्डितवेषेण माल्यश्रीकेण सह शाइस्तखाननिवासं पूनानगरमुपेत्य गुप्तरूपेण तत्रत्यं निरीक्षण कृत्वा प्रत्यागतवान्। संशयवशानुकरण कर्त्ता चांदखानश्च तेन हतः। तदनन्तरं शाइस्तखानेन कृतपूनानगरजननिषेधं ज्ञात्वा शिवः यशवन्तसिंहं पूनानगराद् दूरे स्थापयितुं प्रार्थयति स्वयं च वरयात्राव्याजेन प्रमुखैः वीरसैनिकैः सह पूनानगरं प्रविष्टवान् शाइस्तखानस्य निवासमपि गतवान् च। तत्र चांदखानस्य शाइस्तखानस्य च पुत्राः रघुवीरसिंहेन हताः। एतया घटनया आहतो भूत्वा शाइस्ताखानः वातायनात् कूर्दनं कृत्वा पलायितः। रघुवीरसिंहेन अवरंगजीवस्य पुत्री रोशनआरा बन्दीकृता।

पुनश्चापरत्र एकदा ब्रह्मचारिगुरुः गौरसिंहाय स्वस्य स्वपुत्रस्य वीरेन्द्रसिंहस्य च पूर्ववृत्तान्तं श्रावितवान्। अपरतः रघुवीरसिंहस्य प्रेयसी सौवर्णी क्रूरसिंहकृतापमानवार्तां तमुक्तवती। तदा संयोगवशात् क्रूरसिंहस्य नियुक्तिः अन्यत्र भवति कष्टञ्चापगतम्। अपरतः बन्दिनी रोशनआरा शिवं प्रति निजानुरागं प्रकटयति। परं सः ''भवत्याः पिता ददाति चेत् स्वीकुर्याम्'' इति अकथयत्। तदैव जयसिंहः ससेनः आक्रमणं करोति। शिववीरः तस्य हृदये हिन्दुत्वभावनामुत्पादयितुं प्रयत्नं कृतवान्। परञ्च विफलो भूत्वा कारणवशात् यवनैः सह सन्धिं कर्तुं विवशोऽभवत्। तदनुसारं रोशनआरां मुअज्जमं च समर्पितवान्।

तत्पश्चात् विजयपुरमाक्रम्य रघुवीरसिंहसाहाय्येन शिववीरः विजयं प्राप्तवान् रहमतखानञ्च जीवन्तं गृहीतवान्। परं रहमतखानक्रूरसिंहयोः ''रघुवीरसिंहः राजद्रोही अस्ति'' इति कथने विश्वासं कृत्वा शिववीरः रघुवीरसिंहं निष्कासितवान्। कालान्तरे च ज्ञातं यद् राजद्रोही क्रूरसिंहः आसीत्।

रघुवीरसिंहः अपमानितो भूत्वा राधास्वामिवेषं धृत्वा शिववीरस्य साहाय्यं करोति स्म। सः सौवर्ण्याः अपहरणेच्छुकं क्रूरसिंहञ्च हतवान्। जयसिंहसन्धिरनुसारं शिववीरः १९६६ तमे ईशाब्दे अवरंगजीवसभायां दिल्लीनगरे उपस्थितःअ भवत्।म र्गेर ाधास्वामिवेषधारीर घुवीरसिंहःत ंत त्रग मनात्अ वरोद्धंकृ तवान्।प रञ्च ि शवराजःन ैव अमन्यत। सभायामुपस्थितेरनन्तरम् अवरंगजीवः तं शिवं कारागारे स्थापयित्वा बहिश्च रक्षिणः योजितवान्। परन्तु स्वस्य योजनयार घुवीरसिंहस्यच स हयोगेनि शवःस्व वमित्रैःस हत तःप ालयनेस फलःज ातः ात दनन्तरंर ाधास्वामीए व रघुवीरसिंहोऽस्ति इति विज्ञाय शिवः तं क्षमां याचते।

पुनश्च रघुवीरसिंहः अपि शिवेन सह आगच्छत्। शिवराजः तस्मै मण्डलेश्वरपदं प्रदाय सौवर्ण्या सह तस्य विवाहं कारितवान्। शिवः विवाहे सम्मिल्य तमाशीर्भिः सभाजत। अपरतः दूतैः सूचना दत्ता यत् सन्धौ यवनेभ्यः प्रदत्ताः सर्वेऽपि दुर्गाः विजिताः।

तदनन्तरं शिववीरः सतारानगरीं राजधानीं विधाय तत्र निवासं कर्त्तुं प्रारब्धवान्। शनैः शनैः सम्पूर्णमहाराष्ट्रे तदधिकारः सञ्जातः। अवरंगजीवेन प्रेषितः सेनापतिः मोहब्बतखानश्च पलायनं कर्तुं विवशोऽभूत्। एवं प्रकारेण शिवराजविजयः समाप्तिं याति।

शिवराजविजयस्य द्वितीयनि:श्वासस्य संक्षिप्त कथासार:

महाकविना श्रीमदम्बिकादत्तव्यासेन विरचितस्य ''शिवराजविजय:'' इत्यस्य ऐतिहासिकोपन्यासस्य प्रसिद्धि: न केवलं संस्कृतसाहित्येऽपितु सम्पूर्णसंस्कृतवाङ्मये एव विद्यते। अस्य शिवराजविजयस्य कथावस्तु त्रिषु विरामेषु विभक्तमस्ति। प्रत्येकमपि विराम: चतुर्षु नि:श्वासेषु विभक्तो विद्यते। अत्र प्रथमविरामस्य द्वितीयनि:श्वासस्य कथावस्तु संक्षेपेण प्रस्तूयते –

शिववीरस्य विजयाभियानेन खिन्न: बीजापुरनरेश: स्वकीयम् अन्यतमं सेनानिनम् अपजलखानं शिववीरेण सह योद्धुं प्रेषितवान्। तदानीं शिववीर: प्रतापदुर्गे निवसन् आसीत्। अपजलखान: प्रतापदुर्गस्य समीपे एव ससेन: तिष्ठति स्म। एकस्मिन् दिवसे अस्तगते भगवति सूर्ये किञ्चिदन्धकारे संवृत्ते प्रतापदुर्गद्वारपाल: कस्यापि पादध्वनिमिव शृणोति। तच्छ्रुत्वा आगन्तारञ्च जनमपश्यन् गम्भीरस्वरेण पृच्छति – ''कोऽयम्'' इति। किञ्चित्कालानन्तरं पुन: तमेव ध्वनिं श्रुत्वा द्वारपाल: सक्रोधं पृष्टवान् यत् कोऽयमासन्नमरणबधिर: मामनुत्तरयन् अत्र आगच्छति? तत: परं स: ''क्षम्यताम्, आगच्छामि, आगत्य च सर्वं निवेदयामि'' इति भाषमाणं कमपि संन्यासिनं पश्यति, येन सह कश्चन द्वादशवर्षीय: भिक्षुबटुकोऽपि आसीत्। सश्च संन्यासिवेषधारी समागत: गौरसिंह: एवासीत्। गौरसिंह: सम्प्रति कन्यापहारकं यवनयुवानं हत्वा तस्माच्चाधिगतं पत्रं शिववीराय दातुम् आगतवान् आसीत्। स एव गमनागमनकाले द्वारपालं बहुधा परीक्षते स्म। तं सर्वथा दौवारिकतायोग्य: इति निश्चित्य आत्मपरिचयानन्तरं प्रशंसति। तदनन्तरं तस्य निर्देशानुसारं शिववीरम् उपगच्छति। शिववीरोऽपि तदानीं सन्ध्यादिकं कृत्वा स्वीयप्रासादे मित्रै: सह मन्त्रणातत्पर: आसीत्। तस्मिन् एव समये द्वारपालस्यानुमत्या गौरसिंहोऽपि तत्र आगच्छति। कुशलवार्तापश्चात् गौरसिंह: आश्रमव्यवस्थां सूचयित्वा यवनहतकात् प्राप्तं पत्रं दर्शयति। तस्य पत्रस्य भाषा फारसी इत्यासीत्। तेनैव पत्रेण इदमवगतं यत् विजयपुराधीश: जीवन्तं शिववीरं बन्दीकर्त्तुमिच्छति। एतदर्थमेव तेन अपजलखानस्य सविधे गोपीनाथपण्डित: प्रेषित: आसीत् सश्च गोपीनाथपण्डित: शिववीरमपि साक्षात्करिष्यति इति। यदा पत्रविषये मन्त्रणा विधीयते स्म, तदैव द्वारपाल: तत्र आगत्य सूचयति – ''कश्चन गोपीनाथपण्डित: समागत:'' इति। तत: परं शिववीर: माल्यश्रीकं तस्य व्यवस्थायै निर्दिशति। पुनश्च गौरसिंह: शिववीरेण सह मन्त्रयित्वा गौरसिंह गायकवेषेण अपजलखानशिविरं गच्छति। तत: अपजलखानस्य सम्पूर्णयोजनां विज्ञाय आगच्छति। अत्र शिववीर: गोपीनाथेन सह मन्त्रयति। अन्ते च भवान् श्व: अस्मिन् उद्यानप्रान्तस्थे पटकुटीरे अपजलखानमानयतु, येन अहं तेन सह मन्त्रयितुं शक्नुयाम्'' इति शिववीर: वदति। एतत्तु सम्भवमिति उक्त्वा गोपीनाथपण्डित: अनेकानि आशीर्वचांसि शिववीराय प्रदाय तत: गच्छति।

तदानीमपि गौरसिंह: अपजलखानस्य योजनां ज्ञात्वा तत्र समागच्छति। तदनन्तरं परस्परं मन्त्रणां विधाय शिववीर: सेनापतीन् समुचितं निर्दिश्य कञ्चित् कालं शयनं कृत्वा अल्पशेषायाञ्च रात्रौ उत्तिष्ठति। शिववीरस्य सेनास्तु पूर्वकालादेव गुप्तरूपेण निर्धारितस्थलेषु आक्रमणाय सुसज्जिता: आसन्। तदनन्तरं गोपीनाथपण्डित: उभयो: सेनयो: मध्ये एकस्मिन् पटकुटीरे अपजलखानस्य शिववीरेण सह मेलयितुं योजनां रचयति। अपजलखान: छलेन वार्ताव्याजेन च शिववीरं हन्तुमिच्छति। अपजलखानशिववीरौ द्वौ अपि पटकुटीरम् उपयात:, परस्परमालिङ्गतश्च। शिववीरस्तु आलिङ्गनव्याजेन तस्य स्कन्धौ दृढं गृहीत्वा व्याघ्रनखै: तं विदीर्णं कृतवान्। सङ्केतानुसारञ्च शिविराणां पृष्ठत: स्थिता: शिवसैनिका: शिविरेषु अग्निं ज्वालितवन्त:। पुरत: स्थिता: शिवसैनिका: हर हर महादेव इति गर्जनापुरस्सरं यवनसैनिकानामुपरि आक्रमणं कृतवन्त:। तदनन्तरं सर्वत्र कोलाहल: यदा प्रारब्धस्तदैव गौरसिंह: रक्तरञ्जितम् अपजलखानशरीरं प्रलम्बवेणुदण्डाग्रे बद्ध्वा समुत्तोल्य सर्वान् संदर्श्य सभेरीनादं घोषितवान् – दृश्यतां, दृश्यताम् इत: हतोऽयं यवनसेनापति:, युष्माकं शिविराणि ज्वालितानि, अनेके यवनसैनिका: मारिता: सन्ति, किं यूयमपि मर्त्तुम् इच्छथ? तत्पश्चात् भयभीता: यवनसैनिका: पालयनं कृतवन्त:। शिववीरश्च युद्धस्थलस्य रक्तच्छतादिकं कार्यं

माल्यश्रीकाय प्रदाय ततः विजयशङ्खनादपुरस्सरं प्रत्यागत्य प्रतापदुर्गं प्रविश्य मातुः चरणौ प्रणमति। एवं प्रकारेण प्रथमविरामस्य द्वितीयनिःश्वासोऽयं समाप्तो भवति।

शिवराजविजयस्य काव्यगतं वैशिष्ट्यम्

'शिवराजविजयः' भाषादृष्ट्या भावदृष्ट्या च 'उत्तमकोटिकाव्यम्' इति वक्तुं शक्यते। अस्मिन् प्रतिभायाः प्रौढता, कल्पनायाः सूक्ष्मता, अनुभवस्य गहनता, अभिव्यक्तेः स्पष्टता, भावानां यथार्थता रमणीयता च, पदावलीनां मधुरता, कथानकस्य प्रवाहमयता, आदर्शस्य स्थापना, शिवस्य भावना सुन्दरस्य सुन्दरता च निहिता विद्यते। उपन्यासदृष्ट्यापि कथानकपात्रघटनासंवादान्तर्द्वन्द्वाऽऽकांक्षादितत्त्वैः शिवराजविजयोऽयं समाहितोऽस्ति। पुनश्च ''गद्यं कविनां निकषं वदन्ति'' इत्यस्यां निकषतुलायामपि उपन्यासोऽयं स्वश्रेष्ठतां प्रमाणयति।

अस्मिन् उपन्यासे शिवराजविजये कथावस्तु-घटनोपन्यास-वर्णनवैविध्य-प्रकृतिचित्रण-संवादयोजना-रसालंकार-भाषासौष्ठवादिदृष्ट्या सर्वेषां विषयाणां सम्यक्तया समायोजनं कृतमस्ति। एतेषां सर्वेषामपि विषयाणां संक्षिप्तविवेचनं क्रियतेऽत्र -

१. कथावस्तुयोजना - ''शिवराजविजयः'' एकः ऐतिहासिकः उपन्यासोऽस्ति। एतस्य कथावस्तु शिववीरमाधारीकृत्यास्ति। काव्येऽस्मिन् त्रयः विरामाः सन्ति। प्रत्येकस्मिन् विरामे चत्वारः निःश्वासाः सन्ति। एतस्य नायकः शिवराजः नानासंघर्षान् सोढ्वाऽपि विजयं प्राप्नोति। रघुवीरसिंहः उपनायको वर्तते। एतस्य कथापि समानान्तररूपेण प्रचलति। गौरसिंह-श्यामसिंह-ब्रह्मचारिगुरु-देवशर्माद्यः नायकस्य सहायकाः सन्ति। कविना व्यासेन प्राचीनगद्यकाव्यपरम्परातः पृथक् स्वीयकथायोजना कृताऽस्ति। शिवराजविजयस्य कथानकः शिववीरम् ऐतिहासिकरूपेण उपस्थापयितुं समर्थोऽस्ति।

२. नामकरणम् - शिवराजस्य विजयः शिवराजविजयः। एतदधिकृत्य कृतं काव्यं शिवराजविजयम् इति नामकरणं युक्तियुक्तमेव प्रतीयते। पुनरपि समीक्षकैः उपन्यासः इत्याधारेण ''शिवराजविजयः'' इति नाम्ना सम्बोधयन्ति।

३. घटनासंयोजनम् - शिवराजविजयस्य प्रारम्भे शिवराजस्य यवनैः सह संघर्षस्य औचित्यमुपस्थाप्य योगिराजस्य प्रसङ्गः उपस्थापितः। तदनुसारं भूमिकामावतारयता कविना उक्तं यत् यत्र भारते पुरा याज्ञिकाः राजसूयादीन् यज्ञान् अकुर्वन्, वर्षवातातपहिमसहानि तपांसि च अतपन्, तत्रैव भारते अद्यत्वे म्लेच्छैः गावो हन्यन्ते, वेदाः विदीर्यन्ते, स्मृतयः संमृद्यन्ते, मन्दिराणि मन्दुरीक्रियन्ते, सत्यः पात्यन्ते सन्तश्च सन्ताप्यन्ते। एवम्भूतां भारतवर्षीयां दुर्दशां दर्शं दर्शं खिन्नचेतः शिववीरः एतां दुर्दशामपाकर्त्तुं ''कार्यं वा साधयेम, देहं वा पातयेम'' इति सिद्धान्तमनुसृत्य स्वीयविजययात्रां प्रारभते अन्ते च विजयं प्राप्नोति। अत्र सर्वा अपि घटनाः तथा संयोजिताः, याभिः पाठकानामुत्कण्ठा प्रतिक्षणं वर्धते।

४. वर्णानां सौविध्यम् - शिवराजविजयेऽपि पं० अम्बिकादत्तव्यासः कुत्रचित् सूर्योदय-रजनी-चन्द्रोदय-सूर्यास्तादीनां, क्वचिद् यवनाक्रान्तभारतभुवः, कुत्रचित् ब्रह्मचारि-तद्गुरुयोगिराजादीनां, क्वचित् राजपुत्रदेशस्य, क्वचित् च दुर्गस्थकुलाङ्गनावर्गस्य वर्णनं कृतवान् अस्ति। एवमेव अन्यत्र बङ्गदेशस्य, भीमानद्याः अमृतोदाख्यमहासरसः, शिवशौर्यसूचकस्य कोङ्कणदेशस्य, पर्वतश्रेणीनां, झझ्ावातस्य, तेजस्विनः क्षत्रियकुमारस्य, कुलीनायाः सौवर्ण्याः यजमानसन्ततिपालकस्य पुरोहितस्य, वेशपरिवर्तनपटोः गौरसिंहस्य, वातवर्षादिकमतिक्रम्य स्वामिकार्यं साधयितुं तत्परस्य रघुवीरस्य, यवनशिविराणां तत्सेनानायकस्य च वर्णानानि कृतानि सन्ति। सर्वाणि अपि सजीवतया चित्रितानि सन्ति।

५. प्रकृतिचित्रणम् - संस्कृतकविषु प्रकृतिवर्णनस्य परम्परा पूर्वकालादेव वर्तते। प्रकृतिचित्रणं येन कविना साफल्येन कृतं, सः कविरपि तावान् एव सफलः दृष्टः। महाकविः अम्बिकादत्तव्यासः प्रकृत्याः सुकुमारवर्णनेऽतितरां

सफलो विद्यते। शिवराजविजये सूर्योदय–सूर्यास्त–चन्द्रोदय–चन्द्रास्त–रात्रिरादिचित्रणमतीव रुचिरतया कृतमस्ति। यथा – **सूर्यास्तवर्णनं** – जगतः प्रभाजालमाकृष्य ....।

आश्रमशोभावर्णनं – कदलीदलकुञ्जायितस्य एतत्कुटीरस्य।

नीरवनीशावर्णनं – धीरसमीरस्पर्शेन मनदमन्दमान्दोल्यमानासु .....।

झञ्झावातवर्णनं – तावदकस्मादुत्थितो महान् झञ्झावातः ......।

६. पात्राणां चरित्रचित्रणम् – शिवराजविजये महाकविना अम्बिकादत्तव्यासेन पात्राणां चरित्रचित्रणं सर्वत्र यथार्थतायाः अवलम्बनं कृतमस्ति। एतस्य काव्यस्य प्रथमविरामे नायकः शिवराजः तत्सहयोगिनः गौरसिंह–श्यामसिंह–ब्रह्मचारिगुरु– देवशर्माद्यश्च यवनसेनानायकः अपजलखानश्चेति प्रमुखानि पात्राणि सन्ति।

अस्य नायकः शिववीरः धीरोदात्तः विद्यते। अयं स्वधर्मरक्षणतत्परः राजनीतौ निष्णातः भारतीयादर्शानां पालकः संरक्षकश्चास्ति। पुनश्चायं स्वीयशौर्येण, पराक्रमेण सदाचारेण च सनातनधर्मं रक्षितुं तत्परोऽस्ति। "कार्यं वा साधयेम देहं वा पातयेम" इति सिद्धान्तमनुसरति शिववीरः।

शिवराजस्य सहायकपात्रेषु गौरसिंहः मुख्यः अस्ति। अयम् आकृत्या सुन्दरः, वर्णेन गौरः, जटाभिर्ब्रह्मचारी वयसा षोडशवर्षदेशीयः कम्बुकण्ठः आयतललाटः सुबाहुः विशाललोचनश्चास्ति।

शिवराजविजये प्रथमे विरामे अन्यत् प्रमुखपात्रमस्ति – रघुवीरसिंहः। अयं शिवस्य दौत्यकर्म करोति। शिववीरस्य विश्वसनीयोऽयं विनम्रः, कर्त्तव्यपरायणः सुभटश्चास्ति।

अस्य काव्यस्य एकमेव स्त्रीपात्रमस्ति – सौवर्णी। अस्याः चरित्रचित्रणं कविना एकस्याः कुलीनायाः भारतीयकन्यायाः प्रतिनिधिरूपेण कृतमस्ति।

७. संवादयोजना – व्यासमहोदयेन शिवराजविजये नाटकीय–प्रभावशालिसंवादानां योजनां विधाय संस्कृत–गद्यकाव्याय एका नूतनदिशा प्रदत्ता। संन्यासिगौरसिंहद्वारपालयोः संवादः तथा तानरंगापजलखानयोः संवादः अत्यन्तं नाटकीयरोचकौ स्तः। अस्य शिवराजविजयकाव्यस्य संवादाः अत्यन्तं स्वाभाविकाः चरित्रानुकूलाश्च सन्ति।

८. रसयोजना – 'वाक्यंर सात्मकंक ाव्यम्'इ त्यनुसारम्अ ानन्दप्राप्तिस्तावत्क ाव्यस्यप रमंप्र योजनम्। काव्यात् उत्पन्नोऽयमानन्द एव रस इत्युच्यते। श्रीरम्बिकादत्तव्यासेन रसयोजना शिवराजविजये सफलतया कृताऽस्ति। अस्य शिवराजविजयस्य वीरः प्रधानरसः अन्ये च शृङ्गारादयः अत्र अङ्गभूताः सन्ति। रसानुसृत्य एतस्य भाषा क्वचित् ओजस्विनी समासयुक्ता च विद्यते। अपरत्र च माधुर्यगुणोपेता अल्पसमासयुक्ता असमासा वा अस्ति।

९. अलंकारयोजना – रसः अलङ्कारश्चेति द्वयमपि काव्ये चमत्कृतिम् उत्पादयति। शिवराजविजये सर्वत्रैव अलंकाराणां स्वाभाविकः प्रयोगः दृश्यते। अत्र विशेषतः उपमारूपकोत्प्रेक्षादीनामर्थालंकाराणां प्रयोगो दृश्यते। शब्दालंकारेषु विशेषरूपेण अनुप्रासस्य छविरेव दृष्टिगता भवति। यथा – **अनुप्रासः** – वीरता – सीमन्तिनी – सीमन्त.....।

यमकः – विलक्षणोऽयं भगवान् सकलकला–कलापकलनः....।

रूपकः – एष भगवान् मणिराकारामण्डलस्य ......।

उत्प्रेक्षा – समुदिते यामिनी कामिनी चन्दनविन्दौ.....।

१०. भाषासौष्ठवम् – मनोगतानां भावानामभिव्यञ्जनायै भाषा प्रमुखं साधनमस्ति। अत एव भावानुकूला भाषा प्रशस्ताम न्यते।श िवराजविजयस्यभ ाषास रलास हजाभ ावानुरूपिणीप्र भावकारिणीच ास्ति।प्र सङ्गानुसारंक विना व्यासेनात्र वाक्ययोजना तदनुकूलालंकारादीनाञ्च विन्यासो विहितोऽस्ति। यदि क्वचिद् सुदीर्घसमासा ओजस्विनी रचना अस्ति – चेदपरत्र असमासा मध्यमसमासा मधुरा च रचना अस्ति। सर्वत्र एव भाषाभावयोः सुन्दरः समन्वयः दृश्यते।

मीमांसाशब्दैः 'शिवराजविजयः' एकमुत्कृष्टं गद्यकाव्यमस्ति।

अथ द्वितीयो निःश्वासः

रात्रिर्गमिष्यति भविष्यति सुप्रभातं,
भास्वानुदेष्यति हसिष्यति पङ्कजश्रीः।
इत्थं विचिन्तयति कोशगते द्विरेफे,
हा हन्त! हन्त! नलिनीं गज उज्जहार॥(स्फुटकम्)

प्रसङ्गः – अयं श्लोकः श्रीमदम्बिकादत्तव्यासविरचितस्य शिवराजविजयमहाकाव्यस्य प्रथमविरामस्य द्वितीयनिःश्वासात् उद्धृतः अस्ति। अनेन स्फुटकश्लोकेन महाकविना द्वितीयनिःश्वासस्य कथा प्रतिबिम्बिता कृता अस्ति। 'ग्रन्थादौग्रन्थमध्येग्रन्थान्तेच म ङ्गलमाचरणीयम्'इ ति सिद्धान्तेनअ यंश्लोकःव स्तुनिर्देशात्मकःम ङ्गलपरकोऽपि मन्यते।

अन्वयः – रात्रिः गमिष्यति, सुप्रभातं भविष्यति, भास्वान् उदेष्यति पङ्कजश्रीः च हसिष्यति। इत्थं विचिन्त्यति कोशगते द्विरेफे हा हन्त! हन्त! नलिनीं गज उज्जहार।

पर्यायशब्दाः – रात्रिः = निशा, गमिष्यति = यास्यति, सुप्रभातं = प्रातःकालः, भविष्यति, भास्वान् = सूर्यः, उदेष्यति = उदयं प्राप्स्यति, (तदा) पङ्कजश्रीः = कमलपुष्पं, हसिष्यति = विकसिष्यति, इत्थं = एवं, विचिन्तयति = चिन्तयति, कोशगते = कमलपुष्पपत्रे, द्विरेफे = भ्रमरे, हा हन्त! = कष्टं, नलिनीं = कमलम्, उज्जहार = उत्पाटयामास।

गद्यांशव्याख्या – एकस्मिन् कमलपुष्पे उपविष्टः कश्चित् भ्रमरः सायंकाले कमलपत्रेषु निबद्धः सञ्जातः। तदा तेन भ्रमरेण चिन्तितं यत् यदा रात्रिः यास्यति, प्रातःकालः सूर्योदयश्च भविष्यति तदा पुनः कमलपुष्पं विकसिष्यति। अहं बहिः गमिष्यामि। परञ्च तदा एव कश्चित् गजः तत्र आगत्य कमलपादपमेव उत्पाट्य क्षिप्तवान्।

विशेषः – द्विरेफः – द्विरेफपुष्पलिड्भृङ्गषट्पदभ्रमरालयः। उज्जहार = उत्+हृ+लिट् (तिप्)।

मूलम् – **इतस्तु स्वतन्त्र-यवनकुल-भुज्यमान-विजयपुराधीश-प्रेषितः पुण्यनगरस्य समीपे एव प्रक्षालित-गण्डशैल-मण्डलायाः, निर्झरवारिधारा-पूरपूरित-प्रबल-प्रवाहायाः, पश्चिम-पारावार-प्रान्तप्रसूत-गिरि-ग्राम-गुहा-गर्भ-निर्गतायाअ पिप्राच्यपयोनिधिचु म्बन-चञ्चुरायाः,रि ङ्गत-तरङ्ग-भङ्गोद्भूतावर्त्त-शत-भीमायाः, भीमायाः नद्याः, अनवरत-निपतद्-बकुल-कुल-कुसुमकदम्ब-सुरभीकृतमपि नीरं वगाहमान-मत्त-मतङ्गज-मद-धाराभिः कटूकुर्वन्; हय-हेषा-ध्वनि-प्रतिध्वनि-बधिरीकृत-गव्यूति-मध्यगाध्वनीनवर्गः, पटकुटीरकूट-विहित-शारदाम्भोधर-विडम्बनः, निरपराध-भारताऽभिजनजनपीडन-पातक-पटलैरिव समुद्धूयमान-नीलध्वजैरुपलक्षितः, विजयपुरेश्वर-स्यान्यतमः सेनानीः अपजलखानः प्रतापदुर्गादविदूर एव शिववीरेण सहाऽऽहवद्यूतेन चिक्रीडिषुः ससेनस्तिष्ठति स्म।**

प्रसङ्गः – अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन विजयपुरनरेशेन प्रेषितस्य शिववीरेण सह युयुत्सोः अपजलखानस्य चित्रणं कृतमस्ति।

पर्यायशब्दाः – इतस्तु = द्वितीयस्तु, स्वतन्त्रं = स्वच्छन्दं, यद् यवनकुलं = म्लेच्छकुलं, तेन, भुज्यमानस्य = शास्यमानस्य, विजयपुरस्य = यन्नामकनगरस्य, अधीश्वरेण = स्वामिना, प्रेषितः = प्रहितः, पुण्यनगरस्य = पूनानगरस्य, समीपे एव = निकटे एव, प्रक्षालितगण्डशैलमण्डलायाः = धौतगिरिच्युतस्थूलशिलामण्डलायाः, निर्झराणां = स्रोतसां, वारिधारापूरैः = जलधारासमूहैः, पूरितः = भरितः, प्रबलः = वेगवान्, प्रवाहः = प्रवहणं, यस्यास्तस्याः, पश्चिमपारावारः

= पश्चिमसमुद्रः, तस्य, प्रान्ते = निकटे, यः गिरीणां = पर्वतानां, ग्रामः = समूहः, तस्य, गुहानां = गह्वराणां, गर्भतः = मध्यतः, निर्गतायाः = समुत्पन्नायाः, अपि, प्राच्य पयोनिधेः = प्राच्यसमुद्रस्य, चुम्बने = संश्लेषणे, चञ्चुरायाः = चञ्चलायाः, रिङ्गतां = चलतां, तरङ्गाणाम् = ऊर्मीणां, भङ्गैः = छेदैः, उद्भूताः = सञ्जाताः, ये आवर्तशतां = विभ्रमशताः, तैः भीमायाः = भीषणायाः, भीमायाः – 'भीमा' इति नाम्न्याः, नद्याः = सरितः, अनवरतं = निरन्तरं, निपततां = प्रच्यवतां, बकुलकुलकुसुमानां = वञ्जुलकुलपुष्पाणां, कदम्बेन = समूहेन, सुरभीकृतं = सुगन्धायितम्, अपि, नीरं = जलं, वगाहमानमत्तमङ्गजमदधाराभिः= निमज्जन्मत्तकरिदानवारिधाराभिः,क टूकुर्वन्= तिक्तीकुर्वन्,ह यनाम्= अ श्वानां, हेषाध्वनिः = हिन-हिने'ति रवस्तस्य, प्रतिध्वनिः = प्रतिनिःस्वनस्तेन, बधिरीकृतः = श्रुतिशक्तिविकलीकृतः, गव्यूतिमध्यगः = गव्यूत्यन्तवर्ती, अध्वनानवर्गः = पथिकसमूहः, येन सः, पटकुटीरकूटैः = उपकारिकासमूहैः, विहिता = सम्पादिता, शारदाम्भोधराणां = शरन्मेघानां, विडम्बना = अनुकृतिः, येन सः निरपराधभारताऽभिजनजनपीडनपातकपटलैः = निर्दोषभारतीयजनोत्पीडनपापराशिभिः इव, समुद्धूयमाननीलध्वजैः = प्रकम्पमाननीलपताकभिः, विजयपुरेश्वरस्य = बीजापुरनरेशस्य, अन्यतमः = अनेकेष्वेकः, सेनानीः = चमूपतिः, अपजलखानः = अफजलखाँ नामकः, प्रतापदुर्गात् = सिंहदुर्गात्, अविदूरे एव = निकटे एव, शिववीरेण सह, आहवद्यूतेन = युद्धद्दरोदरेण, चिक्रीडिषुः = क्रीडितुमिच्छुः, ससेनः = सेनायुक्तः, तिष्ठति स्म = अतिष्ठत्।

गद्यांशव्याख्या – अपरतः तु स्वच्छन्दं म्लेच्छकुलं शास्यमानस्य विजयपुरनामकनगरस्य स्वामिना प्रेषितः पुनानगरस्य निकटे एव श्वेतगिरि-पतितस्थूलशिलामण्डलायाः निर्झराणां जलधारासमूहैः पूरितः प्रबलप्रवाहयुक्तः, यस्याः तस्याः पश्चिमसमुद्रः, तस्य सन्निकटेः, यः पर्वतसमूहः, तस्य गुहागर्भतः समुत्पन्नायाः अपि प्राच्यसमुद्रस्य चुम्बने चञ्चलायाः चलततरङ्गाणां भङ्गैः उत्पन्नाः ये आवर्तशताः, तैः भीषणायाः भीमा' इति नाम्ना विख्याताः नद्यः निरन्तरं निपततबकुलकुलपुष्पाणां समूहेन सुरभीकृतम् अपि जलं निमज्जन्मत्तकरिदानवारिधाराभिः तिक्तीकुर्वन् अश्वानां हेषाध्वनिना बधिरीकृतः गव्यूतिमध्यगः पथिकसमूहः (येन सः) पटकुटीरकूटैः इव प्रकम्पमाननीलपतकाभिः बीजापुरनरेशस्य अन्यतमः चमूपतिः अपजलखाननामकः प्रतापदुर्गात् निकटे एव शिववीरेण सह युद्धं कर्तुमिच्छुकः सन् सेनासहितः स्थितो विद्यते।

विशेषः – भुज्यमानः – भुज्+यक्+शानच्।
प्रक्षालित – प्र+क्षाल्+णिच्+क्त।
निर्गता – निर्+गम्+क्त+टाप्।
निपतद् – नि+पत्+शतृ।
सुरभीकृत – सुरभि+च्वि+कृ+क्त।
कटूकुर्वन् – कटु+च्वि+कृ+शतृ+सु।
बधिरीकृत् – बधिर+च्वि+कृ+क्त।
वगाहमान – अव+गाह्+शानच ('अव' इत्यस्य विकल्पेन 'अ'कार लोपः।)
चिक्रीडिषुः – क्रीडितुमिच्छः – कीड्+सन्+उ+सु।

मूलम् – **अथ जगतः प्रभातजालमाकृष्य, कमलानि सम्मुद्रय, कोकान् सशोकी कृत्य, सकल-चराचर-चक्षुः सञ्चार-शक्तिं शिथिलीकृत्य, कुण्डलेनेव निजमण्डलेन पश्चिमामाशां भूषयन्, वारुणी-सेवनेनव माञ्जिष्ठ मञ्जिमरञ्जितः, अनवरत-भ्रमण-परिश्रम-श्रान्त इव सुषुप्सुः, म्लेच्छगणदुराचारदुःखाऽऽक्रान्त-वसुमतीवेदनामिव समुद्रशायिनि निविवेदयिषुः, वैदिक-धर्म-ध्वंस-दर्शन-सञ्जातनिर्वेद इव गिरिगहनेषु प्रविश्य तपश्चिकीर्षुः, धर्म-ताप-तप्त इव समुद्रजले**

सिस्नासुः, सायं समयमवगत्य सन्ध्योपासनमिव विधित्सुः, ''नास्ति कोऽपि मत्कुले; यः सकण्ठग्रहं धर्म-ध्वंसिनो यवनहतकान् यज्ञियादस्माद् भारतगर्भान्निस्सारयेत्'' इति चिन्ताऽऽक्रान्त इव कन्दरि-कन्दरेषु प्रविविक्षुर्भगवान्, भास्वान्, क्रमशः क्रूरकरानपहाय, दृश्य-परिपूर्ण-मण्डलः संवृत्य, श्वेतीभूय,प ीतीभूय,र क्तीभूयच ग गनधरातलाभ्यामुभयतअ ाक्रम्यमाणइ वाऽण्डाकृतिमङ्गीकृत्य, कलि-कौतुक-कवलीकृत-सदाचार-प्रचारस्य पातक-पुञ्ज-पिञ्जरितधर्मस्य च यवन-गण-ग्रस्तस्य भारतवर्षस्य च स्मारयन्, अन्धतमसे च जगत् पातयन्, चक्षुषामगोचर एव संजातः।

प्रसङ्गः – अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन प्रकृतिवर्णनक्रमेऽलङ्कृतवाचा अस्तं गच्छन् भगवान् सूर्यः वर्णितोऽस्ति।

पर्यायशब्दाः – अथ = तदनन्तरं, जगतः = संसारस्य, प्रभातजालं = दीप्तिसमूहम्, आकृष्य = आकुञ्च य, कमलानि = सरसिजानि, सम्मुद्र्य, कोकान् = चक्रवाकान्, सशोकीकृत्य = दुःखिनो विधाय, सकलचराचरचक्षुसञ्चारशक्तिं = समस्तस्थावरजङ्गमनेत्रक्रियाशक्तिं, शिथिलीकृत्य = अवरुद्ध्य, कुण्डलेन = कर्णाभरणेन, इव, निजमण्डलेन = स्वबिम्बेन, पश्चिमां = वारुणीं, दिशाम् = आशां, भूषयन् = अलङ्कुर्वन्, वारुणीसेवनेन = पश्चिमदिग्गमनेन मदिरा सेवनेन वा, इव, माञ्जिष्ठमञ्जिमरञ्जितः = माञ्जिष्ठरक्तिमारक्तः, अनवरतभ्रमणपरिश्रमश्रान्तः = सततसञ्चलनखेदखिन्नः, इव सुषुप्तुः = स्वप्तुमिच्छुः, म्लेच्छगुणस्य = यवनसमूहस्य, दुराचारैः = अनाचारैः, दुःखाऽऽक्रान्तायाः = व्यथाव्यथितायाः, वसुमतेः = वसुन्धरायाः, वेदनां = पीडाम् इव, समुद्रशायिनि = भगवति विष्णौ, निविवेदयिषुः = निवेदनं कर्तुमिच्छुः, वैदिकधर्मध्वंसदर्शनसञ्जातनिर्वेदः = सनातनधर्मविनाशोत्पन्ननिर्वेदः, इव, गिरिगहनेषु = पर्वतदुर्गमेषु, प्रविश्य = प्रवेशं कृत्वा, तपश्चिकीर्षुः = तपष्कर्त्तुमिच्छुः, धर्मतापतप्तः = तपनतापपीडितः, इव समुद्रजले = पयोधिपयसि, सिस्नासुः = स्नानं कर्तुमिच्छुः, सायं समयं = सूर्यास्तवेलायाम्, अवगत्य = ज्ञात्वा, सन्ध्योपासनमिव = सायन्तनं पूजन कर्म इव, विधित्सु = चिकीर्षुः, नास्ति = न विद्यते, कोऽपि = कश्चिदपि, मत्कुले = अस्मत्कुटुम्बे, यः सकण्ठग्रहं = कण्ठं गृहीत्वा, धर्मध्वंसिनः = धर्मविनाशकान्, यवनहतकान् = दुष्टम्लेच्छान्, यज्ञियात् = यज्ञसम्पादनयोग्यात्, अस्मात् = भारतगर्भात् = भारतभूमेः, निःसारयेत्, = बहिःकुर्यात्, इति = एतत्, चिन्ताक्रान्तः = चिन्ताग्रस्तः, इव, कन्दरिकन्दरेषु = पर्वतगुहासुः, प्रविविक्षुः = प्रवेष्टुमिच्छुः, भगवान् भस्वान् = ऐश्वर्यशाली सूर्यः, क्रमशः = शनैः शनैः, क्रुरकरान् = तीव्रकिरणान्, अपहाय = परित्यज्य, दृश्यपरिपूर्णमण्डलः = दृश्य सकलबिम्बः, संवृत्य = संच्छाद्य, श्वेतीभूय = धवलीभूय, पीतीभूय = पीतवर्णोभूत्वा, रक्तीभूय = रुधिरवर्णोभूत्वा, च, गगनधरातलाभ्यां = द्यावापृथिवीभ्याम्, उभयतः = आक्रम्यमाण इव = आक्रान्त इव, अण्डाकृतिम् = अण्डाकारम्, अङ्गीकृत्य = समेत्य, कलिकौतुककवलीकृतसदाचारप्रचारस्य = कलिकौतूहलविनष्टसदाचारस्य, पातकपुञ्जपिञ्जरितधर्मस्य = अघौघपीतधर्मस्य, यवनगणग्रस्तस्य = म्लेच्छवृन्दाक्रान्तस्य, अन्धतमसे = गाढान्धकारे, च जगत् = संसारं, पातयन् = समानयन्, चक्षुषां= नेत्राणाम्, अगोचरः = अदृश्यः, एव, संजातः = अभत्।

गद्यांशव्याख्या – तदनन्तरं संसारस्य प्रकाशसमूहम् आकुञ्च य, कमलानि सम्पुट्य, चक्रवाकान् दुःखिनो विधाय,स म्पूर्णचराचरनेत्रक्रियाशक्तिम्अ वरुद्ध्यक् ण्डलेनइ वस् वबिम्बेनप श्चिमींी दशांभ ूषयन्प श्चिमदिग्गमनेन मदिरासेवनेन वा माञ्जिष्ठरक्तिमारक्तः, सततभ्रमणपरिश्रान्तः सन् शयनमिच्छुः यवनगणस्य अनाचारैः व्यथाव्यथितायाः वसुन्धरायाः पीडाम् इव भगवति विष्णौ निवेदनकर्त्तुमिच्छुः वैदिकधर्मविनाशोत्पन्ननिर्वेद इव पर्वतदुर्गमेषु प्रवेशं कृत्वा तपः कर्त्तुमिच्छुः तपनतापपीडित इव समुद्रजले स्नानकर्त्तुमिच्छुः सायं समयम् अवगत्य सायंकालीनपूजनकर्मकर्त्तुमिच्छुः 'न विद्यते कश्चिदपि मत्कुले, यः कण्ठं गृहीत्वा एतान् धर्मविनाशकान् दुष्टम्लेच्छान् यज्ञसम्पादनयोग्यात् अस्मात् भारतवर्षात् बहिः कुर्यादिति चिन्ताग्रस्त इव पर्वतगुहासु प्रवेष्टुमिच्छुः भगवान् भास्करः

शनैः शनैः तीक्ष्णकिरणान् परित्यज्य दृश्यपरिपूर्णबिम्बान् संवृत्य धवलीभूय पीतवर्णो भूत्वा रक्तीभूय च गगनधरातलौ उभयतः आक्रम्यमाण इव अण्डाकारम् अङ्गीकृत्य कलिकौतूहलविनष्टसदाचारस्य पातकपुञ्जपिञ्जरितधर्मस्य म्लेच्छवृन्दाक्रान्तस्य गाढान्धकारे च संसारं स्थापयन् नेत्रेभ्योऽदृश्यः एव सञ्जातः।

विशेषः – सम्मुद्र्य – सम्+मुद्+क्त्वा (ल्यप्)।

सशोकीकृत्य – सह+शोक+च्वि+कृ+ल्यप्।

शिथिलिकृत्य – शिथिल+च्वि+कृ+ल्यप्।

निविवेदयिषुः – नि+विद्+सन्+उ+सु।

चिकीर्षुः – कृ+सन्+उ+सु।

सिस्नासुः – स्ना+सन्+उ+सु।

विधित्सुः – वि+धा+सन्+उ+सु।

प्रविविक्षुः – प्र+विश्+सन्+उ+सु।

आक्रम्यमाणः – आ+क्रम+यक्+शानच्+सु।

स्मरयन् – स्मृ+णिच्+शतृ+सु।

पातयन् – पत्+णिच्+शतृ+सु।

अगोचरः – नञ्+गो+चर्+अच्+सु।

सञ्जातः – सम्+जनि+क्त+सु।

मूलम् – **ततः संवृत्ते किञ्चिदन्धकारे धूप-धूमेनेव व्याप्तासु हरित्सु भुशुण्डीं स्कन्धे निधाय निपुणं निरीक्षमाणः, आगत-प्रत्यागतञ्च विदधानः, प्रतापदुर्ग- दौवारिकः, कस्यापि पादक्षेपध्वनिमिवाऽश्रौषीत्। ततः स्थिरीभूय पुरतः पश्यन् सत्यपि दीप-प्रकाशेऽवतमसवशादागन्तारं कमप्यनवलोकयन्, गम्भीरस्वरेणैवमवादीत् – ''कः कोऽत्र भोः?''इति।**

अथ क्षणानन्तरं पुनः स एव पादध्वनिरश्रावीति भूयः साक्षेपमवोचत् – ''क एष मामनुत्तरयन् मुमूर्षुः समायाति बधिरः?''

प्रसङ्गः – अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन द्वाररक्षणसंलग्नकस्य द्वारपालस्य वर्णनं कृतमस्ति।

पर्यायशब्दाः – ततः = तदनन्तरं, किञ्चित् = ईषत्, अन्धकारे = तमसि, संवृत्ते = जाते, धूपधूमेनेव = ग्रीष्मधूमेनेव, हरित्सु = दिशासु, व्याप्ता = आच्छादितासु, भुशुण्डी = आग्नेयास्त्रं, स्कन्धे = अंसदेशे, निधाय = स्थापयित्वा, निपुणं = सम्यक्, निरीक्षमाणः = समवलोकयन्, आगतप्रत्यागतञ्च = गमनगमञ्च, विदधानः = कुर्वाणः, प्रतापदुर्गदौवारिकः = प्रतापनाम्नः दुर्गस्य द्वारपालः, कस्यापि = कस्यचिदपि, पादक्षेपध्वनिं = पादसङ्क्रमणशब्दम्, अश्रौषीत् = श्रुतवान्। ततः = तदनन्तरं, स्थिरीभूय = स्थित्वा, पुरतः = अग्रे, पश्यन् = अवलोकयन्, दीपप्रकाशे = प्रदीपालोके, अवतमसवशात् = ईषदन्धकारवशात्, आगन्तारम् = आगन्तुकं, कमपि = कञ्चिदपि, अनवलोकयन् = अपश्यन्, गम्भीरस्वरेण = उच्चस्वरेण, अवादीत् = अवदत्, कः = कोऽत्र, भोः = कोऽस्त्यत्र भोः, इति = एवम्। अथ = अनन्तरं, क्षणानन्तरं = किञ्चिद्-बिलम्ब्य, पुनः = भूयः, स एव = पूर्वविध एव, पादध्वनिः = चरणनिक्षेपशब्दः, अश्रावि = श्रुति इति, भूयः = पुनः, साक्षेप = सक्रोधम्, अवोचत् = अवादीत् – क एषः, मां = द्वारपालम्, अनुत्तरयत् = उत्तरमददन्, मुमूर्षुः = मर्तुमिच्छुः, बधिरः = श्रोतुमशक्तः, समायाति = समागच्छति?

गद्यांशव्याख्या – तदनन्तरं किञ्चित् अन्धकारे भूते सति तथा आतपधूमेन आच्छादितासु दिशासु भुशुण्डीं

स्कन्धे स्थापयित्वा सम्यक् समवलोकयन् इतस्ततः अटनं कुर्वन् च प्रतापदुर्गस्य द्वारपालः कस्यापि पादसञ्चालनध्वनिं श्रुतवान् त त्पश्चात् कञ्चित् स्थत्वाअ ग्रेअ वलोकयन्प्रदीपालोकेऽपि कञ्चिदन्धकारकारणात्क मपिअ ागन्तुकम् अदृष्ट्वा उच्चस्वरेण उक्तवान् – भोः कोऽस्ति? अत्र अरे कोऽस्ति अत्र?

किञ्चित् क्षणादनन्तरमपि पुनः तदेव पादध्वनिः श्रुतः। तदा क्रोधेन द्वारपालः उक्तवान् – कोऽपि बधिरो विद्यते, यः मम प्रत्युत्तरं विनैव मर्तुम् इच्छुकः समागच्छति।

विशेषः – संवृत्ते – सम्+वृत्+क्त+ङि।

निरीक्षणमाणः – निर्+ईक्ष्+शानच्+सु।

विदधानः – वि+धा+शानच्+सु।

आगन्तारम् – आङ्+गम्+तृच्+अम्।

अश्रौषीत् – श्रु+लुङ्+तिप्।

मुमुर्षुः – मृ+सन्+उ+सु।

मूलम् – ततो "दौवारिक! शान्तो भव, किमिति व्यर्थं मुमूर्षुरिति बधिर इति च वदसि?" इति वक्तारमपश्यतैवाऽऽकर्णि मन्द्रस्वरमेदुरा वाणी। अथ "तत्किं नाज्ञायि अद्यापि भवता प्रभुवर्य्याणामादेशो यद् दौवारिकेण प्रहरिणा वा त्रिः पृष्टोऽपि प्रत्युत्तरमददद् हन्तव्य इति" इत्येवं भाषमाणेन द्वाः स्थेन "क्षम्यतामेष आगच्छामि, आगत्य च निखिलं निवेदयामि" इति कथयन् द्वादशवर्षेण केनापि भिक्षुबटुनाऽनुगम्यमानः, कोऽपि काषायवासाः, धृत-तुम्बी-पात्रः, भस्मच्छुरित-ललाटः, रुद्राक्ष-मालिका-सनाथित-कण्ठः, भव्यमूर्तिः संन्यासी दृष्टः। ततस्तयोरेवमभूदालापः –

प्रसङ्गः – अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन प्रतापदुर्गस्थस्य द्वारपालस्य आगन्तुकजनस्य च संवादः वर्णितोऽस्ति।

पर्यायशब्दाः – ततः = तदनन्तरं, दौवारिक = द्वारपाल, शान्तो भव = तूष्णीं भव, किमिति = कथं, व्यर्थं = निष्प्रयोजनं, मुमूर्षः = मर्तुमिच्छुः, इति, बधिर इति = श्रवणसमर्थ इति, च वदसि = कथयसि?, इति, वक्तारं = कथयितारम्, अपश्यता एव = अनवलोकयता एव, मन्द्रस्वरमेदुरा गंभीरस्वरस्निग्धगिरा, आकर्णि = अश्रावि। अथ = ततः, तत्किम् = इति प्रश्ने, किं नाज्ञायि = किं न ज्ञात, भवता = त्वया, प्रभुवर्य्याणां = स्वामिमहाभागानाम्, आदेशः = शासनं, यत्, दौवारिकेण = द्वारपालेन, प्रहरिणा वा = यामिकेन वा, त्रिः = वारत्रयं, पृष्ठोऽपि = जिज्ञासितोऽपि, प्रत्युत्तरं = प्रतिवचनम्, अददद् = अप्रयच्छन्, हन्तव्यः = हननीयः इति, इत्येवं = इत्थं, भाषमाणेन = उच्यमानेन, द्वाःस्थेन = द्वारस्थितेन, क्षम्यतां = क्षमा कर्त्तव्या, एषः = अयम्, आगच्छामि = आयामि, आगत्य च = समेत्य च, निखिलं = सकलं वृत्तं, निवेदयामि = कथयामि, इति = एवं, कथयन् = भाषमाणः, द्वादशवर्षेण = द्वादशहायनेन, केनापि, भिक्षुबटुना = भिक्षुबालकेन, अनुगम्यमानः = अनुसृतः, कोऽपि = कश्चित्, कषायवासाः = कषायवस्त्रधारी, धृततुम्बीपात्रः = गृहीततुम्बीकः, भस्मछुरितललाटः = भस्मशोभितमस्तकः, रुद्राक्षमालिका = सनाथितकण्ठः = रुद्राक्षस्रग्विभूषितकण्ठः, भव्यमूर्तिः = भव्याकृतिः, संन्यासी = विरक्तः साधुः, दृष्टः = अवलोकितः। ततः = तदनन्तरं, तयोः = द्वारपालसंन्यासिनो, एवम् = इत्थम्, आलापः = वार्ता, अभूत् = अभवत्।

गद्यांशव्याख्या – तदा, 'द्वारपाल! सतूष्णीं भव, किमर्थं व्यर्थमेव मर्तुमिच्छुकः बधिरश्चेति वदति' इति द्वारपालेन वक्तुः विना दर्शनमेव गम्भीरस्वरेण स्निग्धवाणी श्रुता। एतदनन्तरं, किं भवान् एतावत्पर्यन्तं महाराजस्य एतम् आदेशं न जानाति यत् द्वारपालेन प्रहरिणा च वारत्रयं पृष्टोऽपि यदि कश्चित् उत्तरं न ददाति तर्हि सः हन्तव्य इति' इत्थं भाषमाणेन द्वारस्थितेन क्षम्यताम्। अहम् आगच्छामि आगत्य च सर्वं कथयामि इति कथयन् द्वादशवर्षीयेण केनापि

भिक्षुबालकेन अनुगम्यमानः कश्चित् कषायवस्त्रधारी गृहीततुम्बीकः भस्मशोभितमस्तकः रुद्राक्षमालाविभूषितकण्ठः भव्याकृतिः संन्यासी अवलोकितः। तदनन्तरं तयोः द्वारपालसंन्यासिनोः इत्थं वार्त्ता सञ्जाता।

विशेषः – वक्तारम् – वच्+तृच्+अम्।
अपश्यता – नञ्+दृश्+शतृ+टा।
आकर्णि – आ+कर्ण+लुङ्+तिप्।
अज्ञायि – ज्ञा+लुङ्+तिप्।
आदेशः – आङ्+दिश्+घञ्+सु।
अददद् – नञ्+दा+शतृ+सु।
हन्तव्य – हन्+तव्यत्+सु।
भाषमाणेन – भाष्+शानच्+टा।
आगत्य – आ+गम्+क्त्वा (ल्यप्)।
अनुगम्यमानः – अनु+गम्+यक्+शानच्+सु।
दृष्टः – दृश्+क्त+सु।

मूलम् – संन्यासी – कथमस्मान् संन्यासिनोऽपि कठोरभाषणैस्तिरस्करोषि?

दौवारिकः – भगवन्! भवान् संन्यासी तुरीयाश्रमसेवीति प्रणम्यते, परन्तु प्रभूणामाज्ञामुल्लङ्घ्य निजपरिचयमददद्देवाऽऽयातीत्याक्रुश्यते।

संन्यासी – सत्यं क्षान्तोऽयमपराधः, परमद्यावधि, संन्यासिनः, ब्रह्मचारिणः, पण्डिताः, स्त्रियः, बालाश्च न किमपि प्रष्टव्याः, आत्मानमपरिचाययन्तोऽपि प्रवेष्टव्याः।

दौवारिकः – संन्यासिन्! संन्यासिन्! बहूक्तम्, विरम, न वयं दौवारिका ब्रह्मणोऽप्याज्ञां प्रतीक्षामहे। किन्तु यो वैदिकधर्मरक्षाव्रती, यश्च संन्यासिनां ब्रह्मचारिणां तपस्विनाञ्च संन्यासस्य ब्रह्मचर्यस्य तपश्चान्तरायाणां हन्ता, येन च वीरप्रसविनीयमुच्यते कोङ्कणदेशभूमिः, तस्यैव महाराज-शिववीरस्याऽऽज्ञां वयं शिरसा वहामः।

प्रसङ्गः – गद्यांशेऽस्मिन् महाकविना श्रीमदम्बिकादत्तव्यासेन प्रतापदुर्गद्वारपालसंन्यासिनोः संवादः वर्णितोऽस्ति।

पर्यायशब्दाः – संन्यासी – कथम् = किम्, अस्मान् संन्यासिनोऽपि = मादृशान् विरक्तान्नपि, कठोरभाषणैः = परुषवचनैः, तिरस्करोषि = अपमन्यसे?

दौवारिकः – भगवन् = महायश!, भवान् = त्वं, संन्यासी = विरक्तः, तुरीयाश्रमसेवी = चतुर्थाश्रमसेवी, इति अस्माद्धेतोः, प्रणम्यते = अभिवाद्यते, परन्तु प्रभूणां = स्वामिनाम्, आज्ञाम् = आदेशम्, उल्लङ्घ्य = उल्लघनं कृत्वा, निजपरिचयं = स्वाभिज्ञानम्, अददत् = अप्रयच्छन्, एव, आयाति = आगच्छति, इति अस्मात्, आक्रुश्यते = आकुप्यते।

संन्यासी – सत्यं = यथार्थं, क्षान्तः = मर्षितः, अयम्, अपराधः = दोषः, परं = किन्तु, अद्यावधि = अद्यत आरभ्य, संन्यासिनः = तुरीयाश्रमस्था, ब्रह्मचारिणः = ब्रह्मचर्यवर्तिनः, पण्डिताः = विद्वांसः, स्त्रियः = नार्यः, बालाश्च = बालकाश्च, न किमपि = न किञ्चिदपि, प्रष्टव्याः = प्रश्नं कर्त्तव्याः, आत्मानं = स्वम्, अपरिचाययन्तः = परिचयमददतः अपि, प्रवेष्टव्याः = प्रवेशं कर्त्तव्याः।

दौवारिकः – संन्यासिन्! संन्यासिन्! बहूक्तं = बहुभाषितं, विरम = विश्रम, वयं, दौवारिकाः = द्वारपालाः,

ब्रह्मणः = विधातुः, अपि, आज्ञाम् = आदेशं, न प्रतीक्षामहे = न मन्ये। किन्तुः य शिवः, वैदिकधर्मरक्षाव्रती = वेदविहितधर्मरक्षकः, यश्च, संन्यासिनां = तुरीयाश्रमसेविनां, संन्यासिन् ब्रह्मचारिणां = बटूनां, तपस्विनाञ्च = तपस्तप्तानां च, संन्यासस्य = वैराग्यस्य, ब्रह्मचर्यस्य, तपसः = तपस्यायाः, च अन्तरायाणां = विघ्नानां, हन्ता = निवारिता, येन = शिवेन, च, वीरप्रसविनि = वीरप्रसूता, इयम् = एषा, उच्यते = कथ्यते, कोङ्कणदेशभूमिः = कोङ्कणदेशनाम्नः वसुन्धरा, तस्यैव = एतद्विधस्यैव, महाराजशिवस्य = तत्रभवतः शिववीरस्य, आज्ञाम् = आदेशं, वयं = दौवारिकाः, शिरसा = मस्तकेन, वहामः = धारयामः।

गद्यांशव्याख्या – संन्यासी – कथं मादृशाः संन्यासिनोऽपि कठोरभाषणैः तिरस्क्रियन्ते?

द्वारपालः – भगवन्! भवान् संन्यासी चतुर्थाश्रमसेवी अस्ति। अतः भवन्तं प्रणमामि। परन्तु भवान् स्वामिनः आदेशस्य उल्लंघनं कृत्वा स्वपरिचयम् अप्रयच्छन् एव आगच्छन् अस्ति। अत एव क्रुद्धः सञ्जातः।

संन्यासी – सत्यमुक्तम्। भवतः अयम् अपराधः क्षान्तः। परन्तु अद्य आरभ्य संन्यासिनः ब्रह्मचारिणः, विद्वांसः नार्यः बालकाश्च न किमपि प्रष्टव्याः। विना परिचयप्रदानमपि एतेषां प्रवेशः कार्यः।

दौवारिकः – संन्यासिन्! संन्यासिन्! बहुभाषितम्। तूष्णीं तिष्ठ। वयं द्वारपालाः ब्रह्मणोऽपि आदेशं न मन्यामहे। किन्तु यः वैदिकधर्मस्य रक्षणतत्परः यः संन्यासिनां, ब्रह्मचारिणां तपस्विनां च संन्यासस्य, ब्रह्मचर्यस्य तपसश्च विघ्नानां नाशको विद्यते तथा येन कोङ्कणदेशस्य भूमिः वीरप्रसविनी उच्यते, तस्यैव महाराजशिववीरस्य आज्ञां शिरसा धारयामः।

विशेषः – प्रणम्यते – प्र+नम्+य+लट्+त।

उल्लङ्घ्य – उत्+लङ्घ्+क्त्वा (ल्यप्)।

आक्रुश्यते – आङ्+क्रुश्+यक्+त।

प्रवेष्टव्याः – प्र+विश्+तव्यत्+जस्।

उच्यते – वच्+यक्+लट्+त।

मूलम् – संन्यासी – अथ किमप्यस्तु, पन्थानं निर्दिश, आवां शिववीरनिकटे जिगमिषावः।

दौवारिकः – अलमालप्यापि तत्; प्राह्णे महाराजस्य सन्ध्योपासनसमये भवादृशानां प्रवेशसमयो भवति; न तु रात्रौ?

संन्यासी – तत्किं कोऽपि न प्रविशति रात्रौ?

दौवारिकः – (सापेक्षम्) कोऽपि कथं न प्रविशति? परिचिता वा प्राप्त-परिचयपत्रा वा आहूता वा प्रविशन्ति, न तु भवादृशाः; ये तुम्बीं गृहीत्वा द्वाराद् द्वारम् – इति कथयन्नेव तत्तेजसेव घर्षितो मध्य एव विरराम।

संन्यासी – (स्वगतम्) राजनीति-निष्णातः शिववीरः। सर्वथा दौवारिकता-योग्य एवायं द्वारपालः स्थापितोऽस्ति। परीक्षितमप्येनमेकस्मिन् विषये पुनः परीक्षिष्ये तावत्। (प्रकटम्) दौवारिक! इत आयाहि, किमपि कर्णे कथयिष्यामि।

दौवारिकः – (तथा कृत्वा) कथ्यताम्।

प्रसङ्गः – गद्यांशेऽस्मिन् महाकविना श्रीमदम्बिकादत्तव्यासेन प्रतापदुर्गस्थद्वारपालसंन्यासिनोः संवादः वर्णितोऽस्ति।

पर्यायशब्दाः – संन्यासी – अथ, किमप्यस्तु = किमपि भवतु, पन्थानं = मार्गं, निर्दिश = ज्ञापय, आवां = बटु-संन्यासिनौ, शिववीरनिकटे = शिववीरपार्श्वे, जिगमिषावः = गन्तुमिच्छावः।

दौवारिकः – तत् अलमालप्यापि = एतदालपनीयमपि नास्ति, प्राह्ले = पूर्वाह्ले, महाराजस्य = शिववीरस्य, सन्ध्योपासनसमये = सान्ध्यपूजनावसरे, भवादृशानां = साधुसंन्यासिनां, प्रवेशसमयः = प्रवेशकालः, भवति न तु रात्रौ = निशायां प्रवेशसमयो न भवति।

संन्यासी – तत्किम् = तर्हिंकिम्, कोऽपि = कश्चिदपि, रात्रौ = नक्तं, न प्रविशति = न प्रविष्टो भवति?

दौवारिकः – (सक्रोधम्) कोऽपि कश्चिदपि, कथं कस्मात्, न प्रविशति = न प्रविष्टो भवति? परिचिताः = परिज्ञातजनाः, प्राप्तपरिचपत्राः = प्राप्ताभिज्ञापत्राः, वा = अथवा, आहूताः = आमन्त्रिताः, प्रविशन्ति = प्रवेशं कुर्वन्ति, न तु, भवादृशाः = त्वत्सदृशाः, ये, तुम्बीं = तुम्बीपात्रं, गृहीत्वा = संगृह्य, द्वाराद्द्वारं = गृहाद्गृहम्, इति = एवं, कथयन्नेव = भाषमाण एव, तत्तेजसा = संन्यासिदीप्त्या, घर्षितः = भीतः, मध्ये एव = अन्तरा एव, विरराम = तूष्णीमभूत्। संन्यासी (मनस्वी) राजनीतिनिष्णातः = राजनीतिनिपुणः, शिववीरः = एतन्नामकः नृपतिः सर्वथा = सर्वप्रकारेण, दौवारिकतायोग्यः = द्वारपालकर्मोचितः, एव अयं, द्वारपालं = दौवारिक, स्थापितोऽस्ति = नियुक्तोऽस्ति। परीक्षितं = परीक्षाकृताऽस्य, अपि, एनम् = इमम्, एकस्मिन् = अन्यस्मिन्, विषये, पुनः = भूयः, परीक्षिष्ये = परीक्षां करिष्ये, तावत्। (प्रकटं = प्रकाशं) दौवारिकः = द्वारपालः, इत् आयाहि = अत्र आगच्छ, किमपि = किञ्चिद्, कर्णे = श्रोत्रे, कथयिष्यामि = वदिष्यामि।

दौवारिकः – (तथा कृत्वा समेत्य तं) कथ्यताम् = उच्यताम्।

गद्यांशव्याख्या – संन्यासी – अस्तु, यत्किमपि स्यात्, मार्गं दर्शय। आवां शिववीरस्य सविधं गन्तुमिच्छावः।

दौवारिकः – (सक्रोधं) कश्चिदपि किमर्थं न प्रविशति? परिचितः, परिचयपत्र प्राप्तकर्त्ता अथवा आमन्त्रितास्तु प्रविशन्ति, न तु भवादृशाः – ये तुम्बीं गृहीत्वा द्वारात् द्वारम् – इति कथयन् एव संन्यासिनः तेजसा भीतः सन् मध्ये एव तूष्णीमभूत्।

संन्यासी –(स्वमनसि)ि शववीर:र ाजनीतौप ारङ्गत:अ स्ति ास र्वथाद्व ारपालकर्मोचितए वद ौवारिकः नियुक्तः अस्ति। यद्यपि अस्य परीक्षा तु स्वीकृता। पुनरपि परीक्षां करोमि। (प्रकाशं) द्वारपाल! अत्र आगच्छतु, किमपि कर्णे वदिष्यामि।

दौवारिकः – (तस्य कथनानुसृत्य) उच्यताम्।

विशेषः – राजनीतौ निष्णातः – राजनीतिनिष्णातः (सप्तमी तत्पुरुषः)।

निर्दिश – निर्+दिश्+लोट्+सिप्।

जिगमिषावः – गम्+सन्+लट्+वस्।

निष्णातः – नि+स्ना+क्त+सु।

मूलम् – संन्यासी – निरीक्षस्व त्वमधुना दौवारिकोऽसि, प्राणानगणयन् जीविकां निर्वहसि, त्वं सहस्त्रं वाऽयुतं वा मुद्रा राशीकृताः कदापि प्राप्स्यसीति न कथमपि संभाव्यते।

दौवारिकः – आम्, अग्रे कथ्यताम्।

संन्यासी – वयञ्च संन्यासिनो वनेषु गिरिकन्दरेषु च विचरामः, सर्वं रसायन् तत्त्वं विद्मः।

दौवारिकः – स्यादेवम्, अग्रे अग्रे?

संन्यासी – तद् यदि त्वं मां प्रविशन्तं न प्रतिरुन्धेः तदधुनैव परिष्कृतं पारद-भस्म तुभ्यं दद्याम्, यथा त्वं गुञ्जामात्रेणापि द्वापञ्चाशत्सङ्ख्याकुलापरिमितं ताम्रं जाम्बूनदं विधातुं शक्नुयाः।

प्रसङ्गः – अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन संन्यासिना प्रदत्तोत्कोचलोभेन द्वारपालस्य

परीक्षणं वर्णितमस्ति।

पर्यायशब्दाः – संन्यासी – निरीक्षस्व = अवलोकय, त्वं = द्वारपालम्, अधुना = इदानीं, दौवारिकोऽसि = द्वारपालोऽसि, प्राणान् = असून्, अगणयन् = अचिन्तयन्, जीविकां = जीवनवृत्तिं, निर्वहसि = धारयसि, त्वं, सहस्रवाऽयुतं वा = अत्यधिकं, मुद्राः = रूप्यकाणि, राशीकृताः = सञ्चिताः, कदापि, प्राप्यसि = प्राप्तं करिष्यसि, इति = एतत्, कथमपि = केनापि प्रकारेण, न सम्भाव्यते = न सम्भवति।

दौवारिकः – आं = बाढम्, अग्रे कथ्यताम् = अग्रे वदतु।

संन्यासी – वयञ्च संन्यासिनः = वयं, विरक्ताः, वनेषु = अरण्येषु, गिरिकन्दरेषु, पर्वतगुहासु च, विचरामः = भ्रमामः, सर्वं = निखिलं, रसायनतत्वम् = औषधिविशेषसामर्थ्यं, विद्मः = जानीमः।

दौवारिकः – स्यादेवं – भवेदेवम्, अग्रे-अग्रे कथ्यतां = कथयतु।

संन्यासी – तत् = तर्हि, यदि = चेत्, त्वं मां = संन्यासिनं, प्रविशन्तं = प्रवेशं कुर्वन्तं, न प्रतिरुन्धेः = न प्रतिवारयेः, तत् = तर्हि, अधुनैव = इदानीमेव, परिष्कृतं = शोधितं, पारदभस्मं = रसविशेषं, तुभ्यं = द्वारपालाय, दद्याम = प्रयच्छेयं, यथा = येन, त्वं = द्वारपालः, गुञ्जामात्रेण = गुञ्जापरिभिः तेन, अपि, द्वापञ्चाशतसङ्ख्यातुलापरिमितं, ताम्रं = धातुविशेषं, जाम्बूनदं = सुवर्णं, विधातुं = निर्मातुं, शक्नुयाः = समर्थो भवेः।

गद्यांशव्याख्या – संन्यासी – पश्यतु, भवान् इदानीं द्वारपालोऽस्ति। प्राणानां चिन्तनं विनैव जीविकां करोति। भवान् सहस्रं दशसहस्रञ्च रुप्यकाणि कदापि प्राप्तुं शक्ष्यति एत्तु केनापि प्रकारेण सम्भवं नास्ति।

दौवारिकः – अस्तु, पुनरुच्यताम्।

संन्यासी – वयन्तु संन्यासिनः स्मः। अरण्येषु पर्वतगुहासु च भ्रमामः। सर्वं रसायनतत्त्वं जानीमः।

दौवारिकः – स्यात् एतत्। अग्रे किम्?

संन्यासी – यदि भवान् अन्तः प्रवेशकाले न अवरोधयिष्यति तर्हि इदानीमेव भवते परिष्कृतपारदभस्म ददामि। येन गुञ्जामात्रेणापि द्वापञ्चाशत्सङ्ख्याकतुलापरिमितं ताम्रधातुकं सुवर्णं कर्त्तुं शक्यते।

विशेषः – अगणयन् – नञ्+गण्+णिच्+शतृ+सु।

प्रतिरुन्धेः – प्रति+रुधि+विधिलिङ्+सिप्।

प्रविशन्तम् – प्र+विश्+शतृ+अम्।

गिरिकन्दरेषु – गिरीणां कन्दराः, तेषु। (ष० तत्पुरुषसमासः)।

मूलम् – दौवारिकः – हंहो! कपटसंन्यासिन्!। कथं विश्वासघातं स्वाामिवञ्चनञ्च शिक्षयसि? ते केचनान्ये भवन्ति जार-जाताः, ये उत्कोचलोभेन स्वामिनं वञ्चयित्वा आत्मानमन्धतमसे पातयन्ति, न वयं शिवगणास्तादृशाः। (संन्यासिनो हस्तं धृत्वा) इतस्तु सत्यं कथय कस्त्वं? कुतः आयातः? केन वा प्रेषितः?

संन्यासी – (स्मित्वेव) अथ त्वं मां कं मन्यसे?

दौवारिकः – अहं तु त्वामस्यैव ससेनस्याऽऽयातस्य अपजलखानस्य –

संन्यासी – (विनिवार्य मध्य एव) धिग् धिग्!

दौवारिकः – कस्याप्यन्यस्य वा गूढचरं मन्ये। तदादेशं पालयिष्यामि प्रभुवर्यस्य (हस्तमाकृष्य) आगच्छ दुर्गाध्यक्षसमीपे, स एवाभिज्ञाय त्वया यथोचितं व्यवहरिष्यति।

ततः संन्यासी तु – ''त्यज, नाहं पुनरायास्यामि, नाहं पुनरेवं कथयिष्यामि, महाशयोऽसि दयस्व

दयस्व'' - इति सहस्रधा समचकथत्, तथापि दौवारिकस्तु तमाकृष्य नयन्नेव प्रचलितः।

प्रसङ्गः - अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन परीक्षणतत्परसंन्यासिद्वारपालयोः संवादः वर्णितोऽस्ति।

पर्यायशब्दाः - हंहो = इति आश्चर्ये, कपटसंन्यासिन् = प्रवञ्चकयोगिन्, कथं, विश्वासघातं = विश्वासविनाशं, स्वामिवञ्चनञ्च = प्रभुप्रतारणं च, शिक्षयसि = उपदिशसि? ते केचन, अन्ये = अपरे, भवन्ति = जायन्ते, जारजाताः = स्वैरजाताः, ये, उत्कोचलोभेन = कर्त्तव्यच्युतविधिनोपग्राह्यधनलोभेन, स्वामिनं = प्रभुं, वञ्चयित्वा = प्रतार्य, आत्मानं = स्वम्, अन्धतमसे = घोरे नरके, पातयन्ति = प्रक्षिपन्ति, न वयं, शिवगणाः = शिववीरस्य चाराः, तादृशाः = तथाविधाः। (संन्यासिनः करमुपगृह्य) इतस्तु = इतः आगच्छ, सत्यम् = अलीकं, कथय = वद, कस्त्वं = त्वं कोऽसि? कुत आयातः = कुत्रस्य आगतः? वा = आहोस्वित्, केन प्रेषितः = कस्य प्रेरणयागतोऽत्र?

संन्यासी - (स्मित्वेव) अथ = तावत, त्वं = द्वारपालः, मां = संन्यासिनं, कं, मन्यसे = जानासि।

दौवारिकः - अहं तु, त्वां = संन्यासिनम्, अस्यैव = निकटस्थस्यैव, आयातस्य = आगतस्य, अपजलखानस्य = एतन्नामकस्य ....।

संन्यासी - (अवरुध्य मध्ये एव) धिक् तम्।

दौवारिकः - कस्यापि = कस्यचिदपि, अन्यस्य = अपरस्य, वा = अथवा, गूढचरं = गुप्तचरं, मन्ये = जानामि, तदादेशं = तर्हि आदेशं, पालयिष्यति = पालनं करिष्यामि, प्रभूवर्यस्य = श्रीमतः स्वामिनः। करमाकृष्य, आगच्छ = आयाहि, दुर्गाध्यक्षसमीपे = दुर्गपतिपार्श्वे, स एव = दुर्गाध्यक्ष एव, अभिज्ञाय = अवगम्य, त्वया = संन्यासिना, यथोचितं = शासनादेशपूर्वकं, व्यवहरिष्यति = व्यवहारं करिष्यति।

ततः = तत्पश्चात्, संन्यासी = परिवाट्, तु त्यज = मुञ्च, नाहं पुनरेवं कथयिष्यामि = भूयरेवं भणिष्यामि, महाशयोऽसि = उदारहृदयोऽसि, दयस्व दयस्व = दयां कुरु, दयां कुर्विति। सहस्रधा = बहुधा, समचकथत् = समवोचत्, तथापि, दौवारिकः = द्वारपालः, तु तमाकृष्य = संन्यासिनमाकृष्य, नयन्नेव = संकर्षन्नेव, प्रचलितः = संचलितः।

गद्यांशव्याख्या - दौवारिकः - अरे कपटसंन्यासिन्! कथं भवान् विश्वासघातं स्वामिनः वञ्चनोपदेशञ्च शिक्षयति? ते केचित् अपरे एव तादृशाः स्वैरजाताः भवन्ति, ये उत्कोचलोभेन स्वामिनं वञ्चयित्वा स्वं घोरनरके प्रक्षिपन्ति। वयं शिववीरस्य अनुचराः न तादृशाः स्मः। संन्यासिनः हस्तं गृहीत्वा, अत्र आगच्छतु, सत्यं वदतु, भवान् कुतः आगतः? केन प्रेषितश्च?

संन्यासी - (स्मयमानः) अस्तु भवान् मां कं जानासि?

दौवारिकः - अहन्तु भवन्तं सेनासहितागतस्य अपजलखानस्य ....।

संन्यासी - मध्ये एव अवरुध्य धिक्करोमि।

दौवारिकः - अथवा कस्यापि अन्यस्य गुप्तचरः इति चिन्तयामि। पुनरपि अहन्तु स्वीयप्रभोः आदेशस्य पालनं करिष्यामि। हस्तमाकृष्य। दुर्गाध्यक्षस्य समीपम् आगच्छतु। स एव भवन्तं ज्ञात्वा यथायोग्यं व्यवहारं करिष्यति।

तदनन्तरं संन्यासी तु - मां त्यजतु। पुनः अत्र नागमिष्यामि इति सहस्रवारम् उक्तवान्। महाशय! दयां करोतु, दयां करोतु। पुनरपि द्वारपालः तमाकृष्य नयन् एव प्राचलत्।

विशेषः - विनिवार्य - वि+नि+वृ+णिच्+क्त्वा (ल्यप्)।

समचकथत् - सम्+कथ्+लुङ्+तिप्।

नयन् - नी+शतृ+सु।

विश्वासघातम् - विश्वासस्य घातम् (षष्ठी तत्पुरुषसमासः)।

स्वामिवञ्चनम् - स्वामिनो वञ्चनम् (षष्ठी तत्पुरुषसमासः)।

मूलम् – अथ यावद् द्वारस्थ-स्तम्भोपरि संस्थापितायां काच-मञ्जुषायां जाज्वल्यमानस्य प्रबलप्रकाशस्य दीपस्य समीपे समायातः, तावत्संन्यासिनोक्तम् – दौवारिक! अपि मां पूर्वमपि कदाऽप्यद्राक्षीः? ततो दौवारिकः पुनस्तं निपुणं निरीक्षमाणो मन्द्रेण स्वरेण, अरुणापाङ्गाभ्यां लोचनाभ्यां, गौरतरेण वर्णेन, चुम्बितयौवनेन वयसा, निर्भीकेण हारिणा च मुखमण्डलेन पर्यचिनोत्। भुशुण्डी-समुत्तोलन-किण-कर्कश-करग्रहमपहाय, सलज्ज इव च नम्रीभूय, प्रणमन्नुवाच – ''आः! कथं श्रीमान् गौरसिंह आर्यः? क्षम्यतामनुचितव्यवहार एतस्य ग्राम्य-वराकस्य''। तदवधार्य तस्य पृष्ठे हस्तं विन्यस्यन् संन्यासिरूपो गौरसिंहः समवोचत् – ''दौवारिक! मया बहुशः परीक्षितोऽसि, ज्ञातोऽसि यथायोग्य एव पदे नियुक्तोऽसि चेति। त्वादृशा एव प्रभूणां पुरस्कारभाजनानि भवन्ति लोकद्वयञ्च विजयन्ते। तव प्रामाणिकता जानीत एवाऽत्रभवान् प्रभुवर्यः, परमहमपि विशिष्य कीर्तयिष्यामि। निर्दिश तावत् कुत्र श्रीमान्? किञ्चानुतिष्ठति?

प्रसङ्गः – अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन निजपरिचयादनन्तरं गौरसिंहेन द्वारपालस्य कृतप्रशंसायाः वर्णनं कृतमस्ति।

पर्यायशब्दाः – अथ = तदनन्तरं, यावद् = यदा, द्वारस्थस्तम्भोपरि = द्वारे स्थितस्तम्भस्य उपरिभागे, संस्थापितायां = विक्षिप्तायां, काचमञ्जुषायां = काचपेटिकायां, जाज्वल्यमानस्य = प्रज्वल्यमानस्य, प्रबलप्रकाशस्य = तीव्रप्रकाशस्य, दीपस्य = प्रदीपस्य, समीपे = पार्श्वे, समायातः = समागतः, तावत् = तदा, संन्यासिना = संन्यासिवेषधारिणा, उक्तम् = अभिहितं, ''दौवारिक = द्वारपाल, अपि किं, मां = संन्यासिनं, पूर्वमपि = प्रागपि, कदापि = कदाचित्, अद्राक्षीः = अपश्यः?'' ततः = तदा, दौवारिकः = द्वारपालः, पुनः = भूयः, तं = संन्यासिनं, निपुणं = सम्यक्, निरीक्षमाणः = पश्यन्, मन्द्रेण = गम्भीरेण, स्वरेण = गिरा, अरुणपाङ्गाभ्यां = रक्तनेत्रप्रान्तभागाभ्यां, लोचनाभ्यां = नेत्राभ्यां, गौरतरेण = अतिगौरेण, वर्णेन = रागेण, चुम्बितयौवनेन = स्पृष्ट यौवनेन, वयसा = अवस्थया, निर्भीकेण = भयरहितेन,ह ारिणा= म नोहारिणा,च ,म ुखमण्डलेन= व दनमण्डलेन,प र्यचिनोत्= प रिचितवान्।भ ुशुण्ड्याः= आग्नेयास्त्रस्य, समुत्तोलनेन = उत्थापनेन, यः, किणः = अङ्कः, तेन, कर्कशस्य = कठोरस्य, करस्य = हस्तस्य, ग्रहं = ग्रहणम्, अपहाय = त्यक्त्वा, सलज्ज इव = संकुचित इव, च, नम्रीभूय = नतं भूत्वा, प्रणमन् = अभिवदन्, उवाच = जगाद – 'आः कथं = किं, श्रीमान् = श्री सम्पन्नः, गौरसिंह आर्य = पूर्ववर्णितगौरब्रह्मचारिबटो असि? तदवधार्य = तच्छ्रुत्वा, तस्य = द्वारपालस्य, पृष्ठे = पृष्ठभागे, हस्तं = करं, विन्वस्यन् = संप्रसारयन्, संन्यसिरूपः = संन्यासिवेषधारी, गौरसिंहः, एतन्नामकबटुः, समवोचत् = उवाच – दौवारिकः = द्वारपालः। मया = गौरसिंहेन, बहुशः = अनेकशः, परीक्षितोऽसि सम्यग्वीक्षितोऽसि, ज्ञातोऽसि, अवबुद्धोऽसि, यथायोग्ये = यथोचिते, एव, पदे = स्थाने, नियुक्तोऽसि = स्थापितोऽसि च इति। त्वादृशा एव = त्वात्सदृशा एव, प्रभूणां = स्वामिनां, पुरस्कारभाजनानि = उपहारपात्राणि, भवन्ति = जायन्ते, लोकद्वयञ्च = ऐहिकं पारलौकिकञ्च, विजयन्ते = विजयं प्राप्नुवन्ति। तव = भवतः, प्रामाणिकतां = वास्तविकतां, जानीते = जानाति, एव, अत्रभवान् = श्रीमान्, प्रभुवर्य्यः = स्वामिपदः, परं = किन्तु, अहमपि = बटुरपि, विशेष्य = विशेषरूपेण, कीर्तयिष्यामि = प्रशंसां करिष्यामि। निर्दिश = ज्ञापय, तावत्, कुत्र, श्रीमान् = लक्ष्मीवान् शिववीरः? किञ्च = अपरञ्च किम्, अनुतिष्ठति = करोति।

गद्यांशव्याख्या – इतः परं यदा द्वारे स्थितस्तम्भस्य उपरिभागे संस्थापितकाचपेटिकायां प्रज्वलनशीलस्य तीव्रप्रकाशस्य दीपकस्य समीपे समागतः तदा संन्याासिवेषधारिणा उक्तं – द्वारपाल! किम् इतः पूर्वमपि भवता अहं दृष्टः? तदा द्वारपालः पुनः सम्यक्तया तं संन्याासिनं दृष्ट्वा गम्भीरस्वरेण, रक्तप्रान्तनेत्राभ्याम् अधिकगौरवर्णेन, युवावस्थया निर्भीकतया सुन्दरमुखमण्डलेन चावगतवान्। भुशुण्डीमुत्थापनेन चिह्नयुक्तकठोरहस्तं संन्यासिहस्तात् पृथक्

कृत्वा लज्जितः सन् सः विनम्रः सन् अवदत् "भोः! भवान् तु गौरसिंहवर्यः विद्यते खलु? अस्य ग्राम्यजनस्य अनुचितव्यवहारः क्षम्यताम्।' इदं श्रुत्वा द्वारपालस्य पृष्ठभागे हस्तं संप्रसारयन् संन्यासिवेषधारी गौरसिंहः उक्तवान् – 'द्वारपाल! मया भवतः अनेकशः परीक्षा स्वीकृता अवगतञ्च यत् भवान् यथायोग्यपदे एव नियुक्तोऽस्ति। भवादृशः जन एव स्वामिना पुरस्कृतः भवति लोकद्वयञ्चापि जयते। भवतः प्रामाणिकता महाराजेन शिववीरेण अवगता एवास्ति। पुनरपि अहं विशेषरूपेण भवतः प्रशंसां करिष्यामि। अस्तु तावत्, वदतु कुत्रास्ति श्रीमान्? कस्मिन् कार्ये संलग्नः?

विशेषः – अद्राक्षीः = दृश्+लुङ्।

निरीक्षमाणः = निर्+ईक्ष्+शानच्।

पर्यचिनोत् = परि+चिञ्+लङ्।

अवधार्य = अव+धृ+ल्यप्।

प्रणमन् = प्र+नम्+शतृ।

मूलम् – ततः पुनर्बद्धाञ्जलेदौवारिकस्य किमपि कर्णे कथितमाकर्ण्य प्रधानद्वारमुल्लङ्घ्य, नेदीयस्यामेकस्यां निम्बतरु-तल-वेदिकायां सहचरं समुपवेश्य, तुम्बीमेकतः संस्थाप्य, स्वाङ्गरक्षिका-वरणकाषायवसनं चैकतो निम्बशाखायामवलम्बय्य, पट-खण्डेन पक्ष्मणोः कपोलयोः कर्णयो-भ्रुवोश्चिबुके नासायां केशप्रान्तेषु च छुरितामिव विभूतिं प्रोञ्छ्य स्कन्धयोः पृष्ठे च लम्बमानान् मेचकान् कुञ्चितान् कचानाबध्य, सहचरपोटलिकात उष्णीषमादाय, शिरसि चाऽऽधाय, सुन्दरमुत्तरीयं चैकं स्कन्धयोर्निक्षिप्य, दौवारिक-निर्देशानुसारं श्रीशिववीरालंकृतामट्टालिकां प्रति प्रतिष्ठत।

प्रसङ्गः – अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन साधुवेषं विहाय सज्जीभूय च गौरसिंहस्य द्वारपालनिर्देशानुसारं शिववीरं प्रति गमनस्य वर्णनं कृतमस्ति।

पर्यायशब्दाः – ततः = तदनन्तरं, पुनः = भूयः, बद्धाञ्जले = करबद्धस्य, दौवारिकस्य = द्वारपालस्य, किमपि = किञ्चित्, कर्णे = श्रोत्रे, कथितम् = अभिहितम्, आकर्ण्य = श्रुत्वा, प्रधानद्वारं = मुख्यद्वारम्, उल्लंघ्य = लङ्घयित्वा, नेदीयस्यां = समीपवर्तिन्यां, निम्बतरुतलवेदिकायां = निम्बवृक्षाधश्चत्वरे, सहचरं = सहयात्रिणं, समुपवेश्य = समुपस्थाप्य, तुम्बीं = तुम्बीपात्रम्, एकतः = भागैके, संस्थाप्य = निक्षिप्य, स्वाङ्गरक्षिकावरणकाषायवसनं = स्वकञ्चुकाच्छादनकाषायवस्त्रं, च एकतः = एकस्मिन्, निम्बशाखायां = निम्बविटपे, अवलम्ब्य = अवलम्बितं कृत्वा, पटखण्डेन = लघुवस्त्रेण, पक्ष्मणोः = अक्षिलोम्नोः, कपोलयोः = गण्डयोः, कर्णयोः = श्रोत्रयोः, भ्रुवोः = भ्रुकुट्योः, चिबुके = चिबुकप्रान्ते, नासायां = नालिकायां, केशप्रान्तेषु च = कुन्तलेषु च, छुरितामिव = संलग्नामिव, विभूतिं = भस्म, प्रोञ्छ्य = परामृज्य, स्कन्धयोः = असंदेशयोः, पृष्ठे = पृष्ठभागे, लम्बमानान् = अवलम्बितान्, मेचकान् = कृष्णवर्णान्, कुञ्चितान् = कुटिलान्, कचान् = केशान्, अबध्य = संप्रसाध्य, सहचरपोटलिकात् = सहयात्रिपुटकात्, उष्णीषं = शिरोवेष्टनम्, आदाय = गृहीत्वा, शिरसि = मूर्ध्नि, च, आदाय = संस्थाप्य, एकं, सुन्दरम् = अच्छम्, उत्तरीयम् = आच्छादनपटं, स्कन्धयोः = अंसयोः, निक्षिप्य = स्थापयित्वा, दौवारिकनिर्देशानुसारं = द्वारपालकथनानुसारेण, श्रीशिववीरालंकृतं = श्रीशिववीरयुक्ताम्, अट्टालिकां = प्रासादं, प्रति, प्रतिष्ठत = प्राचलत्।

गद्यांशव्याख्या – तत्पश्चात् करबद्धेन द्वारपालेन कर्णे किञ्चित् कथितं श्रुत्वा (गौरसिंहः) मुख्यद्वारम् उल्लङ्घ्य समीपस्थैकनिम्बवृक्षस्य अधः वेदिकायां स्वीयसहचरं बटुमुपवेश्य तुम्बीपात्रम् एकस्मिन् भागे स्थापयित्वा स्वीयाङ्गरक्षिकावरणकाषायवस्त्रञ्च एकस्मिन् निम्बवृक्षे अवलम्बितं कृत्वा, करवस्त्रेण पक्ष्मणोः, कपोलयोः, कर्णयोः, भ्रुकुट्योश्च चिबुके, नासिकायां, केशप्रान्तेषु च संलग्नां विभूतिं परामृज्य स्कन्धयोः पृष्ठभागे अवलम्बितान् कृष्णवर्णान् कुटिलान् केशान् संप्रसाध्य सहचरपुटकात् उष्णीषम् आदाय शिरसि संस्थाप्य एवं सुन्दरम् उत्तरीयं स्कन्धयोः स्थापयित्वा

द्वारपालकथनानुसारेण श्रीशिववीरालङ्कृतं प्रासादं प्रति प्रस्थानं कृतवान्।

विशेषः – बद्धाञ्जलेः = बद्धा अञ्जलिः येन सः तस्य, (बहुव्रीहि समासः)।

उल्लंघ्य = उत्+लंघि+ल्यप्।

समुपवेश्य = सम्+उप्+विश्+ल्यप्।

संस्थाप्य = सम्+स्थापि+ल्यप्।

प्रोञ्छ्य = प्र+ऊक्षि+ल्यप्।

निक्षिप्य = नि+क्षिप्+ल्यप्।

मूलम् – **शिववीरस्तु कस्याञ्चिच्चन्द्रचुम्बिन्यां सान्द्र-सुधासार-संलिप्तभित्तिकायां धूपधूपितायां गजदन्तिकावलम्बित-विविध-च्छुरिकाखड्गरिष्टिकायां स्वर्ण-पिञ्जर-परिलम्बमान-शुक-पिक-चकोर-सारिका-कलकुजितायामट्टालिकायां सन्ध्यामुपास्योपविष्ट आसीत्। परितश्च तस्यैव खर्वामप्यखर्व पराक्रमां श्यामामपि यशः समूह श्वेतीकृत-त्रिभुवनांकुशासनाश्रयामपि सुशासनाश्रयां पठन-पाठनादिपरिश्रमानभिज्ञामपि नीति-निष्णातां स्थूलदर्शनामपि सूक्ष्मदर्शनां ध्वंसकाण्ड-व्यसनिनीमपि धर्मधौरेयीं कठिनामपि कोमलाम् उग्रामपि शान्तां शोभित-विग्रहामपि दृढ़-सन्धि-बन्धां कलितगौरवामपि कलितलाघवां विशाल-ललाटां प्रचण्ड-बाहुदण्डां शोणापाङ्गां कम्बुग्रीवां सुनद्धस्नायुं वर्तुल-श्यामश्मश्रुं धारिताकृतिमिव वीरतां विग्रहिणीमिव धीरतां समासादित-समर-स्फूर्तिं मूर्तिं दर्शं दर्शं परं प्रसादमासादयन्तस्तस्य वयस्याः कटानध्यवसन्।**

प्रसङ्गः – प्रस्तुतेऽस्मिन् गद्यांशे स्वीयभवने उपविष्टस्य महाराजशिववीरस्य तस्य देहाकृतेश्च वर्णनं कृतमस्ति महाकविना श्रीमदम्बिकादत्तव्यासेन।

पर्यायशब्दाः – शिववीरस्तु = शिववीरः, राजा तु, कस्याञ्चित् चन्द्रचुम्बिन्याम् = अत्युच्छ्रायां, सान्द्रसुधासारसंलिप्तभित्तिकायां = सघनश्वेतचूर्णद्रव्यरूषितभित्यां, धूपधूपितायां = सुगन्धसुवासितायाः, गजदन्तिकां = भित्तिशङ्काम्, अवलम्बिताः = प्रलम्बिताः, विविधाः = अनेकप्रकाराः, छुरिकाखड्गरिष्टिकाः = विविधशस्त्राणि, यस्यां सा, तस्यां, सुवर्णपिञ्जरेषु = हैमनिर्मितपिञ्जरेषु, परिलम्बमानां = निवसतां, शुकपिकचकोरसारिकाणां = विविधपक्षिणां, कलकूजितैः = मधुरशब्दैः, पूजिता = भूषिता या अट्टालिका = प्रसादः तस्यां, सन्ध्यां = सन्ध्यावन्दनादिकृत्यम्, उपास्य = सम्पाद्य, उपविष्टः = स्थितः आसीत्। परितश्च = समन्तात्, तस्यैव = शिववीरस्यैव, खर्वां = ह्रस्वाम्, अपि, अखर्वपराक्रमाम् = अतिशयपराक्रमां, श्यामामपि = कृष्णामपि, यशः समूह = श्वेतीकृत्य, त्रिभुवनां = कीर्तिकूटधवलितलोकत्रयां, कुशासनाश्रयामपि = दर्भविष्टरस्थितामपि, सुशासनाश्रयां = सुराज्याश्रयां, पठनपाठनादिपरिश्रमानभिज्ञामपि = अध्ययनाध्यापनश्रमापरिचितामपि, नीतिनिष्णातां = नीतिमतीं, स्थूलदर्शनामपि = विशालदर्शनवतीमपि, सूक्ष्मदर्शनां = कुशाग्रबुद्धियुक्तां, ध्वंसकाण्डव्यसनिनमपि = विधर्मिहिंसा, व्यसनिनीमपि, धर्मधौरेयीं = धर्मभारधारिणीं, कठिनामपि = कठोरमपि, कोमलां = आक्लिष्टाम्, उग्रामपि = दुर्धर्षामपि, शान्तां = शान्तिमतीं, दयादिगुणयुक्तां, शोभितविग्रहामपि = सुशरीरामाहोस्वित् सुसमरवतीं, अपि, दृढसन्धिबन्धां = दृढशरीरावयवसन्धानयुक्तामाहोस्वित् शत्रुभिः सह स्थिरसन्धियुक्तां, कलितगौरवान्वितामपि, कलितलाघवं = चातुर्यसम्पन्नां, विशाललाटम् = आयतमस्तकं, प्रचण्डबाहुदण्डां = प्रबलभुजदण्डां, शोणपाङ्गां = रक्तकटाक्षां, कम्बूग्रीवां = शंखतुल्यकण्ठां, सुनद्धस्नायुं = प्रश्लिष्टस्नायुतन्तुं, वर्तुलश्यामश्मश्रुं = वर्तुलाकारकृष्णश्मश्रुं, धारितकृतिं = गृहीताकृतिम्, इव, वीरतां = शूरतां, विग्रहिणीं = शरीरवतीं, धीरतां, समासादितसमरस्फूर्तिं = लब्धाध्वरस्फूर्तिं, मूर्तिम् =

आकृतिं, दर्शं दर्शं = दृष्ट्वा दृष्ट्वा, परम् = उत्कृष्टं प्रसादं, प्रसन्नताम्, आसादयन्तः = प्राप्नुवन्तः, तस्य = शिववीरस्य, वयस्याः = मित्राणि, कटान् = तृणनिर्मितोपवेशनानि, अध्यवसन् = अवसन्।

गद्यांशव्याख्या – शिववीरमहाराजस्तु चन्द्रचुम्बिन्यां सघनश्वेतचूर्णवर्णोपेतभित्तिकायां, सुगन्धसुवासितायां, भित्तिकीलेषु अवलम्बितविविधप्रकारकधूरिकाखड्गशस्त्राणि यस्यां तस्यां, सुवर्णनिर्मितपिञ्जरेषु निवसतां शुकपिकचकोरसारिकादिपक्षिणां मधुरशब्दैः भूषितायाम् अट्टालिकायां सन्ध्यापूजनादिकं सम्पाद्य उपविष्टः आसीत्। शिववीरं परितः तस्यैव मित्राणि सहचराः उपविष्टाः आसन्। ते ह्रस्वामपि अतिशयपराक्रमां, श्यामामपि कीर्त्तिकूटधवलितलोकत्रयां, कुशासनाश्रयामपि सुराज्याश्रयाम् अध्ययनाध्यापनश्रमापरिचितामपि नीतिनिष्णातां, विशालदर्शनामपि कुशाग्रबुद्धियुक्तां ध्वंसकाण्डव्यसनिनमपि, धर्मभारधारिणीं कठोरामपि कोमलाम् उग्रामपि शान्तां (दयादिगुणयुक्तां), शोभितविग्रहामपि दृढशरीरावयवसन्धानयुक्तामाहोस्वित् शत्रुभिः सह स्थिरसन्धियुक्तां, गौरवान्वितामपि चातुर्यसम्पन्नां विशालमस्तकां, प्रबलभुजदण्डां, रक्तकटाक्षां, शंखतुल्यकण्ठां सुनद्धस्नायुतन्तुं, वर्तुलाकारकृष्णश्मश्रुं गृहीताकृतिम् इव शूरतां शरीरवतीं समासादितसमरस्फूर्तिम् आकृतिं दृष्ट्वा-दृष्ट्वा अत्यधिकप्रसन्नतां प्राप्नुवन्तः तस्य शिववीरस्य मित्राणि वृणनिर्मितकटेषु उपविष्टाः आसन्।

विशेषः – उपास्य = उप+आस्+ल्यप्।

उपविष्टः = उप+विश्+क्त।

शासनम् = शास्यते अनेनेति शासनम् – शास्+घञ्।

निष्णात = नि+स्ना+क्त। (टाप् – स्त्रीलिङ्गम्)।

धौरेयीम् – धुर+दयञ्+ङीप्। (स्त्रियाम्)

धारिता – धृ+णिच्+क्त। (स्त्रीलिङ्ग टाप्)।

समासादित – सम्+आ+षद्+क्त।

आसादयन्तः – आ+षद्+शतृ, (प्रथमा विभक्तिः बहुवचनम्)।

अध्यसवसन् = अधि+वस्+लङ् (झि)।

मूलम् – तेषु च अपजलखान-दमन-विषयकवार्तामारिप्सुष्वेव कश्चिद् वेत्रहस्तः प्रतीहारः प्रविश्य, वेत्रं कक्षे संस्थाप्य, शिरो नमयित्वा, अञ्जलिं बद्ध्वा न्यवीविदत् – ''प्रभो! श्रीमान् गौरसिंहो दिदृक्षतेऽत्र भवन्तम्'' – तदाकर्ण्य ''आम् प्रवेशय प्रवेशय'' इति सानन्दं सोत्साहं च कथितवति महाराष्ट्रमण्डलाऽऽखण्डले, प्रतिहारो निवृत्य, सपद्येव तं प्रावीविशत्।

प्रसङ्गः – अस्य गद्यांशस्य माध्यमेन महाकविना श्रीमदम्बिकादत्तव्यासेन महाराजशिववीरस्य मित्रैः सह वार्त्तालापक्रमे गौरसिंहस्य प्रवेशस्य वर्णनं कृतमस्ति।

पर्यायशब्दाः – तेषु = शिववयस्येषु, अपजलखानदमनविषकवार्ताम् = अफजलखानविनाशसम्बद्धवृत्तान्तम्, आरिप्सिुषु = प्रारम्भं, चिकीर्षुषु एव, कश्चिद् = एकः, वेत्रहस्तः = वेत्रधारी, प्रतीहारः = समाचारसंवाहकः, प्रविश्य = शिवस्य समीपे गत्वा, वेत्रं = वेत्रलतां, कक्षे = पार्श्वे, संस्थाप्य = संरोप्य, शिरः = मूर्धानं, नमयित्वा = नमनं कृत्वा, अञ्जलिं = हस्तसम्पुटं, बद्ध्वा = निर्मात्य, न्यवीविदत् = निवेदितवान्, ''प्रभोः स्वामिन्, गौरसिंहः = तन्नामकः बटुः, विदृश्यते = द्रष्टुमिच्छति, अत्र भवन्तं = श्रीमन्तं, तदाकर्ण्य = तच्छुत्वा, आं = स्वीकृतं, प्रवेश्य = प्रवेशं कारय, इति = एवं, सानन्दम् = आनन्दपूर्वकं, सोत्साहम् = उत्साहपूर्वकं, च कथितवति = उक्तवति, महाराष्ट्रमण्डलाखण्डले = महाराष्ट्रमण्डलेन्द्रे, प्रतीहारः = सन्देशहरः, सपद्येव = त्वरितमेव, तं = गौरसिंहं, प्राविविशत् = अन्तर्नीतवान्।

गद्यांशव्याख्या – तेषु शिववीरमित्रेषु अपजलखानदमनसम्बन्धिवार्तारम्भे सति एव कश्चन वेत्रधारी समाचारसंवाहकः तत्र समाविश्य वेत्रलतां पार्श्वे संस्थाप्य शिरसः नमनं कृत्वा बद्धाञ्जलिः निवेदितवान् – स्वामिन्! गौरसिंहवर्यः भवन्तं द्रष्टुमिच्छति अर्थात् भवता सह मेलितुम् इच्छति। तस्य वचनं श्रुत्वा – ''अस्तु तावत्। प्रवेशं कारय'' इति आनन्दपूर्वकम् उत्साहपूर्वकञ्च महाराष्ट्रमण्डलेन्द्रशिववीरस्य कथनादनन्तरं संवाहकेन शीघ्रमेव गौरसिंहस्य प्रवेशः कारितः।

विशेषः –

अरिप्सुषु = आ+रभ्+सन्+उ (सप्तमी विभक्तिः, बहुवचनम्)।

संस्थाप्य = सम्+स्था+णिच्+पुक्+ल्यप्।

नमयित्वा = नम्+णिच्+क्त्वा।

न्यवीविदत् = नि+विद्+लुङ् (तिप्)।

दिदृक्षते = दृश्+सन्+लट् (आत्मनेपदम्)।

कथितवति = कथ्+क्तवतु, (सप्तमी विभक्तिः, एकवचनम्)।

निवृत्य = नि+वृत्य+ल्यप्।

प्रावीविशत् = प्र+विश्+लुङ्।

मूलम् – **तमवलोक्यैव ''इत इतो गौरसिंह! उपविश, उपविश। चिराय दृष्टोऽसि अपि कुशलं कलयसि? अपि कुशलिनस्तव सहवासिनः? अप्यङ्गीकृतमहाव्रतं निर्वहथ यूयम्? अपि कश्चिन्नूतनो वृत्तान्तः?'' इति कुसुमानीव वर्षता पीयूष-प्रवाहेणेव सिञ्चता मृदुना वचनजातेन तत्रभवता शिववीरेणाऽऽद्रियमाणः, आपृच्छ्यमानश्च, त्रिः प्रणम्य, अन्तरङ्गमण्डली-जुष्टकटे समुपविश्य, करौ सम्पुटीकृत्य ''भगवन्! अखिलं कुशलं प्रभूणामनुग्रहेणास्माकमखिलानाम्, अङ्गीकृत-महाव्रते च मा स्म पदं धात् कश्चनान्तराय इत्येव सदा प्रार्थ्यते भगवान् भूतनाथः। नूतनः प्रत्नश्च को नामाद्यतनसमये वक्तव्यः श्रोतव्यश्च वृत्तान्तः – ऋते दुराचारात् स्वच्छन्दानामुच्छृङ्खलानामुच्छिन्नसच्छीलानां म्लेच्छ-हतकानाम्''इति कथयामास। ततश्च तेषामेवमभूदालापः।**

प्रसङ्गः – गद्यांशेऽस्मिन् महाकविना श्रीमदम्बिकादत्तव्यासेन इदं वर्णितमस्ति यत् गौरसिंहं दृष्ट्वा शिववीरेण तस्य समाचारः पृष्टः तथा च गौरसिंहेन तस्य प्रत्युत्तरं दत्तम्।

पर्यायशब्दाः – तं = गौरसिंहम्, अवलोक्य = दृष्ट्वा, एव, इत इते, गौरसिंहः = अत्रागच्छ गौरसिंहः, उपविश-उपविश = तिष्ठ-तिष्ठ, चिराय = चिरकालात्, दृष्टोऽसि = अवलोकितोऽसि, अपि कुशलं कलयति? = किमसि कुशली? अपि कुशलिनस्तव सहवासिनः = किं ते सहचराः कुशलिनः सन्ति, अपि = इति प्रश्ने, अङ्गीकृतमहाव्रतं = स्वीकृतमहाव्रतं, निर्वहथ = निर्वाहं, कुरुथ, यूयं भवन्तः? अपि कश्चिन्नूतनोवृत्तान्तः = किमस्ति कश्चिदभिनवप्रवृत्तिः? इति = एतत्, कुसुमानीव = पुष्पाणीव, वर्षता = वृष्टिं कुर्वता, पीयूषप्रवाहेण = अमृतप्रवाहेणेव, सिञ्चता = सरसी कुर्वता, मृदुना = कोमलेन, वचनजातेन = गिरोद्भवेन, तत्रभवता = माननी येन, शिववीरेण = राज्ञा, आद्रियमाणः = समादृतवन्तः, आपृच्छ्यमानश्च = पृष्टः सन्, त्रिः = वारत्रयं, प्रणम्य = प्रणामं कृत्वा, अन्तरङ्गमण्डलीजुष्टकष्टे = स्वजनवृन्दमध्युषितकटे, समुपविश्य = स्थितोभूत्वा, करौ = हस्तौ, सम्पुटीकृत्य = एकीकृत्य, भगवन् = श्रीमन्, अखिलं = सर्वं, कुशलम् = अनामयं, प्रभूणां = स्वामिनाम्, अनुग्रहेण = कृपया, अस्माकम् आश्रमवासिनाम्, अखिलानां = सर्वेषां, अङ्गीकृतमहाव्रते = स्वीकृतमहाव्रते, च पदं = स्थानं, मास्म धात = मास्मभूत, कश्चन् = कोऽपि, अन्तरायः =

विघ्नः, इत्येव = एतदेव, सदा = सर्वदा, प्रार्थ्यते = अभिलष्यते, भगवान् भूतनाथः, भगवान् शङ्करः। नूतनः = अभिनवः, प्रत्नश्च = पुरातनश्च, को नाम, अद्यतनसमये = सम्प्रति, वक्तव्यः = वक्तुं योग्यः, श्रोतव्यश्च = श्रोतुं योग्यश्च, वृत्तान्तः, वार्त्ता, ऋते = विना, दुराचारात् = अत्याचारात्, स्वच्छन्दानां = स्वतन्त्राणाम्, उच्छृङ्खलानाम् = उद्दण्डानाम्, उच्छिन्नसच्छीलानां = सदाचारविरहितानां, म्लेच्छहतकानां, दुष्टयवनानाम्, इति = एवं, कथयामास = अकथयत्। ततश्च = तदनन्तरं, तेषां = गौरसिंहशिववीरादीनाम्, एवम् = इत्थम्, आलापः = वार्त्तालापः, अभूत् = अभवत्।

गद्यांशव्याख्या – महाराजेन शिववीरेण (गौरसिंहं दृष्ट्वा) चिरकालादनन्तरं दर्शनं सञ्जातम्। अत्र आगच्छतु उपविशतु च। सर्वं कुशलं अस्ति वा? भवतः सहवासिनः कुशलिनस्तु सन्ति? भवद्भिः स्वीकृत-महाव्रतस्य निर्वहणं तु क्रियते? कश्चित् नूतनसमाचारस्तु न विद्यते? एवं प्रकारेण पुष्पाणि इव वृष्टिं कुर्वता अमृतप्रवाहेणेव सरससिञ्चता मृदुवचनसमूहेन समाद्रितः पृष्टश्च गौरसिंहः वारत्रयं प्रणामं कृत्वा मित्रजनाध्युषितकटे समुविश्य हस्तौ सम्पुटीकृत्य उक्तवान् – ''भगवन्! भवतां कृपया वयं पूर्णरूपेण कुशलिनः स्मः। अस्माभिः स्वीकृतमहाव्रतेऽस्मिन् किमपि विघ्नं न भवेदिति भगवान् भूतनाथः प्रार्थ्यते। सम्प्रति नूतनः पुरातनः को वा वृत्तान्तः कथनीयः श्रावणीयश्च भवेत् – केवलं स्वच्छन्दानाम् उद्दण्डानाम् सदाचारविरहितानां म्लेच्छहतकानां दुष्टयवनानाम् अत्याचारं विना'' इति गौरसिंहेनोक्तम्। तदनन्तरं तेषां गौरसिंहशिववीरादीनाम् इत्थम् आलापः सञ्जातः।

विशेषः – निर्वहथ = निर्+वह्+लट् (थ)।
वर्षता = वृषु+शतृ, (तृ०वि०, एकवचनम्)।
आद्रियमाणः = आ+दृङ्+शानच्।
आपृच्छ्यमानः = आ+पृच्छ्+शानच्।
समुपविश्य = सम्+उप+विश्+ल्यप्।
प्रत्नः = पुरातनपुराणेप्रतनप्रत्नपुरातनचिरन्तनाः' इत्यमरः।
वक्तव्यः – वच्+तव्यत्।

मूलम् – शिववीरः – अथ कथ्यतां को वृत्तान्तः? का च व्यवस्था अस्मन्महाव्रताश्रम-परम्परायाः?

गौरसिंहः – भगवन्! सर्वं सुसिद्धम्, प्रतिगव्यूत्यन्तरालमङ्गीकृतसनातन-धर्म-रक्षा-महाव्रतानां धारित-मुनि-वेषाणां वीरवराणामाश्रमाः सन्ति। प्रत्याश्रमञ्च वलीकेषु गोपयित्वा स्थापिताः परश्शताः खड्गाः, पटलेषु तिरोभाविताः शक्तयः, कुशपुञ्जान्तः स्थापिता भुशुण्ड्यश्च समुल्लसन्ति। उञ्छस्य, शिलस्य, समिदाहरणस्य, इङ्गुदीपर्य्यन्वेषणस्य, भूर्जपत्रपरिमार्गणस्य, कुसुमावचयनस्य, तीर्थाटनस्य, सत्सङ्गस्य च व्याजेन, केचन जटिला, परे मुण्डिनः, इतरे काषायिणः, अन्ये मौनिनः, अपरे ब्रह्मचारिणश्च बहवः पटवो बटवश्चराः सञ्चरन्ति। विजयपुरादुड्डीयाऽत्राऽऽगच्छन्त्या मक्षिकाया अप्यन्तः स्थितं वयं विद्मः, किं नाम एषा यवनहतकानाम्?

प्रसङ्गः – अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन आश्रमवासिनाम् आश्रमव्यवस्थायाश्च विषये कृतप्रश्नानाम् उत्तराणाञ्च वर्णनं कृतम् अस्ति।

पर्यायशब्दाः – शिववीरः – अथ= अ नन्तरं,क थ्यतां= क थयतु,क ोव ृत्तान्तः= क ाव र्ताअ स्ति? अस्मन्महाश्रमपरम्परायाः = अस्मन्महान् तयो वनसञ्चालनस्य, का व्यवस्था = किं स्वरूपम्?

गौरसिंहः – भगवन् = महाशय, सर्वं = निखिलं, सुसिद्धं = सुव्यवस्थितं, प्रतिगव्यूतिं = प्रतिक्रोशद्वयम्,

अन्तराले = मध्ये, अङ्गीकृत: = स्वीकृत:, सनातनधर्मस्य = हिन्दुधर्मस्य, रक्षाया: = रक्षणस्य, महाव्रत: = महान् नियम: यैस्तेषां, धारितमुनिवेषाणां = मुनिवेषधारिणां, वीरवराणां = सुभटानाम्, आश्रमा: = स्थानानि, सन्ति। प्रत्याश्रमं = प्रत्येकं तपोवनं, वलीकेषु, गोपयित्वा = संगोप्य, स्थापिता: = निक्षिप्ता:, परश्शत: = शताधिका:, खड्गा: = कृपाणा:, पटलेषु = छादनेषु, तिरोभाविता: = अन्तर्हिता:, शक्तय: = शस्त्रविशेषा:, कुशपुञ्जान्त: स्थापिता: = दर्भपटलेषु निहिता:, भुशुण्ड्यश्च = अग्न्यास्त्रविशेष:, समुल्लसन्ति = विराजन्ते। उञ्छ स्य = पतितकणग्रहणस्य, शिलस्य = कणिशानां ग्रहणस्य, समिदाहरणस्य = समिदानयनस्य, इङ्गुदीपर्य्यन्वेषणस्य = णिण्याक मार्गणस्य, भूर्जपत्रमार्गणस्य = भुर्जपत्रान्वेषणस्य, कुसुमावचयनस्य = पुष्पग्रहणस्य, तीर्थाटनस्य = तीर्थभ्रमणस्य, सत्सङ्गस्य = सज्जनसमागमस्य, च व्याजेन = छलेन, केचन = केचित्, बटव:, जटिला: = जटाधारिण:, परे = अन्ये, मुण्डिन: = मुण्डितशिरा:, इतरे = अन्ये, काषायिण: = कषायवस्त्रधारिण:, अन्ये = केचन, मौनिन: = मौनव्रतधारिसाधुवेषा:, अपरे = अन्ये, ब्रह्मचारिण: = ब्रह्मचारिवेषधारिण:, च, पटव: = दक्षा:, बटव: = ब्रह्मचारिबालका:, सञ्चरन्ति = भ्रमन्ति। विजयपुरात् = तन्नगरात्, उड्डीय = उत्पत्य, अत्र, आगच्छन्त्या: = आयान्त्या:, मक्षिकाया: अपि = क्षुद्रजीवानामपि, अन्त:स्थिरम् = आन्तरिकं, विषयं, वयं = महाव्रतधारिण:, विद्म: = जानीम:, किं नाम = का कथा, एषाम् = एतेषां, यवनहतकानां = दुष्टम्लेच्छानाम्?

गद्यांशव्याख्या – शिववीर: – (गौरसिंहस्योपवेशनादनन्तरम्) इदानीं भवान् कथयतु। आश्रमवासिनां का वार्ता अस्ति? अस्माभि: स्वीकृतमहाव्रताश्रमपरम्परायाश्च स्थिति: कीदृशी अस्ति?

गौरसिंह: – श्रीमन्! सर्वं सुव्यवस्थितम्। प्रतिक्रोशद्वयस्य अन्तराले सनातनधर्मस्य रक्षाया: महाव्रतधारिणां मुनिवेषधारिणां शूरवीराणाम् आश्रमा: सन्ति। प्रत्येकमपि आश्रमवलीकेषु संगोप्य स्थापिता: शताधिका: कृपाणा:, छादनेषु अन्तर्हिता: शक्तय:, दर्भसमूहेषु निहिता: अग्न्यादिशस्त्रविशेषा: भुशुण्ड्यश्च विराजन्ते। पतितकणग्रहणस्य कणिशानां ग्रहणस्य, समिदानयनस्य, इङ्गुदी-अन्वेषणस्य, भोजपत्रान्वेषणस्य तीर्थाटनस्य, पुष्पावचयनस्य सत्सङ्गस्य च व्याजेन केचन बटव: जटाधारिण: सन्त: अन्ये च मुण्डितशिरा:, अन्ये कषायवस्त्रधारिण:, केचन मौनव्रतधारिसाधुवेषा: अपरे च ब्रह्मचारिवेषधारिण: निपुणा: ब्रह्मचारिबालका: भ्रमन्ति सञ्चरन्ति वा। विजयपुरनगरात् उड्डीय अत्र आगच्छन्त्या: मक्षिकाया: अपि आन्तरिकीं स्थितिं वयं महाव्रतधारिण: जानीम:, का कथा एतेषां दुष्टयवनानाम्?

विशेष: – गोपयित्वा = गुप्+णिच्+क्त्वा।

समुल्लसन्ति = सम्+उत्+लस्+लट् (झि)।

भुर्जपत्रपरिमार्गणस्य – भूर्जपत्राणां परिमार्गणं, तस्य (तत्पुरुषसमास:)।

जटिला: – जटा+इलच्।

मूलम् – **शिववीर: – साधु, साधु कथं न स्यादेवम्? भारतवर्षीया यूयं, तत्रापि महोच्चकुलजाता:, अस्ति चेदं भारतवर्षं भवति च स्वाभाविक एवानुराग: सर्वस्यापि स्वदेशे, पवित्रतमश्च यौष्माकीण: सनातनो धर्म: तमेते जाल्मा: समूलमुच्छिन्दन्ति अस्ति च ''प्राणा यान्तु, न च धर्म:'' इत्यार्याणां दृढ: सिद्धान्त:। महान्तो हि धर्मस्य कृते लुण्ठ्यन्ते, पात्यन्ते, हन्यन्ते, न धर्मं त्यजन्ति, किन्तु धर्मस्य रक्षायै सर्वसुखान्यपि त्यक्त्वा, निशीथेष्वपि, वर्षास्वपि, ग्रीष्म-घर्मेष्वपि, महारण्येष्वपि, कन्दरिकन्दरेष्वपि,व्यालवृन्देष्वपि,सिंह-सङ्घेष्वपि,वारण-वारेष्वपि,चन्द्रहास-चमत्कारेष्वपिच निर्भया विचरन्ति। तद् धन्या: स्थ यूयं वस्तूत आर्यवंशीया: वस्तुतश्च भारतवर्षीया:।**

प्रसङ्ग: – अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन शिववीरस्य मुखेन कृतभारतवर्षस्य सनातनधर्मस्य च वैशिष्ट्यस्य वर्णनं कृतमस्ति।

पर्यायशब्दा: – **शिववीर:** – साधु साधु = अतिशोभनं, कथं न स्यादेवम्? = एवं कथं न भवेत्? भारतवर्षीया: = भारतीया:, यूयं = भवन्त:, तत्रापि = तस्मिन्नपि, महोच्चकुलजाता: = कुलीना:, इदम् = एतत्, च भारतवर्षं = देशविशेष: अस्ति, सर्वस्यापि = नि:शेषस्य जनस्य, स्वदेशे = स्वदेशं प्रति, स्वाभाविक: = प्राकृतिक:, एव अनुराग: = स्नेह:, भवति:, पवित्रतमश्च = अतिशयपूतश्च, यौष्माकीण: = यौष्माक:, सनातनो धर्म: = हिन्दुधर्म:, तं = हिन्दुधर्मम्, एते = इमे, जाल्मा: = मूर्खा:, समूलं = मूलेन सहितम्, उच्छिन्दन्ति = उत्पाट्यन्ति, प्राणा: = असव:, यान्तु = गच्छन्तु, न च धर्म: = स्वकीय: सनातनोधर्म:, इति = एतत्, आर्याणाम् = आर्याभिधायिनां, दृढ: = स्थिर:, सिद्धान्त: = संकल्प: अस्ति। महान्त: = महापुरुषा:, धर्मस्य कृते = धर्मार्थं, लुण्ठ्यन्ते = चौर्यन्ते, पात्यन्ते = निक्षिप्यन्ते, हन्यन्ते = मार्यन्ते, धर्मं = स्वधर्मं, न त्यजन्ति = न मुञ्चन्ति, किन्तु धर्मस्य रक्षायै = स्वधर्मपालनाय, सर्वसुखानि = निखिलसुखानि अपि, त्यक्त्वा = परित्यज्य, निशीथेषु = अर्द्धरात्रेषु, वर्षास्वपि = जलवर्षणेऽपि, ग्रीष्मघर्मेष्वपि = उष्णसंतापेष्वपि, वारणवारेष्वपि = हस्तिसमूहेष्वपि, महारण्येष्वपि = सघनवनेष्वपि, कन्दरिकन्दरेष्वपि = पर्वतगुहास्वपि, चन्द्रहासचमत्कारेष्वपि = खड्गचमत्कृतिष्वपि, च, निर्भया: = भयरहिता:, विचरन्ति = सञ्चरन्ति। तद् = तस्मात्, धन्या: = साधुभाजा:, स्थ = भवथ, यूयं, वस्तुत: = परमार्थत:, आर्यवंशीया: = आर्यवंशोद्भवा:, वस्तुतश्च, भारतवर्षीया: = भारतवर्षोद्भवा: सन्ति।

गद्यांशव्याख्या – शिववीर: – समीचीनं, समीचीनम्। एवं कथं न भवेत्? भवन्त: भारतीया:, तत्रापि कुलीना:, इदं भारतवर्षमस्ति। स्वदेशं प्रति सर्वेषामनुराग: स्वाभाविकरूपेण भवति। भवतां सनातनधर्म: सर्वाधिक: पवित्र: अस्ति। एते यवनदुष्टा: समूलमेतम् उत्पाटयितुम् इच्छन्ति। ''प्राणा: गच्छन्तु नाम, परञ्च धर्मो नष्टो न भवेत्'' अयम् आर्याणां दृढसिद्धान्त: विद्यते। महापुरुषा: धर्माय लुण्ठ्यन्ते, निक्षिप्यन्ते, हन्यन्ते, धर्मं न त्यजन्ति, परञ्च धर्मरक्षार्थं सर्वविधसुखानि परित्यज्य अर्द्धरात्रौ अपि वृष्टौ अपि ग्रीष्मातपेष्वपि विशालवनेष्वपि, पर्वतगुहाष्वपि खड्गचमत्कृतिष्वपिच ि नर्भीका:भ ूत्वास ञ्चरन्ति।अ तए वभ वन्त:ध ान्या:स न्ति।व स्तुत:भ वन्त:अ ार्यवंशीया: भारतवर्षीयाश्च सन्ति।

विशेष: – उच्छिन्दन्ति = उत्+छिदिरे+लट् (झि)।

त्यक्त्वा = त्यज्+क्त्वा।

कन्दरिकन्दरेष्वपि = कन्दरीणां कन्दरास्तेषु (तत्पुरुषसमास:)।

वार = समूह: – 'समूहे निवहव्यूहसंदोहविसरव्रजा:। स्तोमौघनिकरव्रातवारसंघात सञ्चया:॥ अमरकोष:॥

चन्द्रहासचमत्कारेष्वपि – चन्द्रहासानां चमत्कारास्तेषु।

आर्यवंशीया: – आर्यवंश+छ (ईय) (प्रथमा विभक्ति:, बहुवचनम्)।

मूलम् – अथ कथ्यतां कोऽपि विशेषोऽवगतो वा अपजलखानस्य विषये?

गौरसिंह: – ''अवगत: तत्पत्रमेव दर्शयामि'' इति व्याहृत्य, उष्णीष सन्धौ स्थापितं कन्यापहारक-यवन-मृत-शरीरवस्त्रान्त: प्राप्तं पत्रं बहिश्चकार।

सर्वे च विजयपुराधीशमुद्रामवलोक्य ''किमेतत्? एतत्? कथमेतत्? कस्मादेतत्? इति जिज्ञासमाना: सोत्कण्ठा वितस्थिरे। गौरसिंहस्तु शिववीरस्यापि तत्प्राप्ति-चरित-शुश्रूषामवगत्य संक्षिप्य सर्वं वृत्तान्तमवोचत्। ततस्तु दर्शयतां, प्रसार्यतां, पठ्यतां, कथ्यतां किमिदम्? इति पृच्छति शिववीरे गौरसिंहो व्याजहार –

प्रसङ्ग: – अस्मिन् गद्यांशे श्रीमदम्बिकादत्तव्यासेन शिववीरेण पृष्ट: गौरसिंह: अफजलखानवृत्तान्तं श्रावयति इति वर्णनं कृतमस्ति।

पर्यायशब्दाः – अथ = तदनन्तरं, कथ्यतां = कथयतु, कोऽपि = कश्चित्, विशेषः = नूतनः, अवगतः = विषयः ज्ञातः, वा = अथवा, अपजलखानस्य विषये = विजयपुराधीशसेनापतेः विषये?

गौरसिंहः – "अवगतः = ज्ञातः, तत्पत्रम् = अफजलखानस्य पत्रम्, एव, दर्शयामि = अवलोकयामि", – इति = एवं, व्याहृत्य = उक्त्वा, उष्णीषसन्धौ = शिरोवेष्टनमध्ये, स्थापितं = निक्षिप्तं, कन्यापहारकयवनमृतशरीरवस्त्रान्तः = कन्यापहारकः = बालिकाचोरस्य, यवनयुवकस्य = म्लेच्छयुवकस्य, मृतस्य = गतासोः, शरीरस्य = देहस्य, वस्त्रान्तः = वसनान्तराले, प्राप्तं = लब्धं पत्रं, बहिश्चकार = बहिष्कृतवान्।

सर्वे च = सर्वे च जनाः, विजयपुराधीशमुद्रां = विजयपुरनरेशराजचिह्नम्, अवलोक्य = दृष्ट्वा, "किमेतत् = किमिदं, कुतः एतत् = कस्मात् स्थानात् इदं, कथमेतत् = एतत् कथं प्राप्तं, कस्मादेतत् = एतत् पत्रम् कस्मात् प्राप्तम्?" इति = एवं, जिज्ञासमानाः = ज्ञातुमिच्छन्तः, सोत्कण्ठाः = उत्कण्ठिताः, वितस्थिरे: = स्थिताः। गौरसिंहस्तु = एतन्नामकः बटुः, शिववीरस्य = महाराष्ट्रेश्वरस्य अपि, तत्प्राप्तिचरितशुश्रूषां = पत्रप्राप्तिवृत्तान्तश्रवणेच्छाम्, अवगत्य = ज्ञात्वा, संक्षिप्य = संक्षेपं कृत्वा, सर्वं = निखिलं, वृत्तान्तं = वार्ताम्, अवोचत् = कथयामास। ततस्तु = तदनन्तरम्, "दर्श्यताम् = अवलोकय, प्रसार्यतां = प्रसारय, पठ्यतां = पठतु, कथ्यताम् = उच्यतां, किमिदं = किमेतत्?" इति = एवं, पृच्छति = उक्तवति, शिववीरे = तन्नाम्नि राज्ञे, गौरसिंहः = वटुः, व्याजहारः = उक्तवान्।

गद्यांशव्याख्या – शिववीरमहाराजेन पृष्टम् – अस्तु तावत्, उच्यताम्। अफजलखानस्य विषये काऽपि विशेषवार्ता अवगता वा?

गौरसिंहः – 'विशेषवार्ता अवगता। अफजलखानस्य पत्रमेव दर्शयामि।' इति उक्त्वा गौरसिंहेन उष्णीषमध्ये स्थापितं कन्यायाः अपहरणकर्तुः यवनयुवकस्य मृतशरीरात् वस्त्रेभ्यः प्राप्तपत्रं बहिः निष्कासितम्। सर्वेः जनाः पत्रे विजयनरेशराजचिह्नं दृष्ट्वा "किमिदम्? कुतः इदं प्राप्तम्? कथमिदं प्राप्तम्? कस्माच्च इदं प्राप्तम्? इति ज्ञातुम् इच्छन्तः उत्कण्ठिताः सञ्जाताः। गौरसिंहस्तु तस्य पत्रस्य प्राप्तेः वृत्तान्तश्रवणस्य शिववीरस्यापि इच्छां ज्ञात्वा संक्षेपेण सर्वोऽपि वृत्तान्तः श्रावितः। तदनन्तरं दर्शयतु, प्रसारयतु, पठतु, कथयतु, इदं किमस्ति? एतावति पृष्टे सति शिववीरे गौरसिंहेन उक्तम् –

विशेषः – व्याहृत्य – वि+आ+हृ+ल्यप्।

अपहारकः – अप+हृ+ण्वुल् (अक)।

बहिश्चकारः – बहिः+कृ+लिट् (तिप्)।

जिज्ञासमानाः – ज्ञा+सन्+शानच् (प्र०वि०, बहुवचनम्)।

विस्थिरे – वि+स्था+लिट् (झ आत्मनेपदम्)।

तत्प्राप्तिचरितशुश्रूषाम् – तस्य प्राप्तेः चरितस्य शुश्रूषाम् (तत्पुरुषसमासः)।

प्रसार्यताम् – प्र+सृ+लोट्।

पृच्छति – प्रच्छ्+शतृ (सप्तमी विभक्तिः, एकवचनम्)।

व्याजहार – वि+आ+हृ+लिट् (तिप्)।

मूलम् – भगवन्! सर्पाकारैरक्षरः पारस्य-भाषायां लिखितं पत्रमेतदस्ति। एतस्य सारांशोऽयमस्ति – विजयपुराधीशः स्वप्रेषितमपजलखानं सेनापतिं सम्बोध्य लिखति यत् – "वीरवर! महाराष्ट्रराजेन सह योद्धुं प्रस्थितोऽसीति मा स्म भूत्कश्चनान्तरायस्तव विजये। शिवं युद्धे जेष्यसि चेत्, पद्भ्यां सिंहं जितवानसीति मंस्ये, किन्तु सिंहहननापेक्षया जीवतः सिंहस्य वशीकार एवाधिकं प्रशस्यः। तद् यदि छलेन जीवन्तं शिवमानयेः तद् वीरपुङ्गवोपाधि-दानसहकारेण तव महतीं पदवृद्धिं कुर्य्याम्।

गोपीनाथपण्डितोऽपि मया तव निकटे प्रस्थापितोऽस्ति, स मम तात्पर्यं विशदीकृत्य तव निकटे कथयिष्यति। प्रयोजनवशेन शिवमपि साक्षात्करिष्यति'' इति।

प्रसङ्गः – अस्मिन् गद्यांशे श्रीमदम्बिकादत्तव्यासेन गौरसिंहेन आनीतगोपनीयपत्रे लिखितसन्देशस्य वर्णनं कृतमस्ति।

पर्यायशब्दाः – भगवन् = श्रीमन्, सर्पाकारैः = वक्रैः, अक्षरैः = वर्णैः, पारस्यभाषायां = यवनलिप्यां, लिखितम् = अक्षरायितम्, एतत् = इदं, पत्रम् अस्ति। एतस्य = अस्य, सारांशः = भावः, अयमस्ति, विजयपुराधीशः = विजयपुरनरेशः, स्वप्रेषितं = विजयपुराधीशप्रेषितम्, अपजलखानम् = एतन्नामकं, सेनापतिं = च भूपतिं, सम्बोध्य = अभिमुखीकृत्य, लिखति = सन्दिशति, यत्, – वीरवर = सुभट्, महाराष्ट्रराजेन = शिववीरेण, सह = समं, योद्धुं = युद्धं कर्त्तुं, प्रस्थितोऽसि = प्रस्थानं कृतोऽसि, इति मा स्म भूत् = न भवेत्, युद्धे = संग्रामे, शिवं = महाराष्ट्राधीश्वरं, जेष्यसि = विजयिष्यसे, चेत् = यदि, कश्चन = कोऽपि, अन्तरायः = विघ्नः, तव = भवतः, विजये = विजयप्राप्तौ। पदभ्यां = चरणाभ्यां, पदात्या वा, सिंहं = केसरिणं, जितवान् = विजयं कृतवान्, असि, इति, मस्ये = ज्ञास्ते, किन्तु सिंहहननापेक्षया = केसरिमारणापेक्षया, जीवतः = श्वसतः, सिंहस्य = केसरिणः, वशीकारः = वशीकरणं, एव, अधिकं = विशेषतः, प्रशस्यः = प्रशंसनीयः। तद् = तस्मात्, यदि = चेत्, छलेन = छद्मना, जीवन्तं = प्राणवन्तं, शिवं = शिववीरम्, आनये = समानयेः, तद् = तर्हि, वीरपुङ्गवोपाधिदानसहकारेण = वीरपुङ्गव नामकोपाधि प्रदानेन सह, तव = भवतः, महतीम् = अतिशयां, पदवृद्धिं = पदोन्नतिं, कुर्य्यां = करिष्यामि। गोपीनाथपण्डितेः = एतन्नामके पण्डितः अपि, मया = विजयपुराधीशेन,तव= अपजलखानस्य,निकटे= पार्श्वे,प्रस्थापितः= प्रेषित,अस्ति,स = गोपीनाथः,मम= विजयपुराधीशस्य, तात्पर्यम् = अभिप्रायं, विशदीकृत्य = स्पष्टीकृत्य, तव = भवतः, निकटे = समीपे, कथयिष्यति = वदयिष्यति। प्रयोजनवशेन = सोद्देश्यं, शिवं = शिववीरम्, अपि, साक्षात्करिष्यति = मेलिष्यति, इति = एवम्।

गद्यांशव्याख्या – शिववीरेण पृष्टः गौरसिंहः उक्तवान् – हे श्रीमन्! इदं पत्रं सर्पाकारैः अर्थात् वक्राक्षरैः यवनलिप्यां लिखितमस्ति। एतस्य आशयोऽयमस्ति यत् विजयपुरनरेशः आत्मना प्रेषितं सेनापतिम् अफजलखानं प्रति सम्बोध्य लिखति यत् वीरवर! महाराष्ट्रराजेन शिववीरेण सह युद्धं कर्त्तुं प्रस्थानं कृतोऽसि। अतः निश्चयेन महाराष्ट्राधीश्वरं जेष्यसि। तव जये न काऽपि बाधा भवेत्। यदि शिववीरं युद्धे जितवान् तर्हि पदभ्यामेव केसरिणं जितवान् इति मंस्ये। किन्तु सिंहस्य हननापेक्षया जीवितरूपेण ग्रहणमेव अधिकं प्रशंसनीयम्। यदि छलपूर्वकं जीवितः शिववीरः आनीतः तर्हि वीरपुङ्गवस्य उपाधिप्रदानेन सह तव महती पदवृद्धिरपि भविष्यति। मया गोपीनाथपण्डितोऽपि तव सविधे प्रेषितोऽस्ति। सः ममाभिप्रायं सविस्तरेण त्वां कथयिष्यति। प्रयोजनपुरस्सरं पण्डितगोपीनाथः शिववीरेण सहापि मेलिष्यति। इति पत्रेऽस्मिन् लिखितमस्ति।

विशेषः – सम्बोध्य – सम्+बुध्+ल्यप्।

योद्धुम् – युध्+तुमुन्।

मंस्ये – मन्+लृट् (उ०पु०, एकवचनम्)।

जीवतः – जीव+शतृ (ष०वि०, एकवचनम्)।

प्रशंस्य – प्र+शस्+यत्।

आनयेः – आ+नी+लिङ् (सिप्)।

विशदीकृत्य – विशद+च्वि+ल्यप्।

मूलम् – इत्याकर्णयत एव शिववीरस्य अरुणकौशेय-जाल-निबद्धौ मीनाविव नयने संजाते, मुखं च बाल-भास्कर-बिम्ब-विडम्बना-माललम्बे, अधरं च धीरताधुरामधरीकृतवान्।

अथ स दक्षिण-कर-पल्लवेन श्मश्रु परामृशन्नाकाशे दृष्टिं बद्ध्वा अरे रे विजयपुर-कलङ्क! स्वयमेव जीवन् शिवः तव राजधानीमाक्रम्य, वीरपुङ्गवोपाधिसहकारेण तव महतीं पदवृद्धिमङ्गीकरिष्यति, तत्किं प्रेषयसि मृत्योः क्रीडनकानेतान् कदर्य्य-हतकान्? इति साम्रेडमवोचत्। अपृच्छच्च ''ज्ञायते वा कश्चिद् वृत्तान्तो गोपीनाथपण्डितस्य?''

प्रसङ्गः - अस्मिन् गद्यांशे गौरसिंहस्य मुखात् प्राप्तगोपनीयपत्रस्य विषयं श्रुत्वा शिववीरस्य प्रतिक्रिया महाकविना श्रीमदम्बिकादत्तव्यासेन वर्णिता अस्ति।

पर्यायशब्दाः - इति = एतद्, आकर्णयतः = शृण्वतः, एव शिववीर अरुणकौशेयजाल निबद्धौ = लौहितकौशेयानायगृहीतौ, मीनौ = मत्स्यौ, इव नयने = नेत्रे, संजाते = बभूवतुः, मुखञ्च = आस्यं च, बालभास्करबिम्बविडम्बनां = नवोदितसूर्यमण्डलाकृतिम्, आललम्बे = धृतवत्, अधरं च = ओष्ठं च, धीरताधुरां = धैर्यभारम्, अधरीकृतवान् = त्यक्तवान्।

अथ = ततः, सः = शिववीरः, दक्षिणकरपल्लवेन = वामहस्तपल्लवेन, श्मश्रु, परामृशन् = स्पृशन्, आकाशे = अन्तरिक्षे, दृष्टिं = नेत्रं, बद्ध्वा = प्रक्षिप्य, अरे रे, विजयपुरकलङ्कः = विजयपुरकर्दमः, स्वमेव = त्वमेव, जीवन् = प्राणं धारयन्, शिवः = शिववीरः, तव = भवतः, राजधानीं = विजयपुरम्, आक्रम्य = आक्रमणं कृत्वा, वीरपुङ्गवोपाधिसहकारेण = वीरपुङ्गवेति नाम्नोपाधिना सहैव, तव = भवतः, महतीम् = अत्यधिकां, पदवृद्धिं = स्थानोन्नतिम्, अङ्गीकरिष्यति = स्वीकरिष्यति, तत्किं = तत् कथं, प्रेषयसि = प्रस्थापयसि, मृत्योः = कालस्य, क्रीडनकान् = कन्दुकान्, एतान् = इमान्, कदर्य्यहतकान् = दुष्टकदर्य्यान्, इति = एवं, साम्रेडम् = अनेकशः, अवोचत् = अकथयत्, अपृच्छच्च = प्रपच्छच्च, ज्ञायते = अवगम्यते वा, कश्चिद्, वृत्तान्तः = वार्त्ता, गोपीनाथपण्डितस्य = एतन्नामकस्य पण्डितस्य।

गद्यांशव्याख्या - गौरसिंहस्य मुखात् पत्रस्य विषयं श्रुत्वैव शिववीरमहाराजस्य नेत्रे लोहितकौशेयजालगृहीतौ मीनौ इव सञ्जाते तस्य मुखञ्च नवोदितसूर्यमण्डलाकृतियुक्तं सञ्जातम्। पुनश्च तस्य अधरं धीरतां त्यक्तवान्।

तत्पश्चात् शिववीरः दक्षिणकरपल्लवेन श्मश्रु स्पृशन् आकाशे च दृष्टिं प्रक्षिप्य - 'अरे रे! विजयपुरकलङ्कः! स्वयमेव जीवन् शिववीरः तव विजयपुरराजधानीम् आक्रम्य वीरपुङ्गवेति नाम्ना उपाधिना सहैव तव महतीं पदोन्नतिं स्वीकरिष्यति। एवं चेत् कालस्य क्रीडनकान् एतान् दुष्टनिम्नजनान् किमर्थं प्रेषयसि?

इति अनेकवारम् अकथयत् पृष्टवान् च - ''पण्डितगोपीनाथस्य कश्चित् समाचारः प्राप्तः किम्?''

विशेषः - अरुणकौशेयजालनिबद्धौ - अरुणं कौशेयस्य जालं, तेन निबद्धौ (तत्पुरुषसमासः)।

अधरीकृतवान् - अधर+च्वि+कृ+क्तवतु।

परामृशन् - पर+आ+मृश्+शतृ।

दृष्टिबद्ध्वा - दृश्+क्तिन्+बध्+क्त्वा।

आक्रम्य - आ+क्रम्+ल्यप्।

मूलम् - यावद् गौरसिंहः किमपि विवक्षित तावत्प्रतीहारः प्रविश्य 'विजयतां महाराजः' इति त्रिर्व्याहृत्य, करौ संपुटीकृत्य, शिरो नमयित्वा कथितवान् ''भगवन्! दुर्गद्वारि कश्चन गोपीनाथनामा पण्डितः श्रीमन्तं दिदृक्षुरुपतिष्ठते। नायं समयः प्रभूणां दर्शनस्य, पुनरागम्यताम्'' इति बहुशः कथ्यमानोऽपि ''किञ्चन्नत्यावश्यककार्यम्'' इति प्रतिजानाति। तदत्र प्रभुचरणा एव प्रमाणम् - इति।

प्रसङ्गः - अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन शिववीरमहाराजस्य सविधे पण्डितगोपीनाथस्य आगमनस्य वर्णनं करोति।

पर्यायशब्दाः – यावत् = यदैव, गौरसिंहः = एतन्नामकः बटुः, किमपि = किञ्चित्, विवक्षति = वक्तुमिच्छति, तावत् = तदैव, प्रतीहारः = सन्देशहरः, प्रविश्य = समागत्य, विजयतां = जयतु, महाराजः = प्रभुः, इति = एवं, त्रिः = वारत्रयं, व्याहृत्य = उक्त्वा, करौ = हस्तौ, संपुटीकृत्य = एकीकृत्य, शिरः = मूर्धानं, नमयित्वा = नमनं कृत्वा, कथितवान् = उक्तवान्, ''भगवन् = श्रीमन्, दुर्गद्वारि = सिंहदुर्गद्वारि, कश्चन् = कोऽपि, गोपीनाथनामा = एतन्नामकः, पण्डितः, श्रीमन्तं = भगवन्तं, दिदृक्षुः = दर्शनमिच्छुः, उपतिष्ठते = प्रतीक्षते। नायं, समयः = अवसरः, प्रभूणां = स्वामिनां, दर्शनस्य = मिलनस्य, पुनः = भूयः, अपि, किञ्च न = किमपि, अत्यावश्यककार्यम् = अनतिक्रमणीयं, कार्यम् इति, प्रतिजानाति = दृढतया कथयति। तदत्र = तदस्मिन्, प्रभुचरणाः = स्वामिपादाः, एव, प्रमाणं = प्रमाणत्वेन तिष्ठन्ति इति।

गद्यांशव्याख्या – महाराजशिववीरस्य गोपीनाथविषयकप्रश्नं श्रुत्वा यदैव गौरसिंहः किञ्चित् वक्तुम् इच्छति स्म तदैव सन्देशवाहकः तत्र समागत्य – ''जयतु महाराजः'' एवं त्रिवारम् उक्त्वा हस्तौ संपुटीकृत्य शिरः नमयित्वा उक्तवान् – भगवन् सिंहदुर्गद्वारि कश्चित् गोपीनाथनामकः पण्डितः भवन्तं दर्शनमिच्छुः प्रतीक्षितो विद्यते। एषः कालः स्वामिनः दर्शनस्य नास्ति, पुनः आगच्छतु इति अनेकवारं कथनादनन्तरमपि ''अत्यावश्यकं कार्यमस्ति'' इति दृढतया कथयति। तु इदानीमत्र प्रभुचरणस्य यथादेशः – इति उक्त्वा सन्देशवाहकः विरमति।

विशेषः – विवक्षति – वच्+सन्+लट् (तिप्)।
प्रविश्य – प्र+विश्+ल्यप्।
व्याहृत्य – वि+आ+हृ+ल्यप्।
कथितवान् – कथ्+क्तवतु।
उपतिष्ठते – उप+स्था+लट्।
कथ्यमानः – कथ्+शानच्।

मूलम् – तदवगत्य ''सोऽयं गोपीनाथः, सोऽयं, गोपीनाथः'' इति साम्रेडं सतर्कं सोत्साहञ्च व्याहृतवत्सु, शिववीरेण निजबाल्यप्रियो माल्यश्रीकनामा संबोध्य कथितो यद् ''गम्यतां दुर्गान्तर एव महावीरमन्दिरे तस्मै वासस्थानं दीयतां, भोज्य-पर्यङ्कादि-सुखद-सामग्रीजातेन सत्क्रियतां, ततोऽहमपि साक्षात्करिष्यामि''इति।

प्रसङ्गः – अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन शिववीरेण गोपीनाथपण्डिताय कृतस्वागतस्य वर्णनं कृतमस्ति।

पर्यायशब्दाः – तदवगत्य = एतज्ज्ञात्वा, सोऽयं = पूर्वचर्चितोऽयं, गोपीनाथः = एतन्नामकः पण्डितः, पुनरपि तदेव, इति = एवं, साम्रेडं = बहुशः, सतर्कं = सानुमानं, सोत्साहम् = उत्साहपूर्वकं, च, निखिलेषु = सर्वेषु, व्याहृतवत्सु = उच्चरत्सु, शिववीरेण = महाराष्ट्राधीश्वरेण, निजबाल्यप्रियः = स्वबाल्यमित्रं, माल्यश्रीकनामा = एतन्नामकः, संबोध्य = अभिमुखीकृत्य, कथितः = उक्तः, यत्, ''गम्यतां = गच्छतु, दुर्गान्तरे = दुर्गमध्ये एव, महावीरमन्दिरे = हनुमन्मन्दिरे, तस्मै = गोपीनाथाय, वासस्थानं =निवासः, दीयतां = प्रयच्छतां, भोज्यपर्यङ्कादिसुखसामग्रीजातेन = भोजनशयनादिसुखदवस्तुप्रदानेन, च सत्क्रियां = समाद्रियतां, ततः = तदनन्तरम्, अहमपि = शिववीरोऽपि, साक्षात्करिष्यामि = द्रक्ष्यामि इति।

गद्यांशव्याख्या – सन्देशवाहकात् पण्डितगोपीनाथस्य आगमनस्य वार्तां श्रुत्वा ''अयं स एव गोपीनाथः अस्ति, अयं स एव गोपीनाथः अस्ति'' इति सर्वैः अनेकवारं सतर्कमुत्साहपूर्वकमुक्तम्। तदा शिववीरेण स्वबाल्यप्रियः मित्रं माल्यश्रीकः उक्तः – ''भवान् गत्वा दुर्गमध्ये हनुमत्मन्दिरे पण्डितगोपीनाथस्य कृते निवासव्यवस्थां भोजनशयनादिसुखदवस्तुप्रदानेन सत्कारव्यवस्थाञ्च करोतु'' इति। तदनन्तरम् अहमपि शीघ्रमेव तेन गोपीनाथपण्डितेन

सह मेलिष्यामि।

विशेषः – अवगत्य – अव+गम्+ल्यप्।

व्याहृतवत्सु – वि+आ+हृ+क्तवतु।(सप्तमी, बहुवचनम्)।

भोज्यम् – भुज्+यत्।

भोज्यपर्यङ्कादिसुखदसामग्रीजातेन – भोज्य पर्यङ्कादयश्च याः सुखदसामग्रयस्ताभ्यः जातः तेन।

मूलम् – ततो बाढमित्युक्त्वा प्रयाते माल्यश्रीके; ''महाराज! आज्ञा चेदहमद्यैव अपजलखानं कथमपि साक्षात्कृत्य, तस्याऽखिलं व्यवसितं विज्ञाय प्रभुचरणेषु विनिवेदयामि; नाधुना मम क्षान्तिः शान्तिश्च, यतः संन्यासिवेषोऽहं समागच्छन् द्वयोर्यवनभटयोवर्तियाऽवागमं, यत् श्व एवैते युयुत्सन्ते'' इति गौरसिंहो मन्दं कर्णान्तिकं व्याहार्षीत्।

ततो ''वीर! कुशलोऽसि, सर्वं करिष्यसि, जाने तव चातुरीं, तद् यथेच्छं गच्छ, नाहं व्याहन्मि तवोत्साहम्, नीतिमार्गान् वेत्सि, किन्तु परिपन्थिन एते अत्यन्तनिर्दयाः, अतिकदर्य्याः, अतिकूटनीतयश्च सन्ति।एतैः सह परमसावधानतया व्यवहरणीयम्'' – इति कथयित्वा शिववीरस्तं विससर्ज।

प्रसङ्गः – अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन शिववीरगौरसिंहयोर्मध्ये कृतवार्तालापस्य वर्णनं कृतमस्ति।

पर्यायशब्दाः – ततः = तदनन्तरं, बाढं = युक्तम्, इति = एवम्, उक्त्वा = कथयित्वा, माल्यश्रीके = शिववीरमित्रे, प्रयाते = गते, ''महाराज = भगवन्, आज्ञा = आदेशः, चेत् = यदि, अहं = गौरसिंहः, अद्यैव, अफजलखानं = विजयपुराधीश्वरसेनापतिं, कथमपि = केनापि प्रकारेण, साक्षात्कृत्य = मिलित्वा, तस्य = अफजलखानस्य, अखिलं = सर्वं, व्यवसितं = चेष्टितं, विज्ञाय = ज्ञात्वा, प्रभुचरणेषु = स्वामिपादेषु, विनिवेदयामि = कथयामि, न, अधुना = सम्प्रति, मम = गौरसिंहस्य, क्षान्तिः = सहनशक्तिः, शान्तिश्च = साम च, यतः = यस्मात्, संन्यासिवेषः = परिव्राजकवेषः, अहं = गौरसिंहः, समागच्छन् = आगच्छन्, द्वयोः, यवनभटयोः = म्लेच्छसैनिकयोः, वार्तया = आलापेन, अवागमम् = अवेदिषं, यत्, श्व एव = आगामिनि दिवस एव, ऐते = यवनाः, युयुत्सन्ते = युद्धं कर्त्तुमिच्छन्ति, इति = एवं, गौरसिंहः = पूर्वोक्तः, गौरबटुः, मन्दम् = अतिमन्दस्वरेण, कर्णान्तकं = कर्णयोः समीपे, व्याहार्षीत् = अवदत्।ततः = तत्पश्चात्, वीर = सुभट, कुशलोऽसि = अतिदक्षोऽसि, सर्वं करिष्यसि = सर्वं कर्त्तुं शक्योऽसि, जाने = वेद्मि, तव गौरसिंहस्य, चातुरीं = चतुरतां, तद् = तस्मात्, यथेच्छम् = इच्छानुसारं, गच्छ = याहि, न अहं = शिववीरः, तव = भवतः, उत्साहं = मनोभावं, व्याहन्मि = नाशयामि, नीतिमार्गान् = नीतितत्वान्, वेत्सि = जानासि, किन्तु, परिपन्थिनः = शत्रवः, एते = इमे, अत्यन्तं निर्दयाः = क्रूराः, अविकदर्य्याः = परमनीचाः, अतिकूटनीतयः = कपटा चारचतुराः च सन्ति। एतैः सह = भवनैः सह, परमसावधानतया = अतिसूक्ष्मतया, व्यवहरणीयं = व्यवहारः करणीयः, इति = एतद्, कथयित्वा = उक्त्वा, शिववीरः, तं = गौरसिंहं, विससर्ज = प्रेषयामास।

गद्यांशव्याख्या – तदनन्तरम् ''भवतु नाम'' इत्युक्त्वा माल्यश्रीकः ततः प्रस्थितवान्।पुनश्च ''महाराज! यदि आज्ञा स्यात् तर्हि अद्यैव केनापि प्रकारेण अफजलखानेन सह मिलित्वा तस्य सम्पूर्णकार्यक्रमस्य विषये ज्ञात्वा भवन्तं निवेदयामि।इदानीं मयि शान्तिः सहिष्णुता च नास्ति।यतोहि संन्यासिवेषेण आगमनकाले मया द्वयोः यवनसैनिकयोः वार्तालापेन अवगतं यत् श्व एव एते यवनसैनिकाः युद्धं कर्त्तुम् इच्छन्ति'' इति गौरसिंहेन कर्णस्थाने शिववीरं प्रति शनैः उक्तम्। तदा वीर! त्वं निपुणोऽसि, सर्वं साधयिष्यति, तव चातुर्यञ्चाहं जानामि। अतः त्वं स्वेच्छानुसारं गच्छ। अहं तवोत्साहं न नाशयितुम् इच्छामि। त्वं नीतिमार्गान् जानासि। पुनरपि एते शत्रवः अत्यन्तं निर्दयाः, परमनीचाः

अतिकूतनीतिज्ञाश्च सन्ति। एतैः सह अतिसावधानतया व्यवहारः करणीयः – इत्युक्त्वा शिववीरः तं गौरसिंहं प्रेषितवान्।

विशेषः – प्रयाते – प्र+या+क्त (सप्तमी विभक्तिः, एकवचनम्)।

व्यवसितम् – वि+अव+षिञ्+क्त।

विज्ञाय – वि+ज्ञा+ल्यप्।

समागच्छत् – सम्+आ+गम्+शतृ।

व्याहार्षीत् – वि+आ+हृ+लुङ्।

व्यवहरणीयम् – वि+अव+हृ+अनीयर्।

विससर्ज – वि+सृज्+लिट् (तिप्)।

मूलम् – गौरसिंहस्तु त्रिःप्रणम्य, उत्थाय, निवृत्य, निर्गत्य, अवतीर्य, सपदि तस्याः एव निम्ब-तरु-तल-वेदिकायाः समीप आगत्य, स्वसहचरं कुमारमिङ्गितेनाऽऽहूय कस्मिंश्चित् स्वसंकेतित-भवने प्रविश्य, आत्मनः कुमारस्यापि च केशान् प्रसाधनिकया प्रसाध्य मुखमार्द्रपटेन प्रोच्छ्य, ललाटे सिन्दूरबिन्दु-तिलकं विरचय्य, उष्णीषमपहाय, शिरसि सूचिस्यूतां सौवर्ण-कुसुम-लतादि-चित्र-विचित्रतामुष्णीषिकां संधार्य, शरीरे हरितकौशेय-कञ्चुकिकामायोज्य, पादयोः शोणपट्ट-निर्मितमधोवसनमाकलय्य, दिल्लीनिर्मित्ते महार्हे उपानहौ धारयित्वा; लघीयसीं तानपूरिकामेकां सह नेतुं सहचर-हस्ते समर्प्य, गुप्तच्छुरिकां दन्तावलदन्त-मुष्टिकां यष्टिकां मुष्टौ गृहीत्वा, पटवासैर्दिगन्तं दन्तुरयन्, करस्थपटखण्डेन मुहुर्मुहुराननं प्रोच्छन् गायकवेषेण अपजलखान-शिविराभिमुखं प्रतस्थे।

प्रसङ्गः – अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन गौरसिंहस्य अफजलखानशिविरं प्रति गमनात् पूर्वं कृतसिद्धाताया: वर्णनं कृतमस्ति।

पर्यायशब्दाः – गौरसिंहः = तत्वटुः, त्रिः = वारत्रयं, प्रणम्य = नमस्कृत्य, उत्थाय = आसनं परित्यज्य, निवृत्य = परावृत्य, निर्गत्य = निःसृत्य, अवतीर्य = प्रसादाधः आगत्य, सपदि = तत्क्षणमेव, तस्या एव = पूर्वोक्ताया एव, निम्बतरुतलवेदिकायाः = निम्बवृक्षाधोः निर्मितचत्वरस्य, एव, समीपे पार्श्वे, आगत्य = समेत्य, स्वसहचरम् = एव सतीर्थ्यं, कुमारं = बालकम्, इङ्गितेन = सङ्केतेन, आहूय = आमन्त्र्य, कस्मिंश्चित्, स्वसंकेतित भवने = पूर्वनिश्चितभवने, प्रविश्य = प्रवेशं कृत्वा, आत्मनः = स्वस्य, कुमारस्यापि = बालकस्यापि, च, केशान् = कुन्तलान्, प्रसाधनिकया = कङ्कतिकया, प्रसाध्य = प्रसाधनं कृत्वा, मुखम् = आस्यम्, आर्द्रपटेन = जलसिक्तवस्त्रेण, प्रोछ् य = परिमृज्य, ललाटे = मस्तके, सिन्दूरबिन्दुतिलकं = सिन्दूरबिन्दुचिह्नं, विरचय्य = रचयित्वा, उष्णीषं = शिरोवेष्टनम्, अपहाय = परित्यज्य, शिरसि = मूर्ध्नि, सूचिस्यूतां = सूचिग्रथितां, सौवर्णकुसुमलतादिचित्रविचित्रतां = सुवर्णविरचितपुष्पलतादिचित्रसंवलिताम्, उष्णीषिकां = लघूष्णीषं, टोपिकामित्यर्थः, संधार्य = धारयित्वा, शरीरे = देहे, हरितकौशेयकञ्चुकिकां = हरिद्वर्णक्षौमवासोनिर्मितामूर्ध्वपरिधानम्, आयोज्य = समायोज्य, पादयोः = चरणयोः, शोणपट्टनिर्मितं = रक्तकौशेयरचितम्, अधोवसनम् = अधोवस्त्रम्, आकलय्य = दिल्लीनिर्मिते = दिल्लीप्रदेशविरचिते, महार्हे = बहुमूल्ये, उपानहौ = चरचसेविके, धारयित्वा = संधार्य्य, लघीयसीम् = अतिह्रस्वान्, तानपूरिकां = वाद्यविशेषम्, एकाम् = केवलां, सह = सार्धं, नेतु = ग्रहीतुं, सहचरहस्ते = बालकपाणौ, समर्प्य = अर्पयित्वा, गुप्तछुरिकाम् = अन्तर्हितछुरिकां, दन्तावलदन्तमुष्टिकां = गजदन्तमुष्टिकां, यष्टिकां = लघुदण्डिकां, मुष्टौ = करतले, गृहीत्वा = नीत्वा, पटवासैः = वस्त्रसुगन्धितद्रव्यैः, दन्तुरयन् = उन्नतयन्, करस्थपटखण्डेन = हस्तस्थवस्त्रखण्डेन च, मुहुर्मुहुः = भूयोभूयः, आननं = मुखं, प्रोछ न् = परिमार्जनं, कुर्वन्, गायकवेषेण, अपजलखानशिविराभिमुखम् = अफजलखानवासस्थानं, प्रतस्थे = प्रस्थितवान्।

गद्यांशव्याख्या – गौरसिंहः त्रिवारं शिववीरं नमस्कृत्य आसनं परित्यज्य परावृत्य ततः निर्गत्य च प्रसादस्य अधः आगत्य तत्क्षणमेव तस्याः एव निम्बवृक्षस्य वेदिकायाः समीपे आगत्य स्वकीयसहचरबालकं सङ्केतेन आहूय कस्मिंश्चित् पूर्वनिश्चितभवनं प्रवेशं कृत्वा आत्मनः सहचरस्यापि केशान् कङ्कतेन प्रसाध्य मुखम् आर्द्रवस्त्रेण प्रोञ्छ्य मस्तके सिन्दूरबिन्दुचिह्नं विरचय्य उष्णीषं परित्यज्य शिरसि सूचिग्रथितां सुवर्णविरचितपुष्पलतादिचित्र संवलितां टोपिकां धारयित्वा देहे हरितवर्णीयक्षौमवासनिर्मितामूर्ध्वपरिधानं समायोज्य चरणयोः रक्तकौशेयरचितम् अधोवस्त्रं धृत्वा दिल्लीप्रदेशविरचिते बहुमूल्ये उपानहौ धारयित्वा लघीयसीं तानपूरिकेतिवाद्ययन्त्रं बालकस्य सहचरस्य च हस्ते अर्पयित्वा गुप्तछुरिकां गजदन्तमुष्टिकां लघुयष्टिकां करतलेन गृहीत्वा वस्त्रसुगन्धितद्रव्यैः उन्नतयन् करवस्त्रेण च वारं वारं मुखप्रोच्छनं कुर्वन् गायकवेषेण अफजलखानस्य शिविरं प्रति प्रस्थितवान्।

विशेषः – निर्गत्य – निर्+गम्+ल्यप्।
प्रसाध्य – प्र+साधि+ल्यप्।
विरचय्य – वि+रच्+ल्यप्।
संधार्य – सम्+धृञ्+ल्यप्।
आयोज्य – आ+युज्+ल्यप्।
आकलप्य – आ+कल्+ल्यप्।
लघीयसी – लघु+ईयसुन्।
प्रोञ्छन् – प्र+उछि+शतृ।
प्रतस्थे – प्र+स्था+लिट्।

मूलम् – **अथ तौ त्वरितं गच्छन्तौ, सपद्येव परश्शत-श्वेतपट-कुटीरैः शारदमेघ-मण्डलायितं दीपमाला-विहित-बहुल-चाकचक्यम् अपजलखान-शिविरं दूरत एव पश्यन्तौ, यावत्समीपमागच्छतस्तावत् कश्चन कोकनदच्छविवस्त्रखण्डवेष्टितमूर्द्धा, कटिपर्यन्तसुनद्धकाकश्यामाङ्गरक्षिकः, कर्बुराधोवसनः, शोणश्मश्रु, विजयपुराधीश-नामाङ्कित-वर्तुल-पित्तलपट्टिका-परिकलित-वामवक्षस्थलः स्कन्धे भुशुण्डीं निधाय, इतस्ततो गतागतं कुर्वन् सावष्टम्भमुर्दूभाषया उवाच- 'कोऽयं कोऽयम्? इति; ततो गौरसिंहेनापि गायकोऽहं श्रीमन्तं दिदृशे' इति समार्दवं व्याख्यायि। ततो गम्यतामन्येऽपि गायका वादकाश्च सम्प्रत्येव गताः सन्ति' इति कथयति प्रहरिणि, 'घृतेन स्नातु भवद्रसना' इति व्याहरन् शिविरमण्डलं प्रविवेश।**

प्रसङ्गः – अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन अफजलखानस्य शिविरव्यवस्थायाः वर्णनं कृतमस्ति।

पर्यायशब्दाः – अथ = ततः, तौ = कुमारः गौरसिंहश्च, त्वरितं = शीघ्रं, गच्छन्तौ = व्रजन्तौ, सपद्येव = तत्क्षणमेव, परश्शतश्वेतपटकुटीरैः = शताधिकोपकारिकाभिः, शारदमेघमण्डलायितं = शरत्कालीनमेघमण्डलमिवाचरितं, दीपमालाविहितबहुलचाकचक्यं = प्रदीपावलिकृताधिकचाकचक्यम्, अपजलखानशिविरं = विजयपुराधीशसेनापति-निवासस्थानं, दूरतः = दूरेणैव, पश्यन्तौ = अवलोकयन्तौ, यावत् = यदैव, समीपं = निकटे, आगच्छतः = आयातः, तावत् = तदैव, कश्चन् = कोऽपि, कोकनदच्छविवस्त्रखण्डवेष्टितमूर्धा = कोकनदस्य = रक्तकमलस्य, छविः इव = कान्ति इव, छविर्यस्य तेन, वस्त्रखण्डेन = पटशकलेन, वेष्टितः = आच्छादितः, मूर्धा = शिरः, यस्य सः, कटिपर्यन्तसुनद्धकाकश्यामाङ्गरक्षिकः = कटिपर्यन्ता मध्यभागपर्यन्ता, सुनद्धा = लम्बिता,

काकश्यामा = अतिश्यामला, अङ्गरक्षिका = कञ्चुकिका, यस्य सः, कर्बुराधोवसनः = विविधवर्णकाधोवस्त्रः, शोणश्मश्रुः = रक्तवर्णश्मश्रुः, विजयपुराधीशस्य = शाइस्ताखानस्य, नामाङ्कितया = नामधेयेन चिह्नितया, वर्तुलया = गोलाकारया, पित्तलपट्टिकया = धातुफलकिकया, परिकलितं = भूपितं, वामं = दक्षिणेतरं, वक्षस्थलं = वक्षः, यस्य सः, स्कन्धे = अंसे, भुशुण्डीं = अग्नेयास्त्रं, निधाय = निक्षिप्य, इतस्ततः, गतागतं, कुर्वन् = सम्पादयन्, सावष्टम्भं = सप्रतिरोधं, उर्दूभाषया = पारसीकभाषया, उवाच =अवदत्, कोऽयं = कोऽयमायाति? इति = एवं, ततः = तदनन्तरं, गौरसिंहेन = पूर्वचर्चितबटुना, अपि, गायकः, अहं = गौरसिंहः, श्रीमन्तम् = अफजलखानं, दिदृक्षे = द्रष्टुमिच्छामि इत समार्दवं = सनम्रं, व्याख्यायि = अवोचि। ततः = तदनन्तरं, गम्यतां = गच्छ, अन्येऽपि = अपरेऽपि, गायकाः = गानकारकाः, वादकाः = वादयितारः, सम्प्रति = इदानीम्, एव, गताः = याताः, सन्ति, इति, कथयति = वदति, प्रहरिणि = द्वाररक्षके, घृतेन स्नातु भवद्रसना = सर्पिषां सिञ्चिता स्यात्,भवद्रसना, इति एवम्, व्याहरन् = कथयन्, शिविरमण्डलं = पटकुटीरं, प्रविवेश = प्रविष्टवान्।

गद्यांशव्याख्या – तदनन्तरं सहचरबालकः गौरसिंहश्च द्वौ अपि शीघ्रं गच्छन्तौ तत्क्षणमेव शताधिकश्वेतपटकुटीरैः शरत्कालीनमेघमण्डलमिव दीपावलिकृताधिकचाकचिक्यम् अफजलखानस्य शिविरं दूरादेव अवलोकयन्तौ यदा समीपमागतवन्तौ, तदा एव कोऽपि रक्तकमलकान्तिरिव वस्त्रखण्डेन आच्छादितशिरः, कटिपर्यन्तलम्बितातिश्यामकञ्चुकिकायुक्तः, विविधवर्णीयाधोवस्त्रः, रक्तवर्णश्मश्रुः, विजयपुराधीशस्य शाइस्ताखानस्य नामयुक्तगोलाकारपित्तलपट्टिकां वामवक्षस्थले निधाय भुशुण्डीञ्च स्कन्धे स्थापयित्वा इतस्ततः गमनागमनं कुर्वन् कश्चित् जनः गौरसिंहम् अवरुद्धय उर्दूभाषया पृष्टवान् – कोऽयं कोऽयं? इति। तत्पश्चात् – गौरसिंहवर्येणापि अहं गायकोऽस्मि। श्रीमन्तम् अफजलखानं द्रष्टुम् इच्छामि। तदा गच्छतु, इदानीम् एव अन्येऽपि गायकाः वादकाश्च गताः सन्ति। प्रहरिणः एतत्कथनादनन्तरं तव रसना धृतस्नाता भवेत् इत्युक्त्वा गौरसिंहः शिविरमण्डलं प्रविष्टवान्।

विशेषः – गच्छन्तौ – गम्+शतृ (प्रथमाविभक्तिः, द्विवचनम्)।

पश्यन्तौ – दृश् (पश्य)+शतृ (द्विवचनम्)।

दिदृक्षे – दृश्+सन्+लट्।

व्याख्यायि – वि+आ+ख्या+लुङ्।

कथयति – कथ्+शतृ (सप्तमी विभक्तिः, एकवचनम्।)

प्रविवेश – प्र+विश्+लट् (तिप्)।

मूलम् – तत्र च क्वचित् खट्वासु पर्यङ्केषु चोपविष्टान् सगडगडाशब्दं ताम्रकधूममाकृष्य, मुखात् कालसर्पानिव श्यामल-निःश्वासानुद्गिरतः, स्वहृदयकालिमानमिव प्रकटयतः, स्वपूर्वपुरुषोपार्जित-पुण्यलोकानिव फूत्कारैरग्निसात् कुर्वतः, मरणोत्तरमतिदुर्लभं मुखाग्निसंयोगं जीवनदशायामेवाऽऽकलयतः, प्राप्ताधिकारकलिताखर्वगर्वान्; क्वचिद् ''हरिद्रा, हरिद्रा, लशुनं लशुनं, मरिचं मरिचं, चुक्रं चुक्रं, वितुन्नकं वितुन्नकं शृङ्गवेरं शृङ्गवेरं, रामठं रामठं, मत्स्यण्डी मत्स्यण्डी, मत्स्याम त्स्याः,क कुटाण्डंक कुटाण्डं,प ललंप ललं''इ तिक लकलैर्बालानां नद्रां वद्रावयतः, समीप-संस्थापित-कुतू-कुतुप-कर्करी-कण्डोल-कट-कटाह-कम्बिकडम्बान्उ ग्रगन्धीनिम ांसानि शूलाकुर्वतः न खम्पचाः यवागूः स्थालिकासु प्रसारयतः, हिंगुगन्धीनि तेमनानि तितिण्डीरसैर्मिश्रयतः, परिपिष्टेषु कलम्बेषु जम्बीर-नीरं निश्चयोतयतः, मध्ये मध्ये समागच्छतस्ताम्रचूडान् व्यजन-ताडनैः पराकुर्वतः,ऽ ापुलिसेषुताम्रभाजनेषुअ ारनालंप रिवेषयतःस ूदान्;क वचिद्वक्र-प्रसाधितकाकपक्षान्,

मद-व्याघूर्णित-शोण-नयनान्-सपारस्परिक-कण्ठग्रहं पर्य्यटतः यौवन-चुम्बित-शरीरान्, स्वसौन्दर्य-गर्व-भारेणेव मन्दगतीन्, अनवरताक्षिप्त-कुसुमबाणैरिव कुसुमैर्भूषितान्, वसनातिरोहिताङ्गच्छटान्, विविध-पटवास-वासितानपि चिरस्नानमहामलिन-महोत्कट-स्वेद-पूतिगन्ध-प्रकटीकृतास्पृश्यतान् यवनयुवकान्।

प्रसङ्गः – अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन अफजलखानस्य शिविरव्यवस्थायाः वर्णनं कृतमस्ति। **पर्यायशब्दाः** – तत्र = शिविरे, च क्वचित् = कुत्रापि, खट्वासु = पर्यङ्केषु, शयनेषु च, उपविष्टान् = स्थितान्, सगडगडाशब्दम् = गडगडेतिशब्देन सह, ताम्रकधूममाकृष्य = तमालधूम-अन्तर्निगृह्य, मुखात् = आननात्, कालसर्पान् = कृष्णभुजङ्गान् इव, श्यामलनिःश्वासान् = कृष्णोच्छ्वासान्, उद्गिरतः = वमतः, स्वहृदयकालिमान् = निजान्तनिहितकालुष्यानि, इव, प्रकटयतः = प्रकटीकुर्वतः, स्वपूर्वपुरुषोपार्जितपुण्यलोकान् = निजपूर्वजसञ्चितस्वर्गादिकान्, इव, फूत्कारैः = मुखनिःसारितवायुभिः, अग्निसात् = वह्न्यधीनीभूतान्, कुवर्तः, मरणोत्तरं = मृत्योरनन्तरम्, अतिदुर्लभं = दुष्प्राप्यं, मुखाग्निसंयोगं = वह्न्यनेन संश्लेषणं, जीवनदशायां = जीवितावस्थायाम्, एव, आकलयतः = प्राप्नुवतः, प्राप्ताधिकारकलिताखर्वगर्वान् = लब्धस्वाम्यबहुलीभूताभिमानान्, क्वचित् = कुत्रापि, हरिद्रा-हरिद्रा = महारजनं-महारजनं, लशुनं-लशुनं, मरिचं-मरिचं, चुक्रं-चुक्रं = वृक्षाम्लं-वृक्षाम्लं, रामठं-रामठं = हिङ्गु-हिङ्गुः, वितुकन्नं-वितुकन्नं = छत्रा-छत्रा; शृङ्गवेरं-शृङ्गवेरम् = आर्द्रकम्-आर्द्रकं, मत्स्यण्डी-मत्स्यण्डी = फाणितं-फाणितं, मत्स्याः-मत्स्याः = मीनाः-मीनाः, कुक्कुटाण्डं-कुक्कुटाण्डं = ताम्रचूडाण्डं, पललं-पललं = मांसं-मांसम्, इति = एतत्, कलकलैः = कोलाहलैः, बालानां = शिशूनां, निद्रां = स्वापं, विद्रावयतः = दूरीकुर्वतः, समीपे = निकटे, संस्थापिताः = निक्षिप्ताः, कुतूः = चर्मनिर्मितं तैलाद्यधारपात्रं, कुतुपाः = लघुकुतूः, कर्करी = हस्तप्रक्षालनादियोग्यपात्रं, कण्डोलः = पिटः, कटः = पिटः, कटाहः = शुष्कुल्यादिपाकयोग्यपात्रं, कम्बि = दर्विः, कडम्बः = चेतान्, उग्रगन्धीनि = उत्कटगन्धयुक्तानि, मांसानि = पललानि, शूलाकुर्वतः = लोहशलाकया, संस्कुर्वतः, नखम्पचाः = उष्णाः, यवागूः = तरलाः, स्थालिकासु = भक्षणपात्रेषु, प्रसारयतः = प्रसारणं कुर्वतः, हिंगुगन्धीनि = रामठगन्धीनि, तेमनानि = व्यञ्जनानि, तितिण्डीरसैः = चुक्ररसैः, मिश्रयतः = संयोजयतः, परिपिष्टेषु = घर्षितेषु, कलम्बेषु = वास्तुकादिशाकदण्डेषु, जम्बीरनीरं = निम्बुरसं, निश्च्योतयतः = क्षारयतः, मध्ये-मध्ये = अन्तरान्तरा, समागच्छतः = समेष्यतः, ताम्रचूडान् = कुक्कुटान्, व्यजनताडनैः = तालपत्रप्रताडनैः, पराकुर्वतः = दूरीकुर्वतः, वपुलिप्तेषु = रागयुक्तेषु, ताम्रभाजनेषु = ताम्रपात्रेषु, आरनालं = काञ्जिकं, परिवेषयतः = स्थापयतः, सूदान् = पाचकान्; क्वचिद् वक्रप्रसाधितकाकपक्षान् = वक्रस्फालित-कुञ्चितकचान्, मदव्याघूर्णितशोणनयनान् = आसवोद्वेजितरक्तनेत्रान्, सपारस्परिककण्ठग्रहम् = अन्योन्यकण्ठग्रहसहितं, पर्य्यटतः = परिभ्रमतः, यौवनचुम्बितशरीरान् = अभिनववयः सम्बद्धदेहान्, स्वसौन्दर्यगर्भभारेणेव = निजलावण्यगर्वधुरेव, मन्दगतीन् = मन्दगमनान्, अनवरताक्षिप्तकुसुमबाणैः = निरन्तरपतितकामशरैः, इव कुसुमैः = पुष्पैः, भूषितान् = अलंकृतान्,वसनातिरोहिताङ्गच्छटान् = वस्त्रानाच्छादिताङ्गशोभान्, विविधपटवासितानपि = अनेकविधैव, सुगन्धितानपि, चिरस्नानेन = अत्यधिककालतोदहानिर्णेजनेन, महामलिनस्य = अत्यन्तमलीमसस्य, महोत्कटस्य = अत्युग्रस्य, स्वेदस्य = धर्मोदकस्य, पूतिगन्धे। प्रकटीकृता =व्यक्तीकृता, अस्पृश्यता = स्पर्शयोग्यता, यैस्तान्, यवनयुवकान् = म्लेच्छयुवकान्, ददर्श इति शेषः।

गद्यांशव्याख्या – गौरसिंहः सहचरेण बालकेन सह यदा अफजलखानस्य शिविरं गतवान् तदा तत्र दृष्टवान् – तस्मिन् शिविरे कुत्रापि पर्यङ्केषु उपविष्टान् गडगडेतिशब्देन सह तमालधूम अन्तर्निगृह्य मुखात् कृष्णसर्पान् इव कृष्णनिःश्वासान् उद्गिरतः, स्वकीयहृदयस्थकालुष्यानि इव प्रकटीकुर्वतः, निजपूर्वजसञ्चितस्वर्गादिकान् इव फुत्कारैः

अर्थात् मुखनिःसरितवायुभिः, अग्निसात् कुर्वतः मृत्योरनन्तरं दुष्प्राप्यं मुखाग्निसंयोगं जीवितावस्थायाम् एव प्राप्नुवतः लब्धाधिकारबहुलीभूताहंकारान् कुत्रापि हरिद्रा-हरिद्रा, लशुनं-लशुनं, मरिचं-मचिरम्, अवलेहः-अवलेहः, मधुरा-मधुरा, आर्द्रकम्-आर्द्रकं, हिङ्गु-हिङ्गुः, फाणितं-फाणितं, मीना-मीनाः, कुक्कुटाण्डं-कुक्कुटाण्डं, मांसं-मांसम् इति कोलाहलैः शिशूनां निद्रां दूरीकुर्वतः निकटे संस्थापिताः चर्मनिर्मिततैलाद्यधारपात्रं, लघुकुतूः, हस्तप्रक्षालनादियोग्यपात्रं, कण्डोलः, कटः, कटाहः, दर्विः, कडम्बः, उत्कटगन्धयुक्तानि मांसानि लौहशलाकया संस्कुर्वतः उष्ण-यवागूः स्थालिकासु प्रसारयतः हिंगुगन्धतेमनानि तितिण्डीरसैः संयोजयतः घर्षितेषु वास्तुकादिशाकदण्डेषु निम्बुरसं क्षारयतः मध्ये मध्ये समागच्छतः कुक्कुटान् व्यजनताडनैः दूरीकुर्वतः रागयुक्तेषु ताम्रपात्रेषु काञ्जिकं स्थापयतः पाचकान् क्वचिद् वक्रस्फालितकुञ्चितकचान् आसवोद्वेजितरक्तनेत्रान् अन्योन्यकछ ग्रहसहितं परिभ्रमतः यौवनचुम्बितशरीरान् स्वसौन्दर्यगर्भभारेणैव मन्दगतीन् निरन्तरपातितकामशरैः इव पुष्पैः भूषितान् वस्त्रानाछादितांगशोभान् विविधपटवासितानपि अत्यधिकसमयात् कृतस्नानेन अत्यन्तमलिनस्य उत्युग्रस्य स्वदेकस्य व्यक्तीकृता स्पर्शयोग्यता यैः, एवं विधान् यवनयुवकान् (दृष्टवान् इति शेषः)।

विशेषः – उपविष्टान् – उप+विश्+क्त (द्वि०वि०, बहुवचनम्।)

उद्गिरतः – उद्+गिर्+शतृ (द्वि०वि०, बहुवचनम्)।

आकलयतः – आ+कल्+शतृ (द्वि०वि०, बहुवचनम्)।

विद्रावयतः – वि+द्रु+णिच्+शतृ।

शूलाकुर्वतः – शूल+डाच्+कृ+शतृ।

परिपिष्टेषु – परि+पिष्+क्त (सप्तमी विभक्तिः, बहुवचनम्)।

निश्च्योततः – निस्+च्युतिर्+शतृ।

पर्यटतः – परि+अट्+शतृ।

अनवरताक्षिप्तकुसुमबाणैः – अनवरतम् आक्षिप्ताः कुसुमेषु बाणाः येषु तान् (बहुव्रीहि-समासः)।

मूलम् – क्वचिद् – "अहो! दुर्गमता महाराष्ट्रदेशस्य! अहो, दुराधर्षता महाराष्ट्राणाम्, अहो, वीरता शिववीरस्य, अहो! निर्भयता एतत्सेनानीनाम्, अहो त्वरितगतिरेतद्घोटकानाम् आः! किं कथयामः? दृष्ट्वैव चमत्कारं शिववीर-चन्द्रहासस्य न वयं पारयामो धैर्यं धर्त्तुं, न च शक्नुमो युद्धस्थाने स्थातुं, को नाम द्विशिरा यः शिवेन योद्धुं गच्छेत्? कश्च नाम द्विपृष्ठो यस्तद्भटैरपि छलालापं विदध्यात्? वयं बलिनं आस्माकीना महती सेना, तथाऽपि न जानीमः, किमिति कम्पत इव क्षुभ्यतीव च हृदयम्? 'यवनानां पराजयो भविष्यति, अपजलखानो विनङ्क्ष्यति' इति न विद्मः को जपतीव कर्णे, लिखतीव सम्मुखे, क्षिपतीव चान्तःकरणे। मा स्म भोः! मैवं स्यात्, रक्ष भो! रक्ष जगदीश्वर! अथवा सम्बोभवीतितमामेवमपि, योऽयमपजलखानः सेनापति-पद-विडम्बनोऽपि 'शिवेन योत्स्ये हनिष्यामि ग्रहीष्यामि वा' इति सप्रौढि विजयपुराधीशमहासभायां प्रतिज्ञाय समायातोऽपि, शिवप्रतापञ्च विदन्नपि 'अद्य नृत्यम्, अद्य गानम्, अद्य लास्यम्, अद्य मद्यम्, अद्य वाराङ्गना, अद्य भ्रुकुंसकः, अद्य वीणा-वादनम्'' इति स्वच्छन्दैरुच्छृङ्खलाऽऽचरणैर्दिनानि गमयति।

प्रसङ्गः – अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन अफजलखानस्य शिविरस्य आन्तरिकी स्थितिः वर्णिता अस्ति।

पर्यायशब्दाः – क्वचिद् = कुत्रचिद्, "अहो दुर्गमता = अगमनीयता, महाराष्ट्रदेशस्य = एतद्देशस्य, अहो दुराधर्षता = दुरभिभवनीयता, महाराष्ट्राणां = महाराष्ट्रवासिनाम्, अहो = वीरता, बलशालिता, शिववीरस्य = शिवस्य,

अहो निर्भयता = अभयता, एतत् सेनानीनां =शिववीरसैनिकानाम्, अहो त्वरितगतिः = क्षिप्रगतिः, एतद्घोटकानां = शिववीराश्वानाम्, आ किं कथयामः = किं वदामः? शिववीरचन्द्रहासस्य = शिवकृपाणस्य, चमत्कारं = चाकचिक्यं, दृष्ट्वा = अवलोक्य, एव, न, वयं = यवनसैनिकाः, पारयामः = शक्नुमः, धैर्यं = धीरतां, धर्त्तुं = धारणं कर्तुं, न च शक्नुमः = पारयामः, युद्धस्थाने = रणक्षेत्रे, स्थातुं = युद्धं कर्तुं, को नाम, द्विशिरा = द्विमूर्धाः, यः, शिवेन = शिववीरेण सह, योद्धुं = युद्धं कर्त्तुं, गच्छेत् = यायात्? कश्च नाम, द्विपृष्ठः = युग्मपृष्ठः, यः = सैनिकः, तद्भटैः = शिवसैनिकैः, अपि छलालापं = कपटवार्तां, विदध्यात् = कुर्यात्? वयं = यवनसैनिकाः, बलिनः = बलशालिनः, अस्माकीना = मदीया, महती = दृहती, सेना = पताकिनी, तथापि, न जानीमः = न विद्मः, किमिति = कथमिति, कम्पत इव = वेजत इव, क्षुभ्यतीव = शोभते इव, च हृदयं = चित्तं, यवनानां = म्लेच्छानां, पराजयः = पराभवः, भविष्यति, अपजलखानः = तत्सेनापतिः, विनङ्क्ष्यति = नश्यति इति, एवं, न विद्मः = न जानीमः, कः कर्णे = श्रोत्रे, जपतीव = मन्दं कथयतीव, सम्मुखे = अभिमुखे, लिखतीव = लेखनं करोति इव, अन्तःकरणे = हृदये, क्षिपतीव = प्रसरतीव, मा स्म भोः = मैवं स्यात् = एवं न भवेत्, रक्ष भो रक्ष जगदीश्वर = पाहि परमेश्वर, अथवा = उद्वा, सम्बोभवतीतितमाम् = अतिशयने सम्भाव्यते, एवमपि = ईदृशमपि, योऽयम्, अपजलखानः = तत्सेनापतिः, सेनापतिपदविडम्बनः = चमूपतिपदविडम्बनः, अपि, शिवेन = महाराष्ट्राधीश्वरेण, योत्स्ये = युद्धं करिष्यामि, हनिष्यामि = मारयिष्यामि, ग्रहीष्यामि वा = बन्दीकरिष्यामि वा, इति = एवं, सप्रौढ़ि = दृढं, विजयपुराधीशमहासभायां = शाइस्ताखानमहासभायां, प्रतिज्ञाय = प्रतिज्ञां कृत्वा, समायातो = आगतोऽपि, शिवप्रतापं = शिववीरप्रभावं, विदन्नपि = जानन्नपि, अद्य नृत्यम्, अद्य गानं = गीतम्, अद्य लास्यं = दैशिकनृत्यम्, अद्य मद्यं = सुरापानम्, अद्य वाराङ्गना = वेश्या, अद्य भ्रकुंसकः = स्त्रीवेषधारीनर्तकः, अद्य वीणावादनं = सितारवादनम्, इति, स्वच्छन्दैः = उन्मुक्तैः, उच्छृङ्खलाचरणैः = असदाचरणैः, दिनानि = दिवसान्, गमयति = यापयति।

गद्यांशव्याख्या – अफजलखानशिविरस्य वर्णनप्रसङ्गे – कुत्रचित् अहो! महाराष्ट्रदेशस्थ दुर्गमता, महाराष्ट्रवासिनां दुरभिभवनीयता, अहो! शिववीरस्य बलशालिता, अहो! शिववीरसैनिकानां निर्भीकता, अहो! शिववीरस्य अश्वानां क्षिप्रगतिः, अहो ! किं वदामः? शिववीरस्य कृपाणस्य चाकचिक्यम् अवलोक्यैव वयं यवनसैनिकाः धैर्यं धर्त्तुं न शक्नुमः। युद्धस्थाने चापि स्थातुम् असमर्थाः भवामः। कः एतादृशः द्विशिरः, यः शिववीरेण सह युद्धं कर्तुं शक्नुयात्? कश्च द्विपृष्ठः सैनिकः, यः शिवसैनिकैः सह कपटवार्त्तां कुर्यात्? वयं यवनसैनिकाः यद्यपि बलशालिनः तथापि न जानीमः यत् किमर्थं हृदयं कम्पते क्षुब्धश्च भवति। ''यवनानां पराजयो भविष्यति, अफजलखानश्च घातितो भविष्यति'' न ज्ञायते एवं प्रकारेण कर्णयोः कः शनैः शनैः वदति? समक्षञ्च लिखतीव तथा हृदये प्रसारयतीव न एतत् कदापि भविष्यति। हे परमेश्वर! रक्ष। अथवा एवमपि भवितुं शक्नोति यतोहि सेनापतिपदमलङ्कुर्वता अनेन अफजलखानेन विजयपुराधीश्वरस्य सभायां – ''शिववीरेण सह युद्धं करिष्यामि, मारयिष्यामि बन्दीकरिष्यामि वा'' एवं दृढप्रतिज्ञां कृत्वा आगतोऽपि शिववीरस्य प्रभावं जानन्नपि ''अद्य नृत्यम्, अद्य गीतम्, अद्य दैशिकनृत्यम्, अद्य सुरापानम्, अद्य वेश्या, अद्य स्त्रीवेषधारी नर्तकः, अद्य वीणावादनम्'' इति उन्मुक्तैः असदाचरणैः दिवसान् यापयति।

विशेषः – दुराधर्षता – दुर्+आ+धृष्+त।
धर्त्तुम् – धृ+तुमुन्।
योद्धुम् – युध्+तुमुन्।
अस्माकीना – अस्माकं+ख+टाप् (ईन)।
योत्स्ये – युध्+लृट्।
हनिष्यामि – हन्+लृट्।
ग्रहीष्यामि – ग्रह्+लृट्।
प्रतिज्ञाय – प्रति+ज्ञा+ल्यप्।

समायात: – सम्+आ+या+क्त (पुं०)

विदन् – विद्+शतृ।

मूलम् – **न च य: कदापि विचारयति, यत् कदाचित् परिपन्थिभि: प्रेषिता काचन वारवधूरेव मामासवेन सह विषं पाययेत्, कोऽपि नट एव ताम्बूलेन सह गरलं ग्रासयेत्, कोऽपि गायक एव वा वीणया सह खड्गमानीय खण्डयेदित्यादि; ध्रुव एव तस्य विनाश:, ध्रुवमेव पतनं ध्रुवमेव च पशुमारं मरणम्। तन्न वयं तेन सह जीवन-रत्नं हारयिष्याम:'' – इति व्याहरत:; इतरांश्च –**

''मैवं भो:! श्व एव आहव-क्रीडाऽस्माकं भविष्यति, तत् श्रूयते सन्धिवार्त्ता-व्याजेन शिव एकत आकारयिष्यते, यावच्च स स्वसेनामपहाय एकाकी अस्मत्स्वामिना सहाऽऽलपितुमेकान्तस्थाने यास्यति; तावद्वयं श्येना इव शकुनिमण्डले महाराष्ट्रसेनायां, छिन्धि भिन्धि इति कृत्वा युगपदेव पतिष्याम:, वसन्त-वाताहत-नीरसच्छदानिव च क्षणेन विद्रावयिष्याम:।

प्रसङ्ग: – अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन अफजलखानस्य असावधानताया: वर्णनं कृतमस्ति।

पर्यायशब्दा: – न च, य: = अफजलखान:, विचारयति = चिन्तयति, कदापि = यत्, कदाचित् = क्वचित्, परिपन्थिभि: = शत्रुभि:, प्रेषिता = प्रेरिता, काचन = कापि, वारवधू: = वाराङ्गना, एव, माम् = अफजलखानम्, आसवेन = मद्येन, सह, विषं = गरलं, पाययेत् = पानं कारयेत्, कोऽपि = कश्चन, नट एव = नर्त्तक एव, ताम्बूलेन सह, गरलं = विषं, ग्रासयेत् = भक्षयेत्, कोऽपि = कश्चन, गायक: = गीतकार:, एव, वा = अथवा, वीणया = वाद्यविशेषेण, सह, खड्गं = कृपाणम्, आनय = नीत्वा, खण्डयेत् = खण्डखण्डं कुर्यात्, इत्यपि, ध्रुव एव = निश्चितमेव, तस्य = अफजलखानस्य, विनाश: = मरणं, पशुवत् मरणं, ध्रुवमेव = निश्चितमेव, पतनं = पराजय:, ध्रुवमेव च, पशुभारं = पशुवत्, मरणं = वध:। तत् = तस्मात्, न, वयं = सैनिका:, तेन = अफजलखानेन, सह, जीवनरत्नं = बहुमूल्यजीवितं, हारयिष्याम:, इति = एवं, व्यवहारत: = व्यवहारं कुर्वत:, इतरांश्च = अन्यांश्च – 'मैव', भो: = एवं, मा दद, श्व एव = आगामिदिने एव, अस्माकं = यवनानां, आहवक्रीडा = युद्धक्रीडा, भविष्यति = भविता, तत्, श्रूयते = निशम्यते, सन्धिवार्ताव्याजेन = मेलालापछलेन, शिव: = शिववीर:, एकत: = एकस्मिन्, आकारयिष्यते = आमन्त्रयिष्यते, यावत् = यदा च, स: = शिव:, स्वसेनां = निजपातिकिनीम्, अपहाय = त्यक्त्वा, एकाकी = केवल:, अस्मत्स्वामिना = मत्प्रभुणा, सह, आलपितुं = वार्तां कर्तुम्, एकान्तस्थाने = रहसि, यास्यति = गमिष्यति, तावद् = तदा, वयं = यवनसैनिका:, श्येना इव = वाजपक्षिण इव, शकुनिमण्डले = पक्षिमण्डले, महाराष्ट्रसेनायां = शिवसैनिकेषु, छिन्धि = कर्त्तय, भिन्धि = भेदय, इति = एवं, कृत्वा, युगपदेव = सहैव, पतिष्याम: = आक्रमिष्याम:, वसन्तवाताहतनीरसच्छदानिव = वसन्तवाताभिधातशुष्कपत्राणीव, च, क्षणेन = अत्यल्पकालेन, विद्रावयिष्याम:।

गद्यांशव्याख्या – अफजलखान: एतत् कदापि न चिन्तयति स्म यत् कदाचित् शत्रुभि: प्रेषिता कापि वाराङ्गना मां मद्येन सह विषपानं कारयेत्। कश्चन नर्त्तक एव ताम्बुलेन सह विषं भक्षयेत्। कश्चन गायक: एव वीणावाद्ययन्त्रस्य व्याजेन कृपाणमानीय खण्डं खण्डं कुर्यात्। अस्य अफजलखानस्य मरणं निश्चितमेव, अस्य पराजय: ध्रुवमेव पशुवत् मरणञ्च निश्चितमेव। अत: वयम् अनेन सह स्वबहुमूल्यजीवनं न नाशयिष्याम: केचित् एवं विधवार्तालापं कुर्वन्त: अन्ये च ''एवंन व क्तव्यम्।भ ो:श्व ए वास्माकंय ुद्धक्रीडाभ विष्यति।श्र ूयतेय त्ए तस्मात्प क्षात् शववीर:स न्धिवार्तार्थम् आमन्त्रयिष्यते। पुनश्च यदैव शिववीर: स्वसेनां विहाय अफजलखानेन सह वार्तां कर्त्तुम् एकान्ते आगमिष्यति, तदैव वयं यवनसैनिक: श्येन इव पक्षिमण्डलवत् शिवसैनिकेषु युगपदेव आक्रमिष्याम: तथा च वसन्तवार्ताभिघातशुष्कपत्राणीव अल्पकालेनैव हनिष्याम:। कर्त्तय भेदय चेति उक्त्वा।

विशेषः – पाययेत् = पा+णिच्+लिङ्।

आनीय = आ+णीञ्+ल्यप्।

हारयिष्यामः – हृ+विच्+लृट्।

आलपितुम् – आ+लप्+तुमुन्।

छिन्धि = छिदिर्+लोट्।

भिन्धि = भिदिर्+लोट्।

विद्रावयिष्यामः = वि+द्राव्+लृट्

मूलम् – इतस्तु छलेनाऽस्मत्वस्वामिसहचराः शिवं पाशैर्बद्ध्वा पिञ्जरे स्थापयित्वा तं जीवन्तमेव वंशवदं करिष्यन्ति। परन्तु गोप्यतमोऽयं विषयो मा स्म भूत् कस्यापि कर्णगतः – इति कर्णान्तिकं मुखमानीयोत्तरयतः सांग्रामिक-भटानवलोकयन्; ''धन्या भवन्तो येषां गोप्यतमा अपि विषया एव वीथिषु विकीर्यन्ते। महाराष्ट्रा धूर्ताचार्याः, नैतेषु भवतां धूर्तता सफला भवति'' इत्यात्मन्येवाऽऽत्मना कथयन्, स्वप्रभाधर्षित-सकल-रक्षकगणः स्वसौन्दर्येणाऽऽकर्षयन्निव विश्वेषां मनांसि, सपद्येव प्रधान-पट-कुटीर-द्वारमाससाद। तत्र च प्रहरिणमालोकयदुक्तवांश्च यत् पुण्यनगर-निवासी गायकोऽहमत्र भवन्तं गान-रसायनैरमन्दमानन्दयितुमिच्छामीति। तदवगत्य स भ्रूसंचारेण कञ्चित् निवेदकं सूचितवान्। स चान्तः प्रविश्य, क्षणानन्तरं पुनर्बहिर्निर्गत्य गायकमपृच्छत् – किं नाम भवतः? पूर्वञ्च कदाऽपि समायातो न वा? अथ स आह – ''तानरङ्गनामाऽहं कदाचन युष्मत्कर्णमस्पृशम्। न पूर्वं कदाऽपि ममात्रोपस्थातुं संयोगोऽभूत्, अद्य भाग्यान्यनुकूलानि चेत्, श्रीमन्तमवलोकयिष्यामि इति। स च 'आम्' इत्युदीर्य पुनः प्रविश्य क्षणानन्तरं निर्गत्य च, विचित्र-गायकममुं सह निनाय।

प्रसङ्गः – अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन अफजलखानस्य शिविरे क्रियमाणायाः शिववीरस्य ग्रहणयोजनायाः वर्णनं कृतमस्ति।

पर्यायशब्दाः – इतस्तु = मत्पक्षे, तु, छलेन = कपटेन, अस्मत् स्वामिसहचराः = मत्, प्रभुसैनिकाः, शिवं = शिववीरं, पाशैः = जालैः, बद्ध्वा = आबद्ध्य, पिञ्जरे = पञ्जरे, स्थापयित्वा = निक्षिप्य, तं = शिववीरं, जीवन्तमेव = अमृतमेव, वंशवदं = स्ववंशं, करिष्यन्ति = विधास्यन्ति। परन्तु = किन्तु, गोप्यतमः = अतिगोप्यः, अयम् = एषः, विषयः = वृत्तान्तः, मास्म भूत् = न स्यात्, कस्यापि = अन्यस्य कस्यचिदपि, कर्णगतः = श्रोत्रलभ्यः, इति = एवं, कर्णान्तिकं = श्रोत्रसमीपं, मुखम् = आननम्, आनीय = नीत्वा, उत्तरयतः = प्रतिवदतः, सांग्रामिकभटान् = सैनिकान्, अवलोकयन् = पश्यन्, धन्याः = साधूवादार्हाः, भवन्तः = यवनाः, येषां, गोप्यतमाः = अतिशयेन गोप्याः, अपि, विषयाः = वार्ताः, एवं, वीथिषु = मार्गेषु, विकीर्यन्ते = प्रसार्यन्ते। महाराष्ट्राः = शिवसैनिकाः, धूर्ताचार्यः = अतिमायाविनः, एतेषु = महाराष्ट्रेषु, भवतां = यवनानां, धूर्तता = कपटाचारिता, सफला = सिद्धा, न, भवति। इति = एवम्, आत्मनि = स्वस्मिनि, एव, स्वेन, कथयन् = उच्चरन्, स्वप्रभाघर्षितसकलरक्षकगणः = निजतेजस्तर्षित-समस्तरक्षकमण्डलः, स्वसौन्दर्येण = निजकान्त्या, आकर्षयन्निव = वशीकुर्वन्निव, विश्वेषां = समेषां, मनांसि = चेतांसि, सपद्येव = तत्क्षणमेव, प्रधानपटकुटीरद्वारं = मुख्यपटकुटीरद्वारम्, आससाद = प्राप्तवान्, च, यत् पुण्यनगरनिवासी = पूनापत्तनवास्तव्यः, गायकोऽहं = गीतकारोऽहम्, अत्रभवन्तं = श्रीमन्तम्, अफजलखानं, गानरसरसायनैः = गीतनिष्यन्दरसायनैः, अमन्दम् = अतिशयम्, आनन्दयितुं = सुखयितुम्, इच्छामि = अभिलषामि, इति। तदवगत्य = तज्ज्ञात्वा, सः प्रहरी, भ्रूसञ्चारेण = भ्रूसंकेतेन, किञ्चित्, निवेदकं = सन्देशहरं, सूचितवान् = कथितवान्। सः = सन्देशहरः, च अन्तः प्रविश्य = संप्रविश्य, क्षणानन्तरं =

किञ्चित्कालानन्तरं, पुनः = भूयः, बहिर्निर्गत्य = बहिरागत्य, गायकं = तानरंगम्, अपृच्छत् = पप्रच्छ, किं नाम भवतः = तव किं नामेति? पूर्वञ्च = एतत् पूर्वमपि, कदापि = कदाचन, समायातः = समागतः न वा? अथ = तदा, सः = तानरंगः, आह = उवाच, - तानरङ्गनामाहं - मम नाम तानरंगोऽस्ति, कदाचन, युष्मत् कर्णः = भवत् श्रोत्रम्, अस्पृशं = स्पर्शः जातः। पूर्वं = प्रथमं, कदापि, मम = तानरंगस्य, अत्र = शिविरे, उपस्थातुम् = आगन्तुं, संयोगः = अवसरः, न, अभूत् = अभवत्। अद्य, भाग्यानुकूलानि = अनुकूलप्रारब्धानि, चेत् = यदि, श्रीमन्तम् = अफजलखानम्, अवलोकयिष्यामि = द्रक्ष्यामि इति। सः निवेदकः, आम् = युक्तम्, इति = एवम्, उदीर्य = उक्त्वा, पुनः = भूयः, प्रविश्य = प्रवेशं कृत्वा, क्षणानन्तरं = किञ्चित्कालानन्तरं, निर्गत्य = बहिरागत्य, च, विचित्रगायकं = तानरंगम्, अमुम् = इमं, सह = साकं, निनाय = प्रवेशयामास।

गद्यांशव्याख्या - शिववीरस्य ग्रहणयोजनायाः उद्घाटनं कुर्वद्भिः अफजलखानसैनिकैः उक्तम् - अत्र तु कपटेन अस्माकं स्वामिनः अफजलखानस्य सैनिकाः शिववीरं जालैः आबद्ध्य पिञ्जरे निक्षिप्य जीवन्तमेव स्ववशं करिष्यन्ति। परन्तु अतिगोपनीयोऽयं वृत्तान्तः कस्यापि अन्यस्य कर्णगतः न भवेत् इति श्रोत्रसमीपं मुखं कृत्वा प्रतिवदतः सैनिकान् पश्यन् - "धन्याः भवन्तः यवनाः, येषां गोप्याः अपि विषयाः एवं प्रकारेण मार्गेषु प्रसार्यन्ते। महाराष्ट्राः शिवसैनिकाः अतिधूर्ताः, तेषु भवतां कपटाचारणं सफलं न भविष्यति, इति आत्मनि एव उच्चरन् निजतेजस्तर्षितसमस्तरक्षकमण्डलः निजकान्त्या सर्वेषां चेतांसि वशीकुर्वन्निव शीघ्रमेव, मुख्यपटकुटीरद्वारं प्राप्तवान्। तस्मिन् स्थाने स्थितं रक्षकं दृष्ट्वा उक्तवान् च - पुण्यनगरनिवासी गीतकारः अहम्। अत्र श्रीमन्तम् अफजलखानं गीतरसरसायनैः अत्यन्तं सुखयितुम् इच्छामि इति। एतच्छ्रुत्वा सः रक्षकः भ्रूसंकेतेन किञ्चित् सन्देशवाहकं सूचितवान्। सः सन्देशवाहकः अन्तः गत्वा किञ्चित्कालानन्तरं पुनः बहिरागत्य तं तानरङ्गं पृष्ट्वान् - भवतः नाम किम्? इतः पूर्वमपि कदापि समागतः न वा? तदा सः तानरङ्गः उक्तवान् - तानरङ्गः मम नाम अस्ति। पूर्वं कदाचित् एव इदं नाम भवतः कर्णयोर्मध्ये गतं स्यात्। इतः पूर्वं मम अत्र आगन्तुं संयोगः न अभूत्। अद्य भाग्यानुकूलकारणात् प्रतीयते यत् श्रीमन्तम् अफजलखानं द्रक्ष्यामि। सः च रक्षकः "आम्" इत्युक्त्वा पुनरन्तः प्रविश्य क्षणानन्तरं बहिरागत्य च विचित्रगायकं तं तानरङ्गम् आत्मना सह अन्तः प्रवेशं कारितवान्।

विशेषः - वंशवदम् - वश+खच्-मुम्+वद्+अच् (द्वि०वि०, एकवचनम्)।
उत्तरयतः - उद्+तर्+शतृ, (द्वि०वि०, बहुवचनम्)।
अवलोकयन् - अव+लोक+शतृ।
आकर्षयन् - आ+कृष्+शतृ।
आससाद - आ+षद्+लिट्।
उक्तवान् - वच्+क्तवतु - पुल्लिङ्गे।
उपस्थातुम् - उप+स्था+तुमुन्।
निर्गत्य - निर्+गम्+ल्यप्।
निनाय - णी+लिट्।

मूलम् - तानरङ्गस्तु तेनैव तानपुरिका-हस्तेन बालकेनाऽनुगम्यमानः, शनैः शनैः प्रविश्य, प्रथमं द्वितीयं तृतीयञ्च द्वारमतिक्रम्य, कांश्चित् मृदङ्गस्वरान् सन्दधतः, कांश्चिद् वीणावरणमुन्मुच्य, प्रवालं प्रोञ्छ्य च, कोणं कलयतः कांश्चिदविचलोऽयमेतेनैव सह योज्यन्तामपरवाद्यानीति वंशीरवं साक्षीकुर्वतः, कांश्चित् कलित-नेपथ्यान्, पादयोर्नूपुरं बध्नतः, कांश्चित् स्कन्धावलम्बिगुटिकातः करतालिकामुत्तोलयतः; कांश्चिच्च कर्णे दक्षकरं निधाय, चक्षुषी सम्मील्य, नासामाकुञ्चय,

पातितोभयजानु उपविश्य, वामहस्तं प्रसार्य, तन्त्रीस्वरेण स्व-काकलीं मेलयतः; सम्मुखे च पृष्ठतः पार्श्वतश्चोपविष्टैः कैश्चित् ताम्बूलवाहकैः, अपरैर्निष्ठ्यूतादान-भाजन-हस्तैः, अन्यैरनवरत-चालितचामरैः, इतरैर्बद्धाञ्जलिभिर्लालाटिकैः परिवृत्तं, रत्नजटितोष्णीषिकामस्तकं, सुवर्ण-सूत्र-रचित-विविध-कुसुम-कुड्मल-लताप्रतानाङ्कितकञ्चुकं महोपबर्हमेकं क्रोडे संस्थाप्य, तदुपरिसन्धारित-भुजद्वयं, रजतपर्य्यङ्के विविधफेन-फेनिल-क्षीरधि-जलतलच्छविमङ्गीकुर्वत्यां तूलिकायामुपविष्ट-मपजलखानं च ददर्श।

प्रसङ्गः – अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन अफजलखानस्य सभायां स्थितिः वर्णिता विद्यते।

पर्यायशब्दाः – तानरंगः = गौरसिंहः, तु, तानपूरिकाहस्तेन = गृहीततानपूरिकेण, तेनैव = पूर्वोक्तेनेव, बालकेन = कुमारेण, अनुगम्यमानः = अनुसृतः, शनै-शनैः = क्रमशः, प्रविश्य = प्रवेशं कृत्वा, प्रथमं द्वितीयं तृतीयञ्च = प्रथमतः आरभ्य तृतीययावत्, द्वारं = कुटीरास्यम्, अतिक्रम्य = पारेगत्वा, कांश्चित्, मृदङ्गस्वरान् = मृदङ्गरवान्, सन्दधतः = सन्धानं कुर्वतः, कांश्चिद्, वीणावरणं = वीणाच्छादनम्, उन्मुच्य = अपहातय, प्रवालं = वीणादण्डं, प्रोञ्छ य = अमलीकृत्य, कोणं = वादनोपयोगिनमुपकरणविशेषं, कलयतः = धारयतः, कांश्चिद्, अविचलोऽयं = स्थिरोऽयम्, एतेनैव = अनेनैव, सह = समं, योज्यन्तां = सम्मेलय, अपरवाद्यान् = अन्यवाद्यान्, इति, वंशीरवं = वेणुदण्डिकास्वरं, साक्षीकुर्वतः = साक्षाद्दर्शिता नयतः, कांश्चित्, कलितनेपथ्यान् = धृतवेषान्, पादयोः = चरणयोः, नूपुरं = ध्वनिकारक चरणाभरणं, बध्नतः = धारयतः, कांश्चित्, स्कन्धावलम्बिगुटिकातः = अंसावलम्बितझोलिकातः, करतालिकां = वाद्यविशेषम्, उत्तोलयः = निष्काषयतः, कांश्चिद्, कर्णे = श्रोत्रे, दक्षकरं = सव्यहस्तं, निधाय = निक्षिप्य, चक्षुषी = नयने, सम्मील्य = मीलयित्वा, नसं = घ्राणम्, आकुञ्च य = संकोचितं, कृत्वा, पतितोभयजानुः = भूमौस्थापितजानुद्वयम्, उपविश्य = स्थित्वा, वामहस्तं = सव्येतरकरं, प्रसार्य = उत्फाल्य, तन्त्रीस्वरेण = वीणारवेण, स्वकाकलीं = निजसूक्ष्मकलं, मेलयतः = संयोजयतः, सम्मुखे = अभिमुखे, च, पृष्ठतः = विपरीततः, पार्श्वतश्च = समीपतश्च, उपविष्टैः = आसनस्थैः, कैश्चित् = ताम्बूलवाहकैः = ताम्बूलधारकैः, अपरैः = अन्यैः, निष्ठ्यूतादानभाजनहस्तैः = पतद्ग्रहपात्रहस्तैः, अन्यैः = अपरैः, अनवरतचालितचामरैः = सततसंचालितचामरैः, इतरैः = अन्यैः, बद्धाञ्जलिभिः = सम्पुटितकरैः, लालाटिकैः = प्रभोर्भालदर्शिभिः, परिवृत्तं = परितः, व्याप्तं, रत्नजटितोष्णीषिकामस्तकं = रत्नसम्पूरितटोपिकाधारिणं, सुवर्णसूत्रेण = सुवर्णतन्तुना, रचिता या विविधाः = अनेकप्रकाराः, कुसुमकुड्मललताः = पुष्पकलिकावल्लयः, तासां प्रतानैः = वितानैः, अङ्कितः = अञ्चितः, कञ्चुकः = निचोलः, यस्य सः तं; महोपबर्हमं = महोपधानम्, एकं, क्रोडे = अङ्के, निधाय = संस्थाप्य, तदुपरि = उपधानोपरि, सन्धारितभुजद्वयं = स्थापितकरद्वयं, रतजपर्यङ्के = रजतनिर्मिते पर्यङ्के, विविधफेनेन = प्रचुरडिण्डीरेण, फेनिलस्य = फेनयुक्तस्य, क्षीरधिजलतलस्य = समुद्रसलिलतलस्य, छविं = शोभाम्, अङ्गीकुर्वत्यां = धारयन्त्यां, तूलिकायां = तुलमये विष्टरे, उपविष्टं = स्थितम्, अपजलखानं = यवनसेनापतिं, च, ददर्श = दृष्टवान्।

गद्यांशव्याख्या – गौरसिंहः तु तानरङ्गगायकरूपेण अफजलखानसभां कथं प्रविष्टवान् इति वर्णयति यत् तानरङ्गः गृहीततानपूरिकेण तेनैव बालकेन अनुकुर्वन् शनैः शनैः प्रवेशं कृत्वा क्रमशः प्रथमं, द्वितीयं तृतीयं च द्वारम् अतिक्रम्य कांश्चित् मृदङ्गरवस्य सन्धानं कुर्वतः, कांश्चित् वीणाच्छादनम्, उन्मुच्य वीणादण्डम् अमलीकृत्य कोणं धारयतः, कांश्चित् स्थिरोऽयम् अनेनैव सह सम्मेलय अन्यवाद्यान् इति वेणुदण्डिकास्वरं साक्षीकुर्वतः, कांश्चित् धृतवेषान् चरणयोः नूपुरं धारयतः, कांश्चित् स्कन्धावलम्बितस्यूततः करतालिकां निष्कासयतः, कांश्चित् कर्णे दक्षिणहस्तं निधाय नयनद्वयं सम्मील्य नासिकाम् आकुञ्च य, भूमौ स्थापितजानुद्वयेन उपविश्य वामहस्तं प्रसार्य वीणास्वरेण निजकण्ठस्वरं

संयोजयत:,अ भिमुखेच प ृष्ठत:प ार्श्वतश्चउ पविष्टै:कै श्चित्त ाम्बुलधारकै:अ न्यैश्चा नष्ठ्यूतादानभाजनहस्तै:,अ न्यै: सततसंचालितचामरै:, अन्यैश्च सम्पुटितहस्तै: लालाटिकै: परिवृतं रत्नयुक्तटोपिकाधारिणं सुवर्णतन्तुना रचिता: अनेकप्रकारका: पुष्पकुड्मलवल्लिवितानाङ्कितकञ्चुक: एकं महोपधानं क्रोडे संस्थाप्य उपधानोपरि स्थापितकरद्वयं रजतनिर्मितपर्यङ्के विविधफेनेन फेनयुक्तस्य समुद्रसलिलतलस्य शोभां धारयन्त्यां तूलिकायाम् उपविष्टम् अफजलखानं दृष्टवान्।

विशेष: – अतिक्रम्य – अति+क्रमु+ल्यप्।

अनुगम्यमान: – अनु+गम्+यक्+शानच्।

उत्तोलयत: = उद्+तुल्+शतृ।

प्रसार्य = प्र+सृ+णिच्+ल्यप्।

उपविष्ट: = उप+विश्+क्त।

संस्थाप्य = सम्+स्था+ल्यप्।

अङ्गीकुर्वत्याम् = अङ्ग+च्वि+कृ+शतृ+ङीष् (स०वि०एकवचन)।

ददर्श– दृश्+लिट् (तिप्)।

मूलम् – ततस्तु तानरङ्गप्रभा-वशीभूतेन सर्वेषु 'आगम्यतामागम्यतामास्यतामास्यताम्' इति कथयत्सु, तानरङ्गोऽपि सादरं दक्षिणहस्तेनाऽऽदरसूचकसङ्केत-सहकारेण यथानिर्दिष्टस्थानमलञ्चकार।

ततस्तु इतरगायकेषु सगर्वं सासूयं सक्षोभं साक्षेपं सचक्षुर्विस्फारणं सशिर: परिवर्तनं च तमालोकयत्सु अपजलखानेन सह तस्यैवमभूदालाप:।

अपजलखान: – किन्देशवास्तव्यो भवान्?

तानरङ्ग: – श्रीमन्! राजपुत्रदेशीयोऽहमस्मि।

अपजलखान: – ओ:! राजपुत्रदेशीय:?

तानरङ्ग: – आम्! श्रीमन्!

अपजलखान: – तत् कथमत्र महाराष्ट्रदेशे?

तानरङ्ग: – सेनापते! मम देशाटन-व्यसनं मां देशाद्देशं पर्याटयति।

अपजलखान: – आ:! एवम्! तत्किं प्राय: पर्य्यटति भवान्?

तानरङ्ग: – एवं चमूपते! नव्यान् देशानवलोकयितुं, नवा नवा भाषा भाषा अवगन्तुं नूतना नूतना गान-परिपाटीश्च कलयितुम् एधमानमहाभिलाष एष जन:।

अपजलखान: – अहो! ततस्तु बहुदर्शी बहुज्ञश्च भवान्। अथ बङ्गदेशे गतो भवान्? श्रूयतेऽतिवैलक्षण्यं तद्देशस्य।

प्रसङ्ग: – अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन तानरङ्गरूपेण विद्यमान-गौरसिंहाफजलखानयोर्मध्ये सञ्जातवार्तालापस्य वर्णनं कृतमस्ति।

पर्यायशब्दा: – तत: = तदनन्तरं, तु, तानरङ्गप्रभाववशीभूतेषु = गायकदीप्तिस्तब्धीभूतेषु, सर्वेषु = निखिलेषु, आगम्यताम् = आगच्छतु आस्यताम् = उपविशतु, इति = एवं, कथयत्सु = वदत्सु, तानरङ्गोऽपि – गायकोऽपि, सादरम् = आदरपूर्वकं, दक्षिणहस्तेन = सव्यकरेण, आदरसूचकसंकेतसहकारेण = सम्मानसूचकसंकेतेन सह, यथानिर्दिष्टं = संकेतानुसारं, स्थानम्, अलञ्चकार = शोभितवान्। ततस्तु = तदातु, इतरगायकेषु = अन्यगायकेषु, सगर्वं = साभिमानं,

सासूयं = सेर्ष्यं, सशोभं = क्षोभयुक्तं, साक्षेपम् = आक्षेपेण सह, स चक्षुर्विस्फारणं = स नेत्रस्फालनं, सशिर: परिवर्तनं = सशिर: कम्पनं, च, तं = तानरङ्गम्, आलोकयत्सु = पश्यत्सु, अफजलखानेन = सेनापतिना, सह, तस्य = तानरङ्गस्य, एवम् = इत्थम्, आलाप: = वार्तालाप:, अभूत् = अभवत्।

अपजलखान: – किन्देशो वास्तव्यो भवान् = कस्मिन् देशे निवसति?

तानरंग: – श्रीमन् = भगवन्, राजपुत्रदेशीयोऽहमस्मि = राजपुत्रदेशवास्तव्योऽहम्।

अपजलखान: – ओ:, राजपुत्रदेशीय: = राजपुत्रदेशे वससि त्वम्।

तानरंग: – आम्, श्रीमन्! बाढं, भगवन्!

अपजलखान: – तत्कथमत्र महाराष्ट्रदेशे = तर्हि कस्मादस्मिन् देशे आगत:?

तानरंग: – सेनापते= च मूपते !म म= त ानरंगस्य,द`शाटनव्यसनं= द`शभ्रमणस्वभाव:,म ांद`शाद्देशं= देशदेशान्तरं, पर्यटयति = भ्रमयति।

अपजलखान: – आ! एवं! तत्किं प्राय: पर्य्यटति भवान् = तत्केन कारणेन परिभ्रमति भवान्?

तानरंग: – एवं चमूपते! नव्यान् देशान् = नवानि स्थानानि, नवा नवा, भाषा: = नूतना: वाणी:, अवगन्तुं = ज्ञातुं, नूतना नूतना गानपरिपाटी: = अभिनवज्ञानविधि:, कलयितुं = साधयितुम्, एधमानमहाभिलाष: = एधमान = वृद्धिगच्छन्, महान् अभिलाष: = इच्छा यस्य स:, एष: = अयं, जन: = नर:।

अपजलखान: – अहो ततस्तु = तदा तु, बहुदर्शी = बह्वालोकयिता, बहुश: = बहूनां विषयस्य ज्ञाता, भवान् = तानरङ्ग:। अथ = किं, बङ्गदेशे = बंगालनाम्निदेशे, गत: = भ्रमित:, भवान्? श्रूयते = आकर्ण्यते, अतिवैलक्षण्यं = अतिवैचित्र्यं, तद्देशस्य = बंगदेशस्य।

गद्यांशव्याख्या – तदनन्तरं तु तानरङ्गस्य प्रभावेण स्तब्धीभूतेषु सर्वेषु "आगच्छतु, उपविशतु" इति वदत्सु सभात्सु सदस्येषु तानरङ्गनामकगायक: अपि आदरपूर्वकं दक्षिणहस्तेन सम्मानसूचकसंकेतेन सह यथानिर्दिष्टं संकेतानुसारं स्थानमलङ्कृतवान्। तदा तु अन्यगायकेषु साभिमानं सासूयं, सक्षोभं, साक्षेपञ्च चक्षुर्विस्फारणं सशिर: कम्पनञ्च तं तानरङ्गं पश्यत्सु सेनापतिना अफजलखानेन सह तानरङ्गस्य इत्थं वार्तालाप: सञ्जात:।

अपजलखान: – भवान् कस्मिन् देशे निवसति?

तानरङ्ग: – भगवन्! राजपुत्रदेशवास्तव्योऽहम्।

अपजलखान: – ओ:! भवान् राजपुत्रदेशे वसति।

तारनङ्ग: – आं। श्रीमन्!

अपजलखान: – एवं चेत् महाराष्ट्रदेशे आगमनं कथम्?

तानरङ्ग: – सेनापते! मम देशभ्रमणस्वभाव एव देशदेशान्तरं भ्रामयति।

अपजलखान: – आ:! एवं! केन प्रयोजनेन परिभ्रमति भवान्?

तानरङ्ग: – चमूपते! नूतनानि स्थानानि नूतना: भाषा: चावगन्तुं नूतनगायनविधिं कलयितुञ्च अयं जन: अधिक: रुचिवान् अस्ति।

अफजलखान: – अरे! तदा तु भवान् बहुज्ञाता बहुद्रष्टा चास्ति। किं बङ्गप्रदेशमपि गतवान् भवान्? श्रूयते यत् स: देश: अतीव विलक्षण: अस्ति।

विशेष: – कथयत्सु = कथ्+शतृ – (सप्तमी विभक्ति:, बहुवचनम्)।

आलोकयत्सु = आ+लोक+शतृ – (सप्तमी विभक्ति:, बहुवचनम्)।

पर्याटयति = परि+आ+अट्+णिच्+लट्।

अवगन्तुम् = अव+गम्+तुमुन्।

एधमान महाभिलाषः = एधमानः महान् अभिलाषः यस्य सः – (बहुव्रीहिः समासः)।

मूलम् – तानरङ्गः – सेनापते! वर्षत्रयात् पूर्वमहं काश्यां गङ्गायां संस्नाय, उज्जयिनीदेशीय-क्षत्रियकुलालंकृतं भोजपुरदेशमालोक्य गङ्गागण्डकतटोपविष्टं हरिहरनाथं प्रणम्य, विलासि-कुल-विलसितं पाटलिपुत्रपुरमुल्लंघ्य सीताकुण्डविक्रमचण्डिकादिपीठपटलपूजितं विक्रमयशःसूचकदुर्गा-वशेषशोभितं देवधुनीतरङ्गक्षालितप्रान्तं मुद्गलपुरं निरीक्ष्य, कर्णदुर्गस्थानेन तद्यशोमहामुद्रयेवा-ङ्कितमङ्गदेशं दिनत्रयमध्युष्य, अतिवर्द्धमानवैभवं वर्द्धमान-नगरं च सम्यक् समालोक्य, यथोचित-सम्भारैस्तारकेश्वरमुपस्थाय, ततोऽपि पूर्वं बङ्गदेशे, पूर्वबङ्गेऽपि च चिरमहमटाट्यामकार्षम्।

प्रसङ्गः – अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन अफजलखानेन कृतप्रश्नस्य उत्तरदानप्रसङ्गे गौरसिंहेन पर्यटितस्थानानां वर्णनं कृतमस्ति।

पर्यायशब्दाः – तानरङ्गः – सेनापते = चमूपते!, वर्षत्रयात् पूर्वं = त्रिवर्षपूर्वम्, अहं = तानरंगः, काश्यां = काशी इत्यत्र, गंगायां = मन्दाकिन्यां, संस्नाय = स्नानं कृत्वा, उज्जयिनीदेशीयक्षत्रियकुलालङ्कृतम् = उज्जैननिवासिक्षत्रियवंशविभूषितं, भोजपुरदेशम् = एतत्प्रदेशम्, आलोक्य = दृष्ट्वा, गंगागण्डक तटोपविष्टं = गंगागण्डकयोः नद्योः पुलिने विराजमानं, हरिहरनाथं = शङ्करं, प्रणम्य = नमस्कृत्य, विलासिकुलविलासितं = विलासिकुलसेवितं, पाटलिपुत्रपुरं = पटनानगरं, उल्लङ्घ्य = लङ्घयित्वा, सीताकुण्डविक्रमचण्डिकादिपीठपटलपूजितं = सीताकुण्डविक्रम-चण्डिकादिदेवस्थानसमूहशोभितं, विक्रमयशः सूचकदुर्गावशेषशोभितं = विक्रमादित्यकीर्तिपरिचायकदुर्गावशेषयुक्तं, देवधुनीतरङ्गक्षालितप्रान्तं = सुसरित्तरङ्गधौत्तप्रदेशं, मुद्गलपुरम् = एतन्नगरं, निरीक्ष्य = समवलोक्य, कर्णदुर्गस्थानेन = कर्णस्य राज्ञः दुर्गस्थानेन, तद्यशोमहामुद्रया = तत्कीर्तिमहामुद्राङ्कनेन, इव, अङ्कितं मुद्रितम्, अङ्गदेशम् = एतद्देशं, दिनत्रयं = त्रीणि दिनानि, अध्युष्य = वासं कृत्वा, अतिवर्द्धमानवैभवम् = अतिशय प्रवर्द्धमानसम्पदं, वर्द्धमाननगरम्, एतन्नामकं नगरं, च सम्यक्, यथाविधि, समालोक्य = दृष्ट्वा, यथोचितसम्भारैः = समुचितसामग्रीभिः, तारकेश्वरम् = एतद्देवम्, उपस्थाय = संपूज्य, ततोऽपि = तस्मादपि, पूर्वं = प्राच्यं, बङ्गदेशे = बङ्गालेति, प्रान्ते, पूर्वबङ्गेऽपि = ततः पूर्वं-पूर्वबङ्गालेऽपि, च चिरं = चिरकालं, यावत्, अहम्, अटाट्यां, पर्यटनम्, अकार्षम् = अकरोम्।

गद्यांशव्याख्या – तानरङ्गः – सेनापते! त्रिवर्षात् पूर्वम् अहं काशीनगर्याः गङ्गानद्यां स्नानं कृत्वा, उज्जयिनीदेशवासिक्षत्रियकुलविभूषितं भोजपुरप्रदेशं दृष्ट्वा गंगागण्डकयोः नद्योः पुलिने विद्यमानं भगवन्तं शङ्करं प्रणम्य विलासिकुलसेवितपाटलिपुत्रनगरं लङ्घयित्वा सीताकुण्डविक्रमचण्डिकादिदेवस्थानसमूहशोभितं विक्रमादित्यकीर्तिपरिचायक दुर्गावशेषयुक्तं सुरसरित्तंरगधौतप्रदेशं मुद्गलनगरं निरीक्ष्य राज्ञः कर्णस्य दुर्गस्थानेन तत्कीर्तिमहामुद्राङ्कनेन इव अङ्कितं अङ्गदेशे त्रीणि दिनानि वासं कृत्वा प्रवर्द्धमानसम्पदमिति वर्द्धमाननगरं सम्यक् अवलोक्य समुचितसामग्रीभिः तारकेश्वरदेवं सम्पूज्य तस्मादपि प्राक् बङ्गाल इति प्रान्ते ततः पूर्वं पूर्वबङ्गालेऽपि चिरकालं यावत् अहं पर्यटनं कृतवान्।

विशेषः – संस्नाय = सन्+ष्ना+ल्यप्।

उज्जयिनीदेशीयक्षत्रिकुलालङ्कृतम् – उज्जयिनी देशीयानां क्षत्रियाणां कुलैः अलङ्कृतम् (तत्पुरुषसमासः)।

विलसितम् – वि+लस्+क्त।

उल्लङ्घ्य – उत्+लङ्घि+ल्यप्।

निरीक्ष्य – निर्+ईक्ष्+ल्यप्।

अध्युष्य – अधि+वस्+ल्यप्।
उपस्थाय – उप+स्था+ल्यप्।

मूलम् – अपजलखानः – किं किं पूर्वबङ्गेऽपि?

तानरङ्गः – आम् श्रीमन्! पूर्वबङ्गमपि सम्यगवालुलोकदेष जनः, यत्र प्रान्तप्ररुढां पद्मावलीं परिमर्दयन्ती पद्मेव द्रवीभूता पयःपूरप्रवाहपरम्पराभिः पद्मा प्रवहति, यत्र ब्रह्मपुत्र इव शत्रुसेनानाशन-कुशलः ब्रह्मदेशं विभजन् ब्रह्मपुत्रो नाम नदी भूभागं क्षालयति, यत्र साम्ल-सुमधुर-रस-पूरितानि फूत्कारोद्धूतभूति-ब लदङ्गार-विजित्वर-वर्णानिजगत्प्रसिद्धानि नारङ्गाण्युद्भवन्ति यद्देशीयानां जम्बीराणां रसालानां तालानां नारिकेलानां खर्जूराणां च महिमा सर्वदेश-रसज्ञानां साम्रेडं कर्णं स्पृशति, यत्र च भयङ्कराऽऽवर्त-सहस्राऽऽकुलामु स्रोतस्वतीषु सहोहोकारं क्षेपणीः क्षिपन्तः, अरित्रं चालयन्तः, बडिशं योजयन्तः, कुवेणीस्थ म्रियमाणमत्स्य-परीवर्त्तानालोकमालोकमानन्दतः, अदृष्टतटेष्वपि महाप्रवाहेषु स्वल्पया कूष्माण्ड-फक्किकाकारया नौकया भिन्नाञ्जनलिप्ता इव मसी-स्नाता इव साकारा अन्धकारा इव काला धीवरबालाः निर्भयाः क्रीडन्ति।

प्रसङ्गः – अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन गौरसिंहस्य मुखात् पूर्वबङ्गप्रदेशस्य चित्रणं कृतमस्ति।

पर्यायशब्दाः – अफजलखानः – किम् = किं कथितं, पूर्वबङ्गेऽपि = पूर्वबङ्गाले गतोऽसि।

तानरंगः – आम् = एवं, श्रीमन् = भगवन्! पूर्वबङ्गमपि = तद्देशमपि, सम्यक् = यथाविधि, अवालुलोकत् = अवलोकयाञ्चकार, जनः = नरः, यत्र = पूर्ववङ्गे, प्रान्तप्ररूढां = तटोपान्तसमुद्भूतां, पद्मावलीं = कमलश्रेणिं, परिमर्दयन्ती = कूर्चन्ती, पद्मेव = श्रीरिव, द्रवीभूता = उपस्नुता, पयःपूरप्रवाहपरम्पराभिः = जलप्रवाहपटलयुक्ताभिः, पद्मा = एष नदी, प्रवहति = वहति, यत्र = बङ्गे, ब्रह्मपुत्र इव = गरलविशेष इव, शत्रुसेनानाशनकुशलः = वैरिपताकिनी विनाशदक्षः, ब्रह्मदेशम् = एतद्देशं, विभजनं = विभागं कुर्वन्, ब्रह्मपुत्रो नाम = एतन्नामः, नदः = विशालानदी, भूभागं = भूमिस्थलं, क्षालयति = सिञ्चति। यत्र = वङ्गे, साम्लसुमधुररसपूरितानि = सुमधुराम्लरसयुक्तानि, फूत्कारेण = मुखवायुना, उद्धूता = उड्डायिता, भूतिः = भस्म, येषां तादृशा ये ज्वलन्तः = प्रकाशमानाः, अङ्गाराः, तेषां, विजित्वराः = जयशीलाः वर्णा येषां तानि, जगत्प्रसिद्धानि = विश्वविख्यातानि, नारङ्गाणि = नानारंगापि, उद्भवन्ति = प्रादुर्भवन्ति, यद्देशीयानां = यद्देशोद्भवानां, जम्बीराणां, रसालानाम् = आम्राणां, तालानां = तालवृक्षाणां, खर्जूराणां = खर्जूरवृक्षाणां, नारिकेलानां = फलविशेषाणां, च, महिमा = गौरवं, सर्वदेशरसज्ञानां = निखिलदेशरसिकानां, साम्रेडं = पुनः-पुनः, कर्णं = श्रोत्रं, स्पृशति = अभिपतति, यत्र वङ्गे, च, भयंकरावर्तसहस्राऽऽकुलासु = भीतिजनकभ्रमिससस्रैस्रोतस्वतीषु = नदीषु, सहोहोकारं = हो हविति शब्दयुक्तं, क्षेपणीः = नौकादण्डान्, क्षिपन्तः = निक्षिपन्तः, अरित्रं = केनिपातकं, चालयन्तः = चालनं कुर्वन्तः, बडिशं = मत्स्यवेधनं, योजयन्तः = संयोजनं कुर्वन्तः, कुवेणीस्थम्रियमाणमत्स्यपरीवर्त्ताना लोकं कुवेण्यां = मत्स्याधान्यां तिष्ठन्ति, ये ते कुवेणीस्थाः म्रियमाणाः = आसन्नमरणाः ये मत्स्यास्तेषां परीवर्त्तान् = पार्श्वपरिवर्तितानि, आलोकं = दर्शम्, आनन्दतः= अ ानन्दंप्रा्रवृत्तः,अ दृष्टतटेष्वपि= अ दृष्टपुलिनेष्वपि,म हाप्रवाहेष्वपि= ६ ाोरप्रवाहेष्वपि,स्व ल्पया= अतिह्स्वया, नौकया = तरणिका, भिन्नाञ्जनलिप्ता इव = पिष्टकज्जल, संलिप्ता इव, मसीस्नाता इव = श्यामलिकासिक्ता इव, साकारा = सशरीरा, अन्धकारा इव, तमांसीव, कालाः = कृष्णाः, धीवरबालाः = धीवरपुत्राः, निर्भयाः = भयरहिताः, क्रीडन्ति = खेलन्ति।

गद्यांशव्याख्या – अफजलखानः – किं, पूर्वबङ्गप्रदेशमपि गतवान् अस्ति?

तानरङ्गः – आम्,श्र ीमन् !प ूर्वबङ्गप्रदेशोऽपिअ नेनज नेनस म्यक्तयाद ृष्टोऽस्ति ात त्रच त टेस मुद्भूतां कमलश्रेणिं कूर्चन्ती श्रीरिव द्रवीभूता जलप्रवाहपटलयुक्ता पद्मा नाम्नी नदी प्रवहति। यत्र ब्रह्मपुत्रः अर्थात् गरलविशेष इव शत्रुसेनाविनाशदक्षः ब्रह्मदेशं विभाजिका ब्रह्मपुत्रनाम्नी विशाला नदी ब्रह्मपुत्रभूभागं सिञ्च ति। यस्मिन् बङ्गप्रदेशे सुमधुराम्लरसयुक्तानि फूत्कारपवनेन उद्धूता भूतिः, यस्याः दीप्ताङ्गारादपि दीप्तवर्णानि, नारङ्गफलानि उद्भवन्ति। यस्मिन् स्थाने उत्पन्नजम्बीर-आम्र-ताल-खर्जूर-नारिकेलवृक्षाणां महिमा सम्पूर्णदेशरसिकानां वार वारं श्रुतिपथि आयाति। यस्मिन् बङ्गे च भयङ्करजलावर्तसहस्राऽऽकुलासु नदीषु "हो हो" इति शब्दयुक्तनौकादण्डान् निक्षिपन्तः अरित्रं चालयन्तः मत्स्यवेधनं सज्जीकुर्वन्तः, जालग्रस्तमरणासन्नमीनानां व्याकुलतां दृष्ट्वा आनन्दिताः, अदृष्टतटेषु अपि घोरप्रवाहेषु अतिह्रस्वया नौकया पिष्टकज्जलसंलिप्ता इव मसीस्नाता इव सशरीरा, अन्धकारा इव कृष्णवर्णाः धीवरपुत्राः निर्भीकाः सन्तः क्रीडां कुर्वन्ति।

विशेषः – अवालुलोकत् = अव+लोक्+लुङ् (तिप्)।

परिमर्दयन्ती = परि+मृद्+णिच्+शतृ+ङीप्।

उद्धूत = उद्+धूञ्+क्त।

स्रोतस्वतीषु = स्रोतस्+मतुप्+ङीप्+सुप्।

क्षिपन्तः = क्षिप्+शतृ+जस्।

मूलम् – अपजलखानः- (स्वयं हसन्, सर्वांश्च हसतः पश्यन्) सत्यं सत्यम्!! धन्यो भवान्, योऽल्पेनैव वयसैवं विदेशं-भ्रमणैः चातुरीं कलयति।

तानरंगः – धन्य एव यदि युष्मादृशैरभिनन्द्ये।

अपजलखानः – (क्षणानन्तरम्) अथ भवान् मूर्छना-प्रधानं गायति, तानप्रधानं वा?

तानरंगः – ईदृक्षं तादृक्षञ्च।

अपजलखानः – (क्षणानन्तरम्) अस्तु, आलप्यतां कश्चन रागः।

तानरंगः – (किञ्चिद् विचार्य) आज्ञा चेदेकां राग-माला-गीतिं गायामि, यत्र प्रत्याभोगं नवीन एव रागो भवेदेकेनैव च ध्रुवेण सङ्गच्छेत्, तत्तद्राग-नामानि च तत्रैव प्राप्येरन्।

अपजलखानः – आः! किमेवम्? ईदृशं तु गानं न प्रायः श्रूयते, तद् गीयताम्।

प्रसङ्गः – अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन अपजलखानतानरङ्गयोः वार्तालापः वर्णितः अस्ति।

पर्यायशब्दाः – अपजलखान – वयम् = अपजलखानः, हसन् = प्रफुल्लन्, सर्वान् = अन्यान्, च, हसतः, पश्यन् = अवलोकयन्, सत्यं सत्यं = समीचीनं, धन्यः = साधुवादार्हः, भवान् = त्वं, यः = तानरंगः, अल्पेनैव = अल्पीयसैव, वयसैवम् = अवस्थयैवं, विदेशभ्रमणैः = देशदेशाटनैः, चातुरीं = कुशलतां, कलयति = धारयति।

तानरंगः – धन्य एव = धन्योऽहं, यदि = चेत्, युष्मादृशैः = भवादृशैः, अभिनन्द्ये = अभिनिन्दतो भवामि?

अपजलखानः – किञ्चित्समयानन्तरम्, अथ, भवान् = तानरंगः, मूर्च्छनाप्रधानम् = आरोहावरोह क्रमयुक्त = स्वरसमूहं, गायति = गानं करोति, वा = अथवा, तानप्रधानं = आरोहक्रमयुक्तस्वरसमूहम्?

तानरंगः – ईदृक्षं = मूर्च्छनाप्रधानं, तादृक्षञ्च = तान प्रधानञ्च।

अपजलखानः – क्षणानन्तरं, अस्तु = युक्तम्, आलप्यताम् = आलापः क्रियतां, कश्चन रागः = किमपि रञ्जकस्वर सन्दर्भः।

तानरंगः – किञ्चिद् विचार्य, आज्ञा चेत् = चेत् आज्ञापयतु भवान्, एकां = केवलां, रागमालागीतिम् = एतन्नाम्नीं

गीतिं, गायामि = गानं करोमि, यत्र = यस्मिन्, प्रत्याभोगं = प्रतिगेयखण्डं, नवीन एव = नूतन एव, राग: = आलाप:, भवेत् = स्यात्, एकेनैव च, ध्रुवेण = स्थिरपदेन, सङ्गच्छेत् = सम्मेल्येत्, तत्तद्रागनामानि = गीतप्रयुक्तप्रतिरागनामानि, च, तथैव = रागैव, प्राप्येरन् = लभेरन्।

अपजलखान: – आ:, किमेवम् = एतदस्ति? ईदृक्षम् = एतद्विधं, तु, गानं = गीतिं, न प्राय: = सामान्यरूपेण, श्रूयते = आकर्ण्यते, तद्, गीयताम् = आलप्यताम्।

गद्यांशव्याख्या – **अपजलखान:** – (स्वयं हसन् अन्यान् हसत: अवलोकयन्) सत्यं, सत्यं, भवान् धन्योऽस्ति। अल्पावस्थायामेव एवं विधविदेशभ्रमणे चातुर्यं प्राप्तवान् अस्ति।

तानरङ्ग: – यदि भवादृशै: जनै: अभिनन्दितो भवामि तर्हि निश्चयेन धन्योऽस्मि।

अपजलखान: – (क्षणानन्तरं) किं भवान् मूर्धनाप्रधानगीतं गायति तानप्रधानं वा?

तानरङ्ग: – एतादृशं तादृशं चापि।

अपजलखान: – (किञ्चित् कालानन्तरं) भवतु, कश्चित् राग: गीयताम्।

तानरङ्ग: – (किञ्चित् चिन्तयित्वा) यदि श्रीमत: अनुमति: स्यात् तर्हि एकां रागमालागीतिं श्रावयामि। यस्या: प्रत्येकं खण्डेऽपि एक: नूतन: एव राग: अस्ति। य: एकेनैव ध्रुवेण सङ्गमिष्यति तथा च सर्वेषां रागाणां नामानि अपि तत्रैव प्राप्तानि भविष्यन्ति।

अपजलखान: – अस्तु, एवमस्ति। एतादृशं गीतं प्राय: न श्रूयते। अत: अवश्यमेव गायतु।

विशेष: – हसन् = हस्+शतृ (प्र०वि०,एकवचनम्)।

पश्यन् = दृश्+शतृ।

विदेशभ्रमणै: = भ्रम्+ल्युट् (तृ०वि०,बहुवचनम्)।

सङ्गच्छेत् = सम्+गम्–विधिलिङ्ग, (प्र०पु०,एकवचनम्)।

मूलम् – ततस्तानपूरिकाया: स्वरान् संमेल्य पातित-वामजानु: तानपूरिकातुम्बं क्रोडे निधाय दक्षपादस्योत्थिजानुनि च दक्ष-हस्त-कर्पूर-स्थापन-पुर:सरं तेनैव हस्तेन तर्जन्यङ्गुल्या तानपूरिकां रणयन् स्वकण्ठे नापि त्रीन् ग्रामान् सप्तस्वरांश्च समधात्।

प्रसङ्ग: – अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन तानरङ्गस्य गानतत्परतां गानवैशिष्ट्यं वा वर्णितमस्ति।

पर्यायशब्दा: – तत: = तदनन्तरं, तानपूरिकाया = वाद्यविशेषस्य, स्वरान् = निषादादीन्, सम्मेल्य = संयोज्य, पातितवामजानु: = भूमिस्थापितदक्षेतरजानु:, तानपूरिकातुम्बं = तानपूरिकाप्रवालं, क्रोडे = अङ्के, निधाय = संस्थाप्य, दक्षपादस्य = सव्यचरणस्य, उत्थितजानुनि, दक्षहस्तकूर्परस्थापनपुर:सरं = दक्षकरकफोणिस्थानपूर्वकं, तेनैव = दक्षिणेनैव, हस्तेन = करेण, तर्जन्यंगुल्या = विशेषैकांगुल्या, तानपूरिकां = वाद्यविशेषं, रणयन् = वादयन्, स्वकण्ठेनाहि = निजोच्चारणनापि त्रीन्, ग्रामान् = षड्जमध्यमगान्धारान्, सप्तस्वरान् = निषादादिसप्तस्वरात्, समधात् = समयोजयत्।

गद्यांशव्याख्या – तदनन्तरं तानरङ्ग: तानपूरिकाया: स्वरान् मेलयित्वा वामं जानु भूमौ निधाय तानपूरिकाया: तुम्बं क्रोडे स्थापयित्वा दक्षिणपादस्य उत्थिते जानुनि दक्षिणहस्तकफोणिं संस्थाप्य तस्य एव हस्तस्य तर्जनी–अङ्गुल्या तानपूरिकां वादयन् स्वकीयकण्ठेन अपि ग्रामत्रयं (षड्जमध्यमगान्धारान्) सप्तस्वरान् च (निषादादि) समायोजयत्।

विशेष: – संमेल्य = सम्+मिल्+णिच्+क्त्वा (ल्यप्)।

निधाय – नि+धा+क्त्वा (ल्यप्)।

समधात् – सम्+धा+लुङ्+तिप्।

पातितवामजानु – पातितं वामजानु येन सः (बहुव्रीहिसमासः)।
उत्थितजानुनि – उत्थितं च तद् जानु उत्थितजानु, तस्मिन् (कर्मधारयसमासः)।

मूलम् – तन्मात्रश्रवणेनैव मुग्धेष्विवाऽखिलेषु इमां रागमाला–गीतिमगायत् –
सखि हे नन्द–तनय आगच्छति॥सखि०॥
मन्दं मन्दं मुरली–रणनैः समधिक–सुखं प्रयच्छति॥
भैरव–रूपः पापिजनानां सतां सुख–करो देवः।
कलित–ललित–मालती–मालिकः सुरवरवाञ्छि त–सेवः॥
सारङ्गैः सारङ्ग–सुन्दरो दृग्भिर्निपीयमानः।
चपला–चपल–चमत्कृति–वसनो विहित–मनोहर–गानः॥
श्रीवत्सेन लाञ्छि तो हृदये श्रीलः श्रीदः श्रीशः।
सर्व–श्रीभिर्युतः श्रीपतिः श्रीमोहनो गवीशः॥
गौरी–पतिना सदा भावितो बर्हिण–बर्ह–किरीटः।
कनककशिपु–कदनो बलिमथनो विहत–दशानन–कीटः॥

प्रसङ्गः – अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन अपजलखानस्य समक्षं तानरङ्गेन आलापितगीतेः वर्णनं कृतमस्ति।

पर्यायशब्दाः – तन्मात्रश्रवणेनैव = रागालापाकर्णनैव, मुग्धेषु = आननन्दितेषु, इव, अखिलेषु = सर्वेषु, इमाम् = एषां, रागमालागीतिं = रागमालागानम्, अगायत् = गानमकरोत् –

हे सखि = हे आलि, नन्दतनयः = नन्दपुत्रः, आगच्छति = आयाति। मन्दं मन्दं = शनैः शनैः, मुरलीरणनैः = मुरलीस्वरैः, समधिकसुखम् = अत्यधिकानन्दं, प्रयच्छति = ददाति। पापिजनानां = दुष्टजनानां, भैरवरूपः = भीषणः, सतां = सज्जनानां, सुखकरः = सुखदः, देवः = कृष्णः। कलितललितमालतीमालिकः = सुन्दरमालतीमालिकया विभूषितः, सुरवरवाञ्छि तसेवः = देवश्रेष्ठेप्सितसेवः, सारंगसुन्दरः = निरंगसुन्दरः, सारंगैः = हरिणैः, दृग्भिः = नेत्रैः, निपीयमानः = दृश्यमानः। चपलाचपलचमत्कृतिवसनः = विद्युदिव चञ्चलचाकचिक्यायितवस्त्रः, विहितमनोहरगानः = सम्पादितचित्ताकर्षकगानः। श्रीवत्सेन = भृगुपदेन, हृदये = वक्षस्थले, लाञ्छि तः = चिह्नितः, श्रीलः = श्रीमान्, श्रीदः = लक्ष्मीप्रदायकः, श्रीशः = लक्ष्म्याधीश्वरः, सर्वश्रीभिः = सर्वाभिः शोभाभिः, श्रीपतिः = लक्ष्मीपतिः, श्रीमोहनः = लक्ष्मीवशीकर्त्तुंशक्तः, गवीशः = वेदाविष्कारकः, जितेन्द्रियः, उद्वा वृन्दावनपशूनां, स्वामी। गौरीपतिना = शङ्करेण, सदा = सर्वदा, भावितः = सेवितः, बर्हिणबर्हकिरीटः = मयूरपिच्छमुकुटः, कनककशिपुकदनः = हिरण्यकशिपुसंहारकः, बलिमथनः = बलिविध्वंसी, विहतदशाननकीटः = नाशितरावणकीटः, (देवः आगच्छति)।

गद्यांशव्याख्या – एतावत् श्रवणमात्रेणैव यदा सर्वे मुग्धाः सञ्जाताः, तदा तानरङ्गेन इयं रागमालागीतिः गीता – हे सखि! नन्दपुत्रः आगच्छति। मन्दं मन्दं मुरलीस्वरैः अत्यधिकम् आनन्दं ददाति। (सः) दुष्टजनेभ्यः भीषणः सज्जनेभ्यश्च सुखदायी अस्ति। सुन्दरमालतीमालिकया विभूषितः अस्ति। सर्वे देवाः तस्य सेवायै इच्छुकाः भवन्ति। कामदेवच्छविरयं मृगैः सानुरागम् एकदृष्ट्या वीक्ष्यमाणो विद्यते। विद्युत् इव चञ्चलचमत्कृतिवसनः मनोहरगाननिरतः चास्ति। भृगुपदेन हृदये चिह्नितः अयं श्रीसम्पन्नः, लक्ष्मीप्रदायकः लक्ष्म्याधीश्वरः सर्वाभिः शोभाभिः लक्ष्मीपतिः लक्ष्मीवशीकर्त्तुं शक्तः, वेदाविष्कारकः वेदवाचाम् इन्द्रियाणां धेनूनाञ्च स्वामी अस्ति। अयं भगवता शङ्करेण सर्वदा सेवितः, मयूरपिच्छमुकुटधर्त्ता, हिरण्यकशिपुसंहारकः, बलिविध्वंसी दशाननरूपिकीटस्य चापि संहारकोऽयम्। (नन्दपुत्रः

आगच्छतीति)।

विशेषः – प्रयच्छति = प्र+दाण्–यच्छ्+लिट्।

निपीयमानः = नि+पा – पीङ् पाने+य+शानच्+सु।

मुग्धेषु = मुह्+क्त+सुप्।

नन्दस्य तनयः नन्दतनयः (षष्ठी तत्पुरुषसमासः)।

श्रियं मोहयति इति श्रीमोहनः (उपपदतत्पुरुषः)।

सारङ्ग इव सुन्दरः सारङ्गसुन्दरः (कर्मधारय समासः)।

मूलम् – अथ एतावदेव श्रुत्वा अतितरां प्रसन्नेषु पारिषदेषु, ससाधुवादं वितीर्णकङ्कणे च अपजलखाने, तानरङ्गोऽपि सप्रसादं तानपूरिकां भूमौ संस्थाप्य अपजलखानस्य गुणग्राहितां प्रशंशस।

अथ अपजलखानः क्रमशः मैरेय-मद-परवशतां वहन् उवाच – यत् कथ्यतामस्मिन् प्रान्ते भवादृशानां गुण-ग्राहकाः के सन्ति? के वा कवितायाः संगीतस्य च मर्माऽवगच्छन्ति?

प्रसङ्गः – अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन गायकेन तानरङ्गेण प्रस्तुतगीतिं श्रुत्वा उत्सहितेन अपजलखानेन तस्मै तानरङ्गाय प्रदत्तदानस्य वर्णनं कृतमस्ति।

पर्यायशब्दाः – अथ, एतावेदव = इयन्मात्रमेव, श्रुत्वा = आकर्ण्य, अतितराम् = अतिशयां, प्रसन्नेषु = तुष्टेषु, परिषदेषु = सभासदेषु, ससाधुवादं = प्रशंसापूर्वकं, वितीर्णकङ्कणे = प्रदत्तकङ्कणे, च, अपजलखाने = सेनापतौ, तानरंगोऽपि, गायकोऽपि, सप्रसादं = सहर्षं, तानपूरिकां = वाद्यं, भूमौ = पृथिव्यां, संस्थाप्य = स्थापयित्वा, अपजलखानस्य = सेनापतेः, गुणग्राहितां = गुणज्ञतां, प्रशंशस = प्रशंसयामास।

अथ = अनन्तरम्, अपजलखानः = सेनापतिः, क्रमशः = क्रमेण, मैरेयमदपरवशताम् = आसवमदाधीनतां, वहन् = धारयन्, उवाच = जगाद, यत्, कथ्यतां = वदतु, अस्मिन् प्रान्ते = इह प्रदेशे, भवादृशानां = त्वत्सदृशानां, गुणग्राहकाः = गुणग्राहिणः, के सन्ति? के वा, कवितायाः = काव्यस्य, संगीतस्य, च, मर्म = रहस्यम्, अवगच्छन्ति = जानन्ति।

गद्यांशव्याख्या – तदनन्तरं तानरङ्गस्य गीतिश्रवणमात्रेणैव अत्यन्तं सन्तुष्टेषु सभासदस्येषु प्रशंसापूर्वकम् अपजलखानः तस्मै सुवर्णकङ्कणं दत्तवान्। तानरङ्गः अपि प्रसन्नतापूर्वकं तानपूरिकां भूमौ स्थापयित्वा अपजलखानः गुणग्राहितां प्रशंसितवान्।

तत्पश्चात् अफजलखानः क्रमेण मदिरामदाधीनतां वहन् उक्तवान् – अस्मिन् प्रान्ते भवादृशानां गीतकाराणां गुणग्राहकाः के जनाः सन्ति? के च कवितायाः सङ्गीतस्य च रहस्यं जानन्ति इति?

विशेषः – संस्थाप्य = सम्+स्था+णिच्+क्त्वा (ल्यप्)।

प्रशशंस = प्र+शंस्+लिट् (तिप्)।

वहन् = वह्+शतृ।

अवगच्छन्ति = अव+गम्+लट् (झि)।

मैरेयस्य मदः, तस्य परवशः (ष०त०)। तस्य भावः ताम्। वितीर्णं कङ्कणं येन सः वितीर्णकङ्कणः (बहुव्रीहिसमासः) तस्मिन्। साधुवादेन सहितं – ससाधुवादम्।

मूलम् – ततस्तानरङ्गोऽचकथत् – को नामापरः शिववीरात्? स एव राजनीतौ निष्णातः, स एव

सैन्धवाऽऽरोह-विद्या-सिन्धुः, स एव चन्द्रहासचालने चतुरः, स एव मल्ल-विद्या-मर्मज्ञः, स एव बाण-विद्या-वारिधिः, स एव पण्डित-मण्डल-मण्डनः, स एव धैर्य-धारि-धौरेयः, स एव वीर वारवरः, स एव पुरुष-पौरुष-परीक्षकः, स एव दीनदुःखदावदहनः, स एव स्वधर्मरक्षण-सक्षणः, स एव विलक्षण-विचक्षणः, स एव च मादृशगुणिगण-गुण-ग्रहणाऽऽग्रही वर्तते।

अथ अपजलखाने - ''तत् किं शिव एष एवं गुण-गण-विशिष्टोऽस्ति? एवं वा वीर-वरोऽस्ति?'' इति सचकितं सभयं सतर्कं सरोमोद्गमं च कथयति, किञ्चिद् विचार्यैव नीति-कौशल-पुरः सरं गौरः पुनरवादीत्।

प्रसङ्गः - अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन अपजलखानस्य पुरतः गौरसिंहस्य मुखेन शिववीरस्य गुणज्ञता, धर्मपरायणता वीरता च वर्णिताः सन्ति।

पर्यायशब्दाः - ततः = तदनन्तरं, तानरंगः = गायकः, अचकथत् = अवदत्, को नामापरः = को नामान्यः, शिववीरात् = शिवात्, स एव = शिववीर एव, राजनीतौ, निष्णातः = कुशलः, स एव, सैन्धवारोह-विद्या-सिन्धुः = अश्वारोहणकलासागरः, स एव, चन्द्रहासचालने = कृपाणचालने, चतुरः = दक्षः, स एव, मल्लविद्यामर्मज्ञः = मल्लविद्याविशेषज्ञः, स एव, बाणविद्यावारिधिः = धनुर्विद्यार्णवः, स एव, पण्डितमण्डलमण्डनः = विद्वन्मण्डलाभरणः, स एव, धैर्यधारिधौरेयः = धीरधुरीणः, स एव, वीरवारवरः = वीरसमूहश्रेष्ठः, स एव, पुरुष-पौरुष-परीक्षकः = पुरुषशक्तिज्ञः, स एव, दीनदुःखदावदहनः = अनाथवलेषविपिनस्याग्नितुल्यः, स एव, स्वधर्मरक्षणसक्षणः = निजधर्मपरिपालनसोत्साहः, स एव, विलक्षणविचक्षणः = विशिष्टविद्वान्, स एव च, मादृशगुणिगणगुणग्रहणाऽऽग्रही = मत्सदृशगुणिसमूहगुणावग्रहाग्रही, वर्तते = अस्ति।

अथ = अनन्तरम्, अफजलखाने = सेनापतौ, तत्किं, शिवः = शिववीरः, एषः = अयम्, एवम् = ईदृग्, गुणगणविशिष्टः = गुणगणयुक्तः, अस्ति = वर्तते? एवं वा वीरवरोऽस्ति = वीरश्रेष्ठोऽस्ति,'' इति = एवं, सचकितं = चकितेन सह, सभयं = भयेन सह, सतर्कं = तर्केण सह, सरोमोद्गम = सरोमाञ्चं च कथयति = वदति, किञ्चिद् = ईषद्, विचार्य इव = चिन्तयित्वेव, नीतिकौशलपुरःसरं = नीतिचातुर्यपूर्णं, गौरः = गौरसिंहः, पुनः = भूयः, अवादीत् = अवदत्।

गद्यांशव्याख्या - तदनन्तरं गायकः तानरङ्गः अवदत् - शिववीरमतिरिच्य एतादृशः कोऽस्ति? सः शिववीर एव राजनीतौ निपुणः अश्वारोहणविद्यायां दक्षः, चन्द्रहासनामकखड्गसंचालने चतुरः, पुनश्च मल्लविद्याविशारदः, धनुर्विद्यायाः समुद्रः, विदुषामाभूषणः, वीरसमूहश्रेष्ठः, पुरुषाणां पौरुषस्य निकषः, दुर्बलजनानां दुःखरूपिवनस्य दावाग्निः, निजधर्मपरिपालने सोत्साहः, विलक्षणः विद्वान् सः शिववीर एव मादृशानां गुणिनां समूहस्य गुणग्राही आग्रहवान् चास्ति।

तत्पश्चात् अपजलखानः - एवं चेत् किमयं शिववीरः एवं गुणयुक्तः वीरश्चास्ति? इति साश्चर्यं, सभयं, सानुमानं, सरोमाञ्चं च पृच्छति। पुनः किञ्चिद् - चिन्तयित्वा नीतिकौशलयुक्तः गौरसिंहः तानरङ्गो वा उक्तवान्।

विशेषः - निष्णातः - नि+ष्णा+क्त+सु।

सैन्धव - सिन्धु+अण्।

धौरेय - धुर्+ढक् (एय)+सु।

दहनः - दह्+ल्यु(अन)+सु।

मूलम् - भगवन्! सामान्य-राजभृत्यस्य पुत्रः शिववीरो यदि नाम-नाऽभविष्यत् स्वयमीदृश उर्जस्वलः, तत्कथं स्वर्णदेव-सदृशं सहचरं प्राप्स्यत्? तद्-द्वारा समस्तं कल्याण-प्रदेशं कल्याणदुर्गं च स्वहस्तगतमकरिष्यत्? कथं तोरण-दुर्ग-भोग-भाजनतामकलयिष्यत्? कथं तोरण-दुर्गाद् दक्षिण-

पूर्वस्यां पर्वतस्य शिखरे महेन्द्र-मन्दिर-खण्डमिव धर्षितारि-वर्गं डमरु-हुडुक्कारतोषितभर्गं रायगढनामकं महादुर्गं व्यचरयिष्यत्? कथं वा तपनीय-भित्तिका-जटित-महारत्न-किरणावली-वितन्यमान-महावितान-वितति-विरोचित-प्रताप-तापित-परिपन्थि-निवहं चन्द्रचुम्बन चतुर-चारु-शिखर-निकरं भुशुण्डिका-किणाङ्कित-प्रचण्ड-भुजदण्ड-रक्षक-कुल-विधीयमान-परस्सहस्रपरिक्रमं धमद्धम-द्दोधूयमानाऽनेक-ध्वज-पटल-निर्मथित महाकाशं प्रताप-दुर्गं निरमापयिष्यत्? कथं वा आगत एष शिववीरः - इति भ्रमेणापि सम्भाव्य अस्य विरोधिषु केचन मूर्च्छिताः निपतन्ति, अन्ये विस्मृत-शस्त्रास्त्राः पालयन्ते, इतरे महात्रासाऽऽकुञ्चितोदरा विशिथिल-वाससो नग्ना भवन्ति अपरे च शुष्कमुखा दशनेषु तृणं सन्धाय साम्रेडं प्रणिपात-परम्परां रचयन्तो जीवनं याचन्ते।

प्रसङ्गः - अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन शिववीरस्य शौर्यविषये जिज्ञासमानं अपजलखानं प्रति गौरसिंहस्य कथनं वर्णितमस्ति।

पर्यायशब्दाः - भगवन् = श्रीमन्, सामान्यराजभृत्यस्य = सामान्यस्य राजानुचरस्य, पुत्रः = सुतः, शिववीरः = शिवः, यदि नाम = चेदेवं, न अभविष्यत् = स्यात्, स्वयं = शिववीरः, ईदृशः = एवम्, ऊर्जस्वलः = तेजस्वी, तत्कथं = केन प्रकारेण, स्वर्णदेवसदृशं = स्वर्णदेवसमं, सहचरं = सहयोगिनं, प्राप्स्यत् = प्राप्तमकरिष्यत्? तद् द्वारा स्वर्णदेवेन, समस्तं = निखिलं, कल्याणप्रदेशं? कल्याणदुर्गम् एतद्दुर्गं, च स्वहस्तगतं = स्वकरग्रहणम्, अकरिष्यत् = कुर्यात्? कथं, तोरणदुर्गभोगभाजनात् = एतद्दुर्गभोग्यताम्, आकलयिष्यत् = अप्राप्स्यत्,? कथं, तोरणदुर्गात् = तद्दुर्गात्, दक्षिणपूर्वस्यां = दक्षिणपूर्वयोः अन्तराले, पर्वतस्य = गिरेः, शिखरे = शृङ्गे, महेन्द्रमन्दिरखण्डम् = इन्द्रप्रासादशकलम्, इव धर्षितारिवर्गं = भीतारिसमूहं, डमरुहुडुक्कारतोषितभर्गं = डमरुशब्दतोषितशिवं, रायगढनामकं, महादुर्गं = व्यरचयिष्यत् = निरमापयिष्यत्? कथं वा, तपनीयस्य सुवर्णस्य, भित्तिकासु = कुड्येषु, जटितानां = खचितानां, महारत्नानां, किरणावलीभिः = मयूखसमूहैः, वितन्यमानस्य = विस्तार्यमाणस्य, महावितानस्य = महोल्लोचस्य, वितति = विस्तारेण, विरोचितेन = शोभितेन, प्रतापेन = तापेन, परिपन्थिनिवहः येन तं; चन्द्रचुम्बने = इन्दुस्पर्शे, चतुरः = समर्थः, चारुः = शोभनः, शिखर-निकरः = शृङ्गसमूहः, यस्य तं; भुशुण्डिकानां किणैः = आघातैः, अङ्किताः = चिह्निताः, प्रचण्डाः =भुजाः, दण्डा इव, येषां तेषां, रक्षकाणां = रक्षातत्पराणां, कुलेन = समूहेन, विधीयमाना = सम्पाद्यमाना, परस्सहस्राः = सहस्रादधिकाः, परिक्रमा = मण्डलानि, यस्य तं; धमद्धमद्दोधूयमान - धमद्धमदिति शब्देन दोधूयमाना भृशं सञ्चलताम्, अनेकेषां = बहूनां, ध्वजानां = पताकानां, पटलेन = समूहेन, निर्मथितः = विलोडितः, महाकाशः येन सः तं; प्रतापदुर्गं = एतन्नामकं दुर्गं, निरमायिष्यत् = व्यरचयिष्यत्? कथं वा, "आगतः आयातः, एषः = अयं, शिववीरः = शिवः" इति भ्रमेणापि, सम्भाव्य अनुचिन्त्य, अस्य = शिवस्य, विरोधिषु = शत्रुषु, केचन, मूर्च्छिताः = चेतनारहिताः, निपतन्ति = स्खलन्ति, अन्ये, विस्मृतशस्त्रास्त्राः = विस्मृतायुधः, पलायन्ते = दूरं व्रजन्ति, इतरे, महात्रासेन = महाभयेन, आकुञ्चितानि = क्रशिमानयन्ति, उदराणि येषां ते; विशिथिलवाससः = स्खलितवस्त्राः, नग्नाः = निर्वस्त्राः, भवन्ति, अपरे च = अन्ये च, शुष्कमुखाः = निरार्द्रमुखाः, दशनेषु = रदेषु, तृणं, सन्धाय = संस्थाप्य, साम्रेडं, भृशं, प्रणिपातपरम्परां = अतिनमनपरम्परां, रचयन्तः = कुर्वन्तः, जीवनं = जीवनदानं, याचन्ते = प्रार्थयन्ते।

गद्यांशव्याख्या - (गौरसिंहः वदति) भगवन्! साधारणनृपसेवकस्य पुत्रः शिववीरः यदि स्वयम् एतादृशः तेजस्वी न स्यात् तदा स्वर्णदेव सदृश मित्रं कथं प्राप्तम् अकरिष्यत्? तेन सम्पूर्णकल्याणप्रदेशः कल्याणदुर्गञ्च हस्तगतं कथं कृतं स्यात्? कथञ्च तोरणदुर्गसेवनपात्रताम् अवाप्स्यत्? पुनश्च कथं तोरणदुर्गात् दक्षिणपूर्वस्यां दिशि पर्वतशिखरे इन्द्रप्रासादखण्डमिव शत्रूणां भयदं डमरुशब्दतोषितं भगवन्तं शिवं प्रसादयितुं समर्थं रायगढनामकं महादुर्गं रचयितुं

समर्थोऽभविष्यत्? कथं वा सुवर्णभित्तिषु खचितानां महारत्नानां किरणावलीभिः वितन्यमानेन महावितानेन सुशोभितेन प्रतापेन शत्रूणां संतापं, नभस्स्पर्शिभिः शिखरैः शोभितं, भुशुण्डि-आघात-चिह्नितप्रचण्डभुजदण्डैः, प्रहरिभिः सम्पाद्यमाना सहस्रादधिकपरिक्रमं, धमद्-धमदिति शब्दं कुर्वद्भिः दोधूयमानैः ध्वजैः विलोडितविशालाकाशं प्रतापदुर्गं व्यरचयिष्यत्? कथं वा "आगतः अयं शिववीरः" इति भ्रमेणापि अनुचिन्त्य विरोधिषु केचन चेतनारहिताः निपतन्ति, अन्ये शस्त्रास्त्राणि विहाय कथं धावन्ति अन्ये च महाभयात् संकुचितोदराः (अत एव) विशिथिलवस्त्राः। नग्नाः कथं जायन्ते इतरे च खिन्नवदनाः सन्तः दन्तेषु तृणं सन्धाय मुहुर्मुहुः प्रणमन्तः जीवनदानं कथं प्रार्थयन्ते?

विशेषः - ऊर्जस्वलः = ऊर्जस्+वलच्+सु।

अभविष्यत् = भू+लृङ्+तिप्।

प्राप्स्यत् = प्र+आप्+लृङ्+तिप्।

निरमापयिष्यत् = निर्+मा+णिच्+लृङ्+तिप्।

सन्धाय = सम्+धा+क्त्वा (ल्यप्)।

राजभृत्यः = राज्ञः भृत्यः (षष्ठी तत्पुरुषः)।

मूलम् - ततस्तस्य महाप्रतापमवगत्य किञ्चिद्भीते इव तच्छत्रूणां चावहेलामाकलय्य किञ्चिदरुण-नयने इव, दक्षिण-हस्तांगुष्ठतर्जनीभ्यां श्मश्रग्रं परिमृजति यवन-सेनापतौ; तानरङ्गः पुनर्न्यवेदयत्-

परन्त्वद्य सिंहेन सह शिवस्य साम्मुख्यमस्ति, तन्मन्ये इयमस्तमनवेला तत्प्रतापसूर्यस्य।

तत् कर्णे कृत्वा सन्तुष्ट इव सकन्धराकम्पं सेनापतिरुवाच - अथाऽत्र संग्रामे कस्य विजयः सम्भाव्यते?

स उवाच - श्रीमन्! यदि शिवस्य साहाय्यं साक्षाच्छिव एव न कुर्यात्; तद् विजयपुरस्यैव विजयः।

अथ सहासं सोऽब्रवीत् - को नाम खपुष्पायितः शशशृङ्गायितः कमठीस्तन्यायितः सरीसृप-श्रवणायितः भेक-रसनायितः वन्ध्यापुत्रायितश्च शिवोऽस्ति? य एनं रक्षिष्यति, दृश्यतां श्व एवैषोऽस्माभिः पाशैर्बद्ध्वा चपेटैस्ताड्यमानो विजयपुरं नीयते।

प्रसङ्गः - अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन शिववीरस्य शौर्यस्य व्याख्यानं श्रुत्वा खिन्नम् अपजलखानं प्रति गौरसिंहस्य पुनरुक्तिर्वर्णिता अस्ति।

पर्यायशब्दाः - ततः = तदनन्तरं, तस्य = शिवस्य, महाप्रतापं = महाप्रभावम्, अवगत्य = संज्ञाय, किञ्चित् = ईषद्, भीते इव = धर्षिते इव, तच्छत्रूणां = शिववीरवैरिणां, च, अवहेलां = निन्दाम्, आकलय्य = श्रुत्वा, किञ्चिदारुणे = ईषद्रक्ते, इव, नयने = नेत्रे, दक्षिणहस्ताङ्गुष्ठतर्जनीभ्यां = वामेतरकरांगुष्ठतर्जनीभ्यां, श्मश्रग्रं, परिमृजति = संस्पृशति, यवनसेनापतौ = अपजलखाने, तानरंगः = गायकः, पुनः, न्यवेदयत् = प्रार्थयत्, परन्तु = किन्तु, अद्य, सिंहेन सह = केसरिणा सह, शिवस्य = शिववीरस्य, सम्मुखम् = अभिमुख्यम्, अस्ति = वर्तते, तन्मन्ये = तस्माज्जानामि, इयम् = एषा, अस्तमनवेला = समाप्तिवेला, तत्प्रतापसूर्यस्य = शिवप्रतापरवेः।

तत्कर्णे कृत्वा = एतच्छ्रुत्वा, सन्तुष्ट इव = परितुष्ट इव, संकन्धराकम्पं = सकन्धकम्पं, सेनापतिः = अपजलखानः, उवाच = अवदत्, अथ, अत्र = अस्मिन्, संग्रामे = युद्धे, कस्य, विजयः = जयः, सम्भाव्यते = अनुमीयते?

सः = तानरंगः, उवाच - श्रीमन्? यदि शिवस्य = चेत् शंकरस्य, साहाय्यं = सहायतां, साक्षाच्छिवः = प्रत्यक्षरूपेण शंकरः, एव, न कुर्यात् = न विदध्यात्, तद् विजयपुरस्यैव = अपजलखानस्यैव, विजयः = जयः।

अथ = तदा, सहासं = हासपूर्वकं, सः = अपजलखानः, अब्रवीत् = को नाम = कश्चेत्, श्वपुष्पायितः = आकाशकुसुममिवाचरितः शशशृङ्गायितः = शशशृङ्गमिवाचरितः, कमठीस्तन्यायितः = कमठ्याः, स्तनमिवाचरितः, सरीसृपश्रवणायितः = सरीसृपस्य जन्तो कर्णमिवाचरि, भेकरसनायितः = मण्डूकीजिह्वा या इव आचरितः, बन्ध्यापुत्रायितश्च = बन्ध्यायाः पुत्रमिवाचरितः, शिवः = शङ्करः, अस्ति = वर्तते? या, एनं = शिववीरं, रक्षिष्यति = रक्षां करिष्यति, दृश्यतां = पश्यतु, श्व एव = आगामिनि दिने एव, एषः = अयम्, अस्माभिः = यवनसेनाभिः, पाशैः = जालैः, बद्ध्वा = संनियम्य चपेटैः, ताड्यमानः = प्रताडितः सन्, विजयपुरं = मद् राजधानीं, नीयते = प्रापयति।

गद्यांशव्याख्या – तदनन्तरं शिववीरस्य महाप्रतापं ज्ञात्वा यदा अपजलखानः किञ्चित् भीत इव जातः तथा च तस्य शिववीरस्य शत्रूणां च तिरस्कारं श्रुत्वा ईषत् रक्ते नेत्रे इव, दक्षिणहस्ताङ्गुष्ठतर्जनीभ्यां श्मश्रग्रं संस्पृशति यवनसेनापतौ, तानरङ्गः पुनः निवेदितवान् –

परन्तु अद्य सिंहेन – (अपजलखानेन) सह शिवस्य साक्षात्कारः अस्ति, तस्मात् कारणात् तस्य प्रतापमभानोः अयं अस्तकालः समुपस्थितः इति मन्ये इति श्रुत्वा ग्रीवासञ्चालनपूर्वकं सन्तुष्ट इव अपजलखानः उक्तवान् – उच्यताम् अस्मिन् युद्धे कस्य जयो भविष्यति?

तानरङ्गः अवदत् – भगवन् यदि साक्षादेव भगवान् शिवः सहायतां न कुर्यात् तर्हि निश्चयेन विजयपुरस्य एव जयः भविष्यति।

अनन्तरं विहसन् अपजलखानोऽवदत् – कश्चेत् आकाशकुसुममिवाचरितः, शशशृंगमिवाचरितः, कच्छपीस्तनमिवाचरितः, सरीसृपस्य जन्तोः कर्णमिवाचरितः मण्डूकीजिह्वायाः इव आचरितः बन्ध्यायाः पुत्रमिवाचरितः शङ्करः अस्ति? यः एतस्य शिववीरस्य रक्षां करिष्यति? पश्यतु, श्व एव अयं शिववीरः अस्माभिः यवनसैनिकैः जालैः बद्धवा चपेटैश्च प्रताडितस्सन् विजयपुरं नीतो भविष्यति।

विशेषः – अवगत्य = अव+गम्+क्त्वा (ल्यप्)।

आकलय्य = आ+कल्+णिच्+क्त्वा (ल्यप्)।

परिमृजति = परि+मृज्+लट्+शतृ।(स०वि०, एकवचनम्)।

सम्भाव्यते = सम्+भावि+लट्।

ताड्यमानः = ताड्+णिच्+शानच्+सु।

महाश्चासौ प्रतापः (कर्मधारयः) – महाप्रतापः।

मूलम् – इति सकष्टमाकर्ण्य, "स्यादेवं भगवन्!" इति कथयति तानरङ्गे, अभिमान-परवशः स स्वसहचरान् सम्बोध्य पुनरादिशत् – भो-भो योद्धारः! सूर्योदयात् प्रागेव भवन्तः पञ्चाऽपि सहस्राणि सादिनां दशाऽपि च सहस्राणि पत्तीनां सज्जीकृत्य युद्धाय तिष्ठत। गोपीनाथपण्डित द्वाराऽऽहूतोऽस्ति मया शिव-वराकः। तद् यदि विश्वस्य स समागच्छेत्, ततस्तु बद्ध्वा जीवन्तं नेष्यामः, अन्यथा तु सदुर्गमेनं धूलीकरिष्यामः। यद्यप्येवं स्पष्टमुदीरणं राजनीति-विरुद्धं, तथाऽपि मदावेशस्तु न प्रतीक्षते विवेकम्।

प्रसङ्गः – अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन सैनिकान् प्रति श्वः किं करणीयम् इति अपजलखानस्य कथनं वर्णितम् अस्ति।

पर्यायशब्दाः – इति = एतद्, सकष्टं = सक्लेशम्, आकर्ण्य = श्रुत्वा, स्यात् = भवेत्, एवं भगवन् = श्रीमन्! इति = एवं, कथयति = उक्तवति, तानरंगे = गायके, अभिमानपरवशः = अहङ्कारवशीभूतः, सः = अपजलखानः, स्वसहचरान्= िनजसहयोगिनां,स म्बोध्य= अ भिमुखीकृत्य,प ुनः,अ ादिशत्= अ ादिष्टवान्,भ ोःभ ोःय ोद्धारः=

युद्धकर्त्तार:, सूर्योदयात् प्रागेव = सूर्योदयात् पूर्वमेव, भवन्त: = यूयं, पञ्चापि, सहस्राणि, सादिनाम् = अश्वारोहिणां, दशापि च सहस्राणि, पत्तीनां = पदातीनां, सज्जीकृत्य = सुसज्जितं कृत्वा, युद्धाय = संग्रामाय, तिष्ठत = प्रतीक्षध्वं, गोपीनाथपण्डितद्वारा = एतन्नामकपण्डितेन, आहूत: = आमन्त्रित: अस्ति, मया = अफजलखानेन, शिववराक: = क्षुद्रशिव:। तद्, यदि = चेत्, विश्वस्य = विश्वासं कृत्वा, स: = शिव:, समागच्छेत् = आगच्छेत्, ततस्तु = तदा तु, बद्ध्वा = बन्दीकृत्य, जीवन्तं = प्राणान् धारयन्तमेव, नेष्याम: = प्रापयिष्याम:, अन्यथा तु, सदुर्गं = दुर्गसहितम्, एनं = शिवं, धूलीकरिष्याम: = चूर्णयिष्याम:, यद्यपि एवम् = इत्थं, स्पष्टम् = अगोप्यम्, उदीरणं = कथनं, राजनीतिविरुद्धं = राजनीतिविपरीतं, तथापि, मदावेशस्तु = अफजलखानावेशस्तु, न, प्रतीक्षते = प्रतीक्षां करोति, विवेकं = बौद्धिकताम् इति।

गद्यांशव्याख्या – अपजलखानस्य शिववीरं ग्रहीतुं भावियोजनाया: कथनं कष्टेन श्रुत्वा 'भगवन्! एतद् भवितुं शक्नोति' इति तानरङ्ग: उक्तवान्। तत: परम् अहङ्कारवशीभूत: स: अपजलखान: निजसहचरान् सम्बोध्य पुन: आदिष्टवान् – भो: योद्धार:! श्व: सूर्योदयात् पूर्वमेव भवन्त: पञ्चसहस्र – अश्वारोहिण: दशसहस्राणि च पदातीन् सज्जीकृत्य युद्धाय तत्परा: भवन्तु। गोपीनाथपण्डितेन मया स: वराक: शिववीर: आहूतोऽस्ति। तस्मात् यदि स: विश्वासेन आगच्छेत् तर्हि तं बन्दीकृत्य जीवन्तमेव नेष्याम:, नो चेत् सदुर्गं चूर्णयिष्याम:। यद्यपि एवं स्पष्टतया कथनन्तु रजनीतिविरुद्धमेव अस्ति, पुनरपि मम आवेशस्तु कर्त्तव्याकर्त्तव्यविचारस्य प्रतीक्षां न करोति।

विशेष: – कथयति – कथ्+शतृ – (स०वि०, एकवचनम्)।

आदिशत् = आ+दिश्+लङ्।

सज्जीकृत्य = सज्+च्वि+कृ+क्त्वा (ल्यप्)।

जीवन्तम् = जीव्+शतृ।

अभिमानस्य परवश: – अभिमानपरवश: (षष्ठी तत्पुरुष:)।

राजनीत्या: विरुद्धं राजनीतिविरुद्धम् (षष्ठी तत्पुरुष:)।

असज्जं सज्जं कृत्वा इति सज्जीकृत्य (गतितत्पुरुष:)।

मूलम्- त दवधार्यस मस्तक-कूर्चान्दोलनम्- ' 'यदाज्ञाप्यते'" 'यदाज्ञाप्यते''इ ति वाचां धारासम्पातैरिव स्नापयत्सु पारिषदेषु, ''गोपनीयोऽयं वृत्तान्त: कथं स्पष्टं कथ्यते?'' इति दुर्मनायमानेष्विव च अकस्मादेव प्रविश्य सूदेनोक्तम् – ''श्रीमन्! व्यत्येति भोजनसमय:''। तत् श्रुत्वा ''आ! एवं किलैतत्'' इति सोत्प्रासं सविस्मयं सकूर्चोद्धूननं सोपबर्हताडनमुच्चार्य सपद्युत्थाय, 'पुनरागम्यताम् इति तानरङ्गं विसृज्य सेनापतिरन्त: प्रविवेश। तानरङ्गश्च यथागतं निववृते।

इतस्तु प्रतापदुर्गे विहिताहारव्यापारे रजतपर्यङ्किकामेकाधिष्ठिते किञ्चित् तन्द्रा परवशे इव गोपीनाथे, शिववीर: शनैरुपसृत्य प्रणम्य, उपाविशदवोचच्च – अहो! भाग्यमस्माकं यदालयं युष्मादृशा भूदेवा: स्वचरणरजोभि: पावयन्ति इति।

प्रसङ्ग:- अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन अपजलखानशिविरात् गौरसिंहस्याागमनं शिववीरेण पण्डितगोपीनाथस्य कृतदर्शनञ्च वर्णितमस्ति।

पर्यायशब्दा: – तदवधार्य = तच्छ्रुत्वा, समस्तककूर्चान्दोलनं = सशिरस्कूर्चकम्पं – ''यदाज्ञाप्ते =

यदादिश्यते'', इति वाचां = गिरां, धारासंपातैरिव = मूसलाधारवृष्टिभिरिव, स्नापयत्सु = स्नानं कारयत्सु, परिषदेषु = सभासदेषु, गोपनीयोऽयं = रहस्यात्मकोऽयं, वृत्तान्तः = प्रवृत्तिः, कथं स्पष्टं = प्रत्यक्षतः कथ्यते, उच्यते'' इति, दुर्मनायमानेष्विव = विमनायमानेष्विव च, अकस्मादेव = सहसैव, प्रविश्यं = प्रवेशं कृत्वा, सूदेनोक्तं = पाचकेन कथितं, ''श्रीमन् = भगवन्, व्यत्येति = समाप्यते, भोजनसमयः = अथनावसरः, तत् श्रुत्वा = एतदाकर्ण्य, ''आ, एवं किलैतत्, किन्वेदम्?'' इति सोत्प्रासम् = ईषद्धास्येन सह, सविस्मयं = साश्चर्यं, सकूर्चोद्धूननं = श्मश्रूल्लसनेन सह, सोपबर्हतानम् = उपधानप्रहारेण साकम्, उच्चार्य = कथयित्वा, सपदि = तत्क्षणमेव, उत्थाय, ''पुनरागम्यतां-पुनरायातु'' इति तानरङ्गं = गायकं, विसृज्य = प्रस्थाप्य, सेनापतिः = अफजलखानः, अन्तःप्रविवेश = अन्तर्जगाम। तानरङ्गश्च = गायकश्च, यथागतं = यथायातं, निववृते = प्रत्यावर्तत्।

इतस्तु, प्रतापदुर्गे = एतद् दुर्गे, विहिताहारव्यापारे = सम्पादितभोजनव्यापारे, रजतपर्य्यङ्किकाम् एकाम्, अधितिष्ठते = विराजमाने, किञ्चित् ईषद्, तन्द्रापरवशे इव = निद्रावशीभूते इव, गोपीनाथे = एतन्नामके पण्डिते, शिववीरः = महाराष्ट्राधीश्वरः, शनैः =मन्दम्, उपसृत्य = उपगम्य, प्रणम्य = नमस्कृत्य, उपाविशत् = अतिष्ठत, अवोचत् = उवाच, च, ''अहो अस्माकं = शिववीरस्य, भाग्यं = सौभाग्यं, यद्, युष्मादृशाः = भवत्सदृशाः, भूदेवाः = ब्राह्मणाः स्वचरणरजोभिः = निजपादधूलिभिः, आलयं = गृहं, पावयन्ती = पुनन्ति इति।

गद्यांशव्याख्या – अपजलखानस्य वचनं श्रुत्वा शिरः कूर्चं च आन्दोलायन्तः – 'यदादिश्यते' इति कथयन्तः केचन सभासदस्याः गिरां मूसलाधारवृष्टिभिरिव स्नापयन्तः इव (केचन च) अयं गोपीनीयो वृत्तान्तः कथं स्पष्टं कथ्यते? इति दुर्मनायमानाः इव अभूवन्। तदानीमेव पाचकः तत्रागत्य उक्तवान् – भगवन्! भोजनकालः निर्गच्छति इति। तदाकर्ण्य आः! एवमस्ति किम् इति ईषद्धास्येन सह साश्चर्यं श्मश्रूल्लसनेन सह उपधानप्रहारेण साकं ''पुनरागम्यताम्'' इत्युक्त्वा उत्थाय च तानरङ्गं विसृज्य सेनापतिः अन्तः प्रविष्टवान् तानरङ्गश्च येन मार्गेण गतः आसीत् तेनैव पुनरागतवान्।

अत्र च प्रतापदुर्गे पण्डितगोपीनाथः भोजनादनन्तरम् एकस्मिन् रजतपर्यङ्के उपविष्टः किञ्चित् असल इव अभूत् तदैव शिववीरः शनैः तम् उपगम्य नमस्कृत्य च उपविष्टवान् उक्तवान् च – 'अहो अस्माकं सौभाग्यमस्ति, यत् मम गृहं भवादृशाः ब्राह्मणाः निजपादधूलिभिः पवित्रीकुर्वन्ति इति।'

विशेषः – तदवधार्य = तद्+अव+धृ+ल्यप्।

स्नापयत्सु = ष्णा+णिच्+पुक्+शतृ।

व्यत्येति = वि+अति+इण्+लट्।

विसृज्य = वि+सृज्+ल्यप्।

प्रविवेश = प्र+विश्+लिट्।

समस्तककूर्चान्दोलनम् – मस्तककूर्चयोः आन्दोलनं मस्तककूर्चान्दोलनं (षष्ठी तत्पुरुषः)। तेन सहितम्।

विहिताहारव्यापारे – विहितः आहारव्यापारः येन सः विहिताहारव्यापारः, तस्मिन् – (बहुव्रीहिसमासः)।

मूलम् – अथ तयोरेवमभूवन्नालापाः।

गोपीनाथः – राजन्! कोऽत्र संदेहः? सर्वथा भाग्यवानसि, परं साम्प्रतं नाहं पण्डितत्वेन कवित्वेन वा समायातोऽस्मि, किन्तु यवनराजदूतत्वेन। तत् श्रूयतां यदहं निवेदयामि।

शिववीरः – शिव! शिव! खलु खलु खल्विदमुक्त्वा, येषां श्रीमतां चरणेनाऽङ्कितं विष्णोरपि वक्षः स्थलमैश्वर्यमुद्रयेव मुद्रितं विभाति, न तेषां ब्राह्मण-कुल-कमल-दिवाकराणां यवन-कैङ्कर्यकलङ्क-पङ्को युज्यते, यं शृण्वतोऽपि मम स्फुटत इव कर्णौ। तथाऽपि कुलीना निरभिमाना भवन्ति

इति आनीतश्चेत् कश्चित् सन्देशः, तदेष आज्ञाप्यतां श्रीमच्चरण-कमलचञ्चरीकः।

गोपीनाथः – वीर! कलिरेष-कालः, यवनाऽऽक्रान्तोऽयं भारतभूभागः, तन्नाऽस्माकं तथा तानि तेजांसि, यथा वर्णयसि। साम्प्रतं तु विजयपुराधीश-वितीर्णां वृत्तिं भुञ्जे इति तदाज्ञामेव परिपालयामि। तत् श्रूयतां तदादेशः!

शिववीरः – **आर्य! अवदधामि।**

प्रसङ्गः – अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन कविगोपीनाथपण्डितस्य शिववीरस्य च मध्ये सञ्जातवार्तालापस्य वर्णनं कृतमस्ति।

पर्यायशब्दाः – अथ =, एवं = तदनन्तरं, तयोः = शिववीरगोपीनाथयोः, एवम् = इमाः, अभूवन्, आलापाः = वार्ताः। राजन् = कः, अत्र = अस्मिन् कथने, सन्देहः = संशयः, सर्वथा = सर्वप्रकारेण, भाग्यवान् = सौभाग्यशाली, असि, परं = किन्तु, साम्प्रतम् = इदानीम्, अहं, पण्डितत्वेन = विदुषः रूपे, कवित्वेन = कविरूपे, वा = अथवा, न समायातः = आगतः, अस्मि, किन्तु, यवनराजदूतत्वेन = यवनानां राजा भूपतिः तस्य दूतः सन्देशवाहकः तस्य भावः तेन। तत् = अत एव, श्रूयतां = शृणोतु, यत्, अहं निवेदयामि = कथयामि। शिव! शिव! खलु = अलम्, इदम्, उक्त्वा = कथित्वा, येषां, श्रीमतां= म हानुभावानां,च रणेन= प देन,अ ङ्कितं= ि चह्नितं,ि वष्णोः= ह रेः,अ पि,व क्षःस्थलम्= उ रःस्थलम्, ऐश्वर्यमुद्रया = ऐश्वर्यस्य गौरवस्य मुद्रामणिः तया, मुद्रितं = अङ्कितम् इव, विभाति = शोभते, तेषां ब्राह्मणकुलकमलदिवाकराणां = ब्राह्मणानां द्विजानां कुलं वंशं तत् एव कमलं पंकजं तस्य दिवाकरः सूर्यः ये तेषां, यवनकैङ्कर्यकलङ्कपङ्क = यवनानां कैङ्कर्य सेवा तस्मात् यत् कलङ्क दोषं, तत् एव पङ्क, न, युज्यते = विशोभते, यं, शृण्वतः = साकर्णयतः, अपि, मम, कर्णौ = श्रवणौ, स्फुटतः = विदीर्णौ भवतः, इव। तथापि = तदपि, कुलीनाः = उच्चकुलोत्पन्नाः, निरभिमानाः = गर्वरहिताः, भवन्ति, इति, चेत् = यदि, कश्चित्, सन्देशः = संवादः, आनीतः = प्रस्तुतः, तत् = तर्हि, एषः, श्रीमच्चरणकमलचञ्चरीकः = श्रीमतः महानुभावस्य चरणे = पदे ते एव कमले पङ्कजे तयोः चञ्चरीकः भ्रमरः, आज्ञाप्यताम् = आदिश्यताम्, एषः, कलिकालः = कलियुगः, अयं, भारतभूभागः = भारतस्य = भारतवर्षस्य, भूभागः = प्रदेशः, यवनाऽऽक्रान्तः = यवनैः आक्रान्तः, पीडितः, तत् = अत एव, अस्माकं, तानि, तेजांसि = तेजपुञ्जाः, तथा न, यथा, वर्णयसि = कथयसि। साम्प्रतं तु इदानीं, विजयपुराधीशवितीर्णां = विजयपुरस्य आधीशः स्वामी तेन, वितीर्णां प्रदत्तां, वृत्तिं = वेतनं, भुञ्जे = भोगं करोमि, जीवननिर्वाहं करोमि इत्यर्थः, इति, तदाज्ञां = तस्य आशा, आदेशः ताम्, एव, परिपालयामि = धारयामि। तत् = अत एव, तदादेशः = तस्य आदेशः आज्ञा, श्रूयताम् = आकर्ण्यताम्, अवदधामि = सावधानोऽस्मि।

गद्यांशव्याख्या – एतदनन्तरं शिववीरस्य पण्डितगोपीनाथस्य मध्ये एवं विधः वार्त्तालापः सञ्ज ातः।

गोपीनाथः – राजन्! अत्र किञ्चिदपि संशयः अस्ति किम्? वस्तुतः भवान् भाग्यवान् अस्ति। परन्तु इदानीम् अहं पण्डितरूपेण कविरूपेण वा नात्र आगतः, अपितु यवनराजस्य दूतरूपेण आगतोऽस्मि। अतः शृणोतु, यदहं वदामि।

शिववीरः – शिव! शिव! इदं न वक्तव्यम्। येषां श्रीमतां महानुभावानां चरणेन चिह्नितं भगवतः विष्णोः वक्षस्थलमपि ऐश्वर्यमुद्रया अङ्कितमिव भाति, तेषां ब्राह्मणकुलकमलदिवाकराणां भवतां यवनसेनाककलङ्कपङ्कः इति न युज्यते, यच्च शृण्वतो मम कर्णौ स्फुटत इव। तथापि उच्चकुलोत्पन्नाः गर्वरहिताः भवन्ति – इत्यस्मात् कारणात् यदि कश्चित् सन्देशः भवद्भिः आनीतः तर्हि अयं श्रीमतां चरणकमलचञ्चरीकः आदेष्टव्यः।

गोपीनाथः – वीर! अयं कलियुगः भारतवर्षमिदं यवनाक्रान्तम् अस्ति। अतः अस्माकं तादृशं तेजः नास्ति, यथा भवान् वर्णयति। सम्प्रति तु विजयपुराधीशदत्ताजीविकायाः भोगं करोमि। अतः तदादेशं पालयिष्यामि। अतस्तदादेशं शृणोतु।

शिववीरः – आर्य! सावधानोऽस्मि।

विशेषः – आलापः = आङ्+लप्+घञ्+जस्।

पण्डित्वेन = पण्डा+इतच्+टा।

समायातः = सम्+आङ्+या+क्त+सु।

उक्त्वा = वच्+क्त्वा।

शृण्वतः = श्रु+क्तवतु+ङस्।

आज्ञाप्यताम् = आङ्+ज्ञा+णिच्+पुक्+लोट्।

वितीर्णम् = वि+तॄ+क्त+टाप्+अम्।

मूलम् – गोपीनाथः – कथयति विजयपुरेश्वरो यद् – ''वीर! परित्यज नवामिमां चञ्चलतामस्माभिः सह युद्धस्य, त्वदपेक्षयाऽत्यन्तमधिकं बलिनो वयं, प्रवृद्धोऽत्र कोषः, महती सेना, बहूनि दुर्गाणि, बहवश्च वीराः सन्ति। तच्छुभमात्मानः इच्छसि चेत्, त्यक्त्वा निखिलां चञ्चलतां, शस्त्रं दूरतः परित्यज्य, करप्रदतामङ्गीकृत्य, समागच्छ मत्सभायाम्। मत्तः प्राप्तपदश्चिरं जीविष्यसि, अन्यथा तु सदुर्दशं निहितः कथावशेषः संवत्स्यसि। तत् केवलं त्वयि दययैव सन्देशं प्रेषयामि, अङ्गीकुरु। मा स्म वृद्धायाः प्रसविन्याः रजतश्वेतां पक्ष्मपङ्क्तिमश्रु-प्रवाह-दुर्दिने पातय'' – इति।

प्रसङ्गः – अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन पण्डितगोपीनाथस्य शिववीराय श्रावितापजलखानस्य सन्देशः वर्णितः अस्ति।

पर्यायशब्दाः – कथयति = वर्णयति, विजयपुरेश्वरः = विजयपुराधीशः, यद्, वीरः = बलवान्, अस्माभिः सह = सार्धं, युद्धस्य = रणस्य, इमाम् = एमां, नवां = नवीनां, चञ्चलतां = चपलतां, परित्यज्य = त्यज, त्वदपेक्षया = भवदपेक्षया, वयम्, अत्यन्तमधिकम् = अत्यधिकं, बलिनः = शक्तिशालिनः, अत्र, प्रवृद्धो = समृद्धः, कोषः = धनागारः, महती = विशाल, सेना = वाहिनीं, बहूनि = अनेकानि, दुर्गाणि = किलानि, बहवः = अनेके, वीराः = वीरसैनिकाः, च, सन्ति। तत्, आत्मनः = स्वस्य, शुभं = कल्याणम्, इच्छसि = वाञ्छ सि, चेत् = यदि, निखिलां = सकलां, चञ्चलतां = चपलतां, त्यक्त्वा = विमुच्य, शस्त्रं, दूरतः = दूरात्, परित्यज्य =विमुच्य, करप्रदतां = करदानम्, अङ्गीकृत्य = स्वीकृत्य, मत्सभायां = मम सभायां राजद्वारे, समागच्छ = आगाहि। मत्तः, प्राप्तपदः = प्राप्तं गृहीतं पदं स्थानं यं सः, चिर = दीर्घकालं, जीविष्यसि = जीवनं धारिष्यसि, अन्यथा तु, सुदुर्दशं = सुदुर्गतिं, निहतः = हतः, कथावशेषः = वृत्तान्तमात्रशेषः, संवत्स्यसि = भविष्यसि। तत् = अत एव केवलं, त्वयि, दयया = कृपया, एव सन्देशं = संवादं, प्रेषयामि = कथयामि, अङ्गीकुरु = स्वीकारं कुरु। वृद्धायाः = जीर्णायाः, प्रसविन्याः = मातुः, रजतश्वेतां = रजतं कलधौतं तद्वत् श्वेतां धवलां, पक्ष्मपक्तिं = पक्ष्यमयोः पंक्तिम् = आवलिम्, अश्रुप्रवाहदुर्दिने = अश्रुणां नयनजलानां प्रवाहः, धारा एव दुर्दिनं = वर्षापूर्णदिवसं तस्मिन्, मा स्म, पातय = क्षेपय।

गद्यांशव्याख्या – विजयपुरनरेशः कथयति यत् वीर! अस्माभिः सह युद्धार्थम् एतां नवीनां चञ्चलतां त्यज। (यतोहि) भवदपेक्षया वयम् अत्यन्तं शक्तिशालिनः स्मः, अत्र समृद्धकोषोऽपि विद्यते महती सेना चापि अस्ति। न केवलम् एतावदेव अनेकाणि दुर्गाणि बहवश्च वीरसैनिकाः अस्माकं सविधे सन्ति। यदि स्वीयं कल्याणम् इच्छति भवान् तर्हि सम्पूर्णचञ्चलतां परित्यज्य शस्त्रञ्च दूरात् विमुच्य करदानम् अङ्गीकृत्य मम सभाम् आगच्छतु। मत्तः पदं सम्प्राप्य भवान् दीर्घकालं जीविष्यति। अन्यथा तु दुर्दशया सह मृत्युं प्राप्स्यति। अतः केवलं कृपयैव सन्देशं प्रेषयामि, स्वीकरोतु। वृद्धायाः जनन्याः श्वेतां पक्ष्मपक्तिम् अश्रुप्रवाहदुर्दिने न पातयतु' अर्थात् स्वकर्मणा मातरं न रोदयतु इति।

विशेषः – प्रवृद्धः = प्र+वृध्+क्त+सु।

अङ्गीकृत्य = अङ्ग+च्वि+कृ+क्त्वा (ल्यप्)।

निहतः = नि+धा+क्त+सु।

संवत्स्यसि = सम्+वृत्त+लृट्+सिप्।

पातय = पत्+णिच्+लोट्।

मूलम् – शिववीरः – भगवन्! कथयेदेवं कश्चिद् यवनराजः, परं किं, भवानपि मामनुमन्यते – यद् ये अस्मदिष्टदेवमूर्तीर्भङ्क्त्वा, मन्दिराणि समुन्मूल्य, तीर्थस्थानानि पक्कणीकृत्य, पुराणानि पिष्ट्वा वेदपुस्तकानि विदार्य च, आर्यवंशीयान् बलाद् यवनीकुर्वन्ति; तेषामेव चरणयोरञ्जलिं बद्ध्वा लालाटिकतामङ्गीकुर्याम्? एवं चेद् धिङ् मां कुल-कलङ्कं क्लीबं; यः प्राणभयेन सनातनधर्मद्वेषिणां दासेरकतां वहेत्। यदि चाऽहमाहवे म्रियेय, वध्येय, ताड्येय वा, तदैव धन्योऽहं, धन्यौ च मम पितरौ। कथ्यतां भवादृशां विदुषामत्र का सम्मतिः?

गोपीनाथः – (विचार्य) राजन्! धर्मस्य तत्त्वं जानासि, तन्नाऽहं स्वसम्मतिं कामपि दिदर्शयिषामि। महती ते प्रतिज्ञा, महत्तवोद्देश्यमिति प्रसीदामितमाम्। नारायणस्तव साहाय्यं विदधातु।

शिववीरः – करुणानिधान! नारायणः स्वयं प्रकटीभूय न प्रायेण साहाय्यं विदधाति, किन्तु भवादृश-महाशय-द्वारैव। तत् प्रतिज्ञायतां काऽपि सहायता।

गोपीनाथः – राजन्! कथ्यतां किमहं कुर्याम्, परं यथा न मामधर्मः स्पृशेत्, तथैव विधास्यामि।

शिववीरः – शान्तं पापम्। कोऽत्राधर्मः? केवलं श्वोऽस्मिन्नुद्यानप्रान्तस्थ-पट-कुटीरे यवनसेनापतिः अपजलखानः आनेयः; यथा तेनैकाकिनाऽहमेकाकी मिलित्वा किमप्यालपामि।

गोपीनाथः – तत् सम्भवति।

प्रसङ्गः – अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन गोपीनाथपण्डितमुखात् विजयपुराधीशसन्देश-श्रवणानन्तरं शिववीरेण प्रदत्तोत्तरस्य वर्णनं कृतमस्ति।

पर्यायशब्दाः – भगवन् = श्रीमन्, कश्चिद्, यवनराजः = यवनभूपतिः, एवं = तादृशं, कथयेत् = उच्चारयेत्, परं = किन्तु, किं, भवनापि, मां = शिववीरम्, अनुमन्यते = अनुज्ञां ददाति, यद्, ये = यवनाः अस्मदिष्टदेवमूर्तीः = अस्माकम् इष्टस्य वाञ्छि तस्य देवस्य ईश्वरस्य मूर्तीः प्रतिमाः। भङ्क्त्वा = नष्ट्वा, मन्दिराणि = देवगृहाणि, समुन्मूल्य = नष्ट्वा, तीर्थस्थानानि = पुण्यस्थलानि, पक्कणीकृत्य = शबराणां नगरीं निर्माय, पुराणानि, पिष्ट्वा = चूर्णं कृत्वा, वेदपुस्तकानि = वेदान्, विदार्य = भिदित्वा, च, आर्यवंशीयान् = सनातनधर्मानुयायिनः, बलाद् = सशक्तेः, यवनीकुर्वन्ति = यवनाः निर्मान्ति, तेषामेव = एतादृशामेव, चरणयोः = पादयोः, अञ्जलिं = पाणिद्वयसंयोगं, बद्ध्वा = कृत्वा, लालाटिकतां = सेवाम्, अङ्गीकुर्यात् = स्वीकुर्यात्? एवं चेत् = यदि इदं भवेत्, मां कुलकलंकं = कुलस्य = वंशस्य, कलंकः = दोषः यः तं, क्लीबं = पुरुषार्थहीनं, यः, प्राणभयेन = मृत्युभीतेः, सनातनधर्मद्वेषिणां = सनातनः यः हिन्दूः धर्मः मनः तस्य द्वेषिणां विरोधिनां, दासेरकतां = दासतां, वहेत् = गृह्णीयात्। यदि च, अहम्, आहवे = युद्धे, म्रियेय = मृतः स्यां, बध्येय = मारितः स्यां, ताड्येय = पीड्येय, वा, तदा, एव, धन्यः = सौभाग्यशाली, अहं, धन्यौ = सौभाग्यशालिनौ, च, मम = मे, पितरौ = मातापितरौ। कथ्यतां = वदतु, भवादृशां = त्वादृशां, विदुषां = पण्डितानाम्, अत्र = अस्मिन् विषये का, सम्मतिः = मतम्? राजन् = भूपते! धर्मस्य = सनातनमतस्य, तत्त्वं = सारं, जानासि = अधिगच्छसि, तत् = अत एव, अहं = गोपीनाथः कामपि स्वसम्मतिं = स्वविचारं, न, दिदर्शयिष्यामि = दर्शयितुमिच्छामि। महती = महत्त्वपूर्णा, ते = तव, प्रतिज्ञा = वचनं, महत् = उच्चं, तव = ते, उद्देश्यं = लक्ष्यम् इति, प्रसीदामितमान् = अत्यन्तं प्रसीदामि। नारायणः = विष्णुः, तव, साहाय्यं = सहायतां, विदधातु = करोतु। करुणानिधान = दयागार, नारायणः, स्वयं = सशरीरं, प्रकटीभूय = आगत्य, प्रायेण = प्रायः, साहाय्यं = सहायतां, न, विदधाति = करोति, किन्तु, भवादृशमहाशयद्वारा = भवादृशाः त्वादृशमहापुरुषद्वारा, एव, तत् =

अतः, काऽपि, सहायतां = साहाय्यम्। प्रतिज्ञायतां = प्रणं क्रियतात् राजन्, कथ्यतां = वदतु, किम्, अहं, कुर्याम्, विधेयं, परं = किन्तु, यथा = येन, मां, अधर्मः = पापं, न, स्पृशेत् = भवेत्, तदैव = तदेव, विधास्यामि = करिष्यामि। शान्तं = विनाशं, पापं = दोषः, कोऽत्र, अधर्मः =पापं, केवलं, श्वः, अस्मिन् = तस्मिन्, उद्यानप्रान्तस्थपटकुटीरे = उद्यानस्य उपवनस्य, प्रान्तस्थः = उपान्तस्थः, पटस्य = वस्त्रस्य, कुटीरे = गृहे, यवनसेनापतिः = यवनानां सेनापतिः, कटकाध्यक्षः, अपजलखानः, आनेयः = आनेतव्यः, यथा = यस्मात्, एकाकिना तेन = सहायकरहितेन अपजलखाने, अहम्, एकाकी, मिलित्वा = संसर्गं कृत्वा, किमपि = किंचिद्, आलपामि = वार्तां करिष्यामि। तत् = इदं, सम्भवति = सम्भवमस्ति।

गद्यांशव्याख्या – पण्डितगोपीनाथस्य मुखात् अपजलखानस्य संदेशं श्रुत्वा शिववीरः उत्तरयति –

शिववीरः – भगवन्! कश्चिद् यवनराजः एवं वदति चेत् किं भवान् अपि माम् एतदर्थमनुमन्यते यत् येऽस्माकम् इष्टदेवानां प्रतिमाः खण्डयित्वा, मन्दिराणि विनश्य, तीर्थस्थलानि शबरनिवासस्थलानि विधाय, पुराणानि च चूर्णीकृत्य वेदान् च विदार्य सनातनधर्मावलम्बिनः बलाद् यवनान् निर्मान्ति, तेषामेव यवनानां चरणयोः अञ्जलिं बद्धवा किं सेवकत्वं स्वीकुर्याम? यदि एवं क्रियते तर्हि मादृशं कुलकलङ्कपुरुषार्थहीनं धिक्! यदि अहं युद्धे हतो भवामि अथवा पीडिता भवामि तर्हि एव धन्योऽस्मि, मम पितरौ चापि धन्यौ स्तः। भवान् कथयतु – अस्मिन् विषये भवादृशानां विदुषां का सम्मतिरस्ति?

गोपीनाथः – (विचिन्त्य) राजन्! धर्मस्य तत्त्वं भवान् जानाति। अतः अहम् अस्मिन् विषये न कामपि सम्मतिं दातुमिच्छामि। भवतः प्रतिज्ञा श्लाघनीया अस्ति। भवतः उद्देश्यमपि प्रशंसनीयम्। अतः अहं भवति प्रसन्नोऽस्मि। भगवान् नारायणः भवतः साहाय्यं कुर्यात्।

शिववीरः – करुणानिधान! नारायणः सशरीरम् आगत्य प्रायः सहायतां न करोति। अपितु भवादृशमहानुभावानां माध्यमेनैव सहायतां कारयति। अत एव कामपि सहायतां कर्तुं प्रतिज्ञां कुर्वन्तु भवन्तः।

गोपीनाथः – राजन्! उच्यतां, मया किं करणीयम्? परन्तु येन प्रकारेण अधर्मः मां न स्पृशेत्, अहं तथैव करिष्यामि।

शिववीरः – शान्तं पापम्। अत्र अधर्मः कः? केवलं श्वः अस्य उद्यानस्य पार्श्वस्थपटकुटीरे यवनसेनापतिरेव अर्थात् अपजलखानः एव आनेतव्यः। यस्मात् एकान्ते तेन सह मेलयित्वा अहं किञ्चित् वार्त्तालापं करवाणि।

गोपीनाथः – इदं सम्भवम् अस्ति।

विशेषः – कथयेत् = कथ्+वि०लि० (प्र०पु०, एकवचनम्)।

अनुमन्यते = अनु+मन्+लट् (प्र०पु०, एकवचनम्)।

पिष्ट्वा = पिश्+क्त्वा।

बद्धवा = बध्+क्त्वा।

बध्येय = बध्+णिच्+वि०लि०।

भवादृश = भवत्+दृश्+क्विन्।

निधानम् = नि+धा+ल्युट्।

प्रकटीभूय = प्रकट+च्वि+भू+ल्यप्।

प्रान्तस्थ = प्रान्त+स्था+क।

सम्भवति = सम्+भू+लट्।

मूलम् – ततः परं गोपीनाथेन सह शिववीरस्य बहुविधा आलापा अभूवन्, यैः शिववीरस्य उदारहृदयतां धार्मिकतां शूरताञ्चावगत्य गोपीनाथोऽतितरां पर्य्यतुष्यत्।

अथ स तमाशीर्भिरनुयोज्य यावत्प्रतिष्ठते, तावदुपातिष्ठत् ससहचरस्तानरङ्गः। गोपीनाथस्तु तमनवलोकयन्निव तस्मिन्नेव निशीथे दुर्गादवातरत्। कपटगायको गौरसिंहस्तु शिववीरेण सह बहुश आलप्य, सेनाऽभिनिवेश-विषये च सम्मन्त्र्य, तदाज्ञातः स्ववासस्थानं जगाम।

शिववीरोऽप्यन्यसेनापतीन् यथोचितमादिश्य, स्वशयनागारं प्रविश्य होरात्रयं यावत्किञ्चन निद्रासुखमनुभूय, अल्पशेषायामेव रजन्यामुदतिष्ठत्।

शिववीरसेनास्तु यथासंकेतं प्रथममेव इतस्ततो दुर्गप्रचीरान्तरालेषु गहन-लता-जालेषु उच्चावच-भूभाग-व्यवधानेषु सज्जाः पर्यवातिष्ठन्त। बहवो अश्वारोहा यवन-पट-कुटीर-कदम्बकं परिक्रम्य ततः पश्चादागत्य, अवसरं प्रतिपालयन्ति स्म।

प्रसङ्गः - अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन अपजलखानस्य सैनिकानां मध्ये व्याप्तहतोत्साहिता वर्णिता अस्ति।

पर्यायशब्दाः - ततः परं = तदनन्तरं, गोपीनाथेन सह = साकं, शिववीरस्य बहुविधाः = अनेकप्रकाराः, आलापाः = वार्ताः, अभूवन्, यैः = आपालैः, शिववीरस्य, उदारहृदयतां = हृदयविशालतां, शूरतां = वीरतां च, अवगत्य = ज्ञात्वा, गोपीनाथः, अतितराम् = अत्यधिकं, पर्य्यतुष्यत् = अतृपद्। अथ = ततः, सः = गोपीनाथः, तं = शिववीरम्, आशीर्भिः = आशीर्वचोभिः, अनुयोज्य = योजयित्वा। तावत्, प्रतिष्ठते = प्रस्थानमकरोत्, तावत्, ससहचरः = ससखः, तानरङ्ग, उपातिष्ठत् = आगच्छत्। गोपीनाथः तु, तं = तानरङ्गम्, अनवलोकयन् = न पश्यन् इव, सदृशं, तस्मिन् एव, निशीथे = अर्धरात्रौ, दुर्गात् = प्रतापदुर्गात्, अवतरत् = अवारोहत्, कपट-गायकः = कपटेन छलेन गायकः, संगीतज्ञः = गौरसिंहः, तु, शिववीरेण, सह = समं, बहुशः = अनेकशः, आलाप्य = विचार्य, सेनाऽभिनिवेश-विषये = सेनायाः = वाहिन्याः अभिनिवेशः स्थितिः तस्मिन् विषये सम्बन्धे, च सम्मन्त्र्य = विचार्य, तदाज्ञातः = तस्य शिववीरस्य आज्ञाम् = अनुज्ञां प्राप्तः, स्ववासस्थानं = स्वस्य गौरसिंहस्य वासस्य निवासस्य स्थानम्। जगाम = यायात्। शिववीरोऽपि, अन्यसेनापतीन् = इतरकटकाध्यक्षान्, यथोचितं = यथायोग्यम्, आदिश्य = निर्देशं दत्वा, स्वशयनागारं = स्वस्य शयनागारं, निशावासगृहं, प्रविश्य = गत्वा, होरात्रयं यावत्। किञ्चन् = अल्प, निद्रासुखं = निद्रायाः शयनस्य सुखं कलम्, अनुभूय = प्राप्य, अल्पशेषायाम् = अल्पं किञ्चित्, शेषम् अवशिष्टं यस्याः सा तस्यां, रजन्यां = रात्रौ, उदतिष्त्। शिववीरसेनाः = शिववीरस्य सेनाः वाहिन्यः, तु यथासङ्केतं = सङ्केतानुसारं, प्रथममेव = पूर्वमेव, इतस्ततः = अत्र, तत्र दुर्गप्राचीरान्तरालेषु = दुर्गाणां किलानां प्राचीराणां, वेष्टिनीनाम् अन्तरालेषु मध्येषु। महालता-जालेषु = गहनानां सघनानां लतानां बल्लरीणाम् आलेषु समूहेषु, उच्चावचभूभाग-व्यवधानेषु = उच्चानि उन्नतानि अवचानि अवनतानि च भूभागाः प्रदेशा:त`षांॅ यवधानेषुम ध्येषु,स ज्जा:= स ुसज्जिता:,प र्यवातिष्ठन्त= अ ासन्,ब हव:= अ नेकत:,अ श्वारोहा:= सैन्धवोरूढाः, यवन-पट-कुटीर-कदम्बकं = यवनानां पटकुटीराणां वस्त्रगृहाणानां कदम्बकसमूहं, परिक्रम्य = परिगत्य, ततः = तस्मात्, पश्चादागत्य = प्रत्यागत्य, अवसरम् = उपयुक्तसमयं, प्रतिपालयन्ति स्म = प्रतीक्षाम् अकुर्वन्।

गद्यांशव्याख्या - तदनन्तरं गोपीनाथपण्डितेन सह शिववीरस्य अनकेविधा वार्तालापाः सञ्जाताः। यैः वार्तालापैः शिववीरस्य उदारहृदयतां, धार्मिकतां वीरताञ्च ज्ञात्वा गोपीनाथः अत्यधिकः सन्तुष्टो जातः।

ततः परं सः गोपीनाथपण्डितः तस्मै शिववीराय आशीर्वादान् प्रदाय यावत् प्रस्थानमकरोत्, तावत् सहचरेण सह तानरङ्गः तत्र आगच्छत्। गोपीनाथपण्डितः अपि तं गौरसिंहम् अपश्यन् इव तस्यामेव अर्द्धरात्रौ प्रतापदुर्गात् अवतरितवान्। छलगायकः गौरसिंहस्तु शिववीरेण सह अनेकशः विचारं विधाय सेनासज्जाविषये च मन्त्रणां कृत्वा तस्य शिववीरस्य अनुज्ञां सम्प्राप्य स्वनिवासं गतवान्।

शिववीरः अपि अन्यान् सेनापतीन् समुचितम् आदिश्य स्वशयनभवनं गत्वा होरात्रयं यावत् किञ्चित् निद्रायाः अनुभूतिं कृत्वा अल्पशेषायामेव रात्रौ पुनः उदतिष्ठत्।

शिववीरस्य सेनाः तु सङ्केतानुसारं पूर्वमेव इतस्ततः दुर्गप्राचीरमध्येभागेषु गहनेषु लतागुल्मेषु उच्चावचभूभागव्यवधानेषु च सज्जिताः भूत्वा परितः स्थिताः सञ्जाताः। बहवः अश्वारोहिणः यवनानां पटकुटीरसमूहं परिक्रम्य ततः आगत्य च उपयुक्तसमयं प्रतीक्षन्ते स्म।

विशेषः – आलापः = आङ्+लप्+घञ्।

अवगत्य = अव+गम्+ल्यप्।

अनुयोज्य = अनु+युज्+ल्यप्।

प्रतिष्ठते = प्र+स्था+लट्।

उपातिष्ठत् = उप+स्था+लङ्लकारः।

अवलोकयन् = अव+लोक्+शतृ।

गायकः = गै+ण्वुल् (अक)+सु।

अनुभूय = अनु+भू+क्त्वा (ल्यप्)।

प्रतिपालयन्ति = प्रति+पाल्+णिच्+लट्लकारः।

मूलम् - इतश्च सूर्यप्रभाभिररुणी-क्रियमाणे भूभागे अरुण-श्मश्रवोऽपि सेनाः सज्जीकृतवन्तः।

बहवो - ''वयमद्य शिवमवश्यमेव विजेष्यामहे; परं तथाऽपि न जानीमहे किमिति कम्पत इव हृदयम्, अहो! विलक्षणः प्रताप एतस्य, पवनेऽपि प्रवहति, पतत्रेऽपि पतति, पत्रेऽपि मर्मरीभवति, स एवाऽऽगत इत्यभिशङ्क्यतेऽस्माभिः। अहह!! विचित्रोऽयं वीरो, यो दुर्गप्राचीरमुल्लंघ्य, प्रहरिपरीवारमविगणय्य, लोहार्गलशृंखलासहस्रनद्धानि करिकुम्भाघातसहानि द्वाराणि प्रविश्य, विकोशचन्द्रहासाऽसिधेनुकारिष्टितोमशक्तित्रिशूलमुद्गरभुशुण्डीकराणां रक्षकाणां मण्डलमवहेत्य, प्रियाभिः सह पर्य्यङ्केषु सुप्तानामपि प्रत्यर्थिनां वक्षःस्थलमारोहति, निद्रास्वपि तान् न जहाति, स्वप्नेष्वपि च विदारयति। कथमेमतस्य चञ्चच्चन्द्रहास-चमत्कार-चाकचक्य-चिल्लीभूत-चक्षुष्काः समराङ्गणे स्थास्यामः? इति चिन्ताचक्रमारूढा अपि कथं कथमपि कैश्चित् वीरवरैर्वर्धितोत्साहाः समरभूमिमवातरन्।

प्रसङ्गः:- अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन शिववीरेण सह युद्धं कर्तुं यवनसेनायाः सज्जतायाः वर्णनं कृतमस्ति।

पर्यायशब्दाः - वयम्, अद्य, शिव = शिववीरम्, अवश्यमेव = निश्चितमेव, विजेष्यामहे = पराजितं करिष्यामः, परं = किन्तु, तथाऽपि = तदपि, न, जानीमहे = जानीमः, किमिति, कम्पते = धुनोति, इव, हृदयं = मनः, अहो = आश्चर्यसूचकः, अव्ययः, एतस्य = शिववीरस्य, प्रतापः = प्रभावः, विलक्षणः = अद्वितीयः, पवने = वायौ, अपि, प्रवहति = चलति, पतत्रेऽपि = खगेऽपि, पतति = उड्डीयमाने, पत्रेऽपि = किसलयेऽपि, मर्मरीभवति = मर्मरिति शब्दे सति, सः = शिववीरः, एव, आगतः = आयातः, इति, अस्माभिः = यवनसैनिकैः, अभिशक्यते = शंका क्रियते। अहह, विचित्र = अद्भुतः, अयं, वीरः = शूरवीरः, यः, दुर्गप्राचीरं = दूर्गस्य प्राचीरं वेष्टिनीं, उल्लंघ्य = उत्क्रम्य, प्रहरिः परीवारमविगणय्य प्रहरीणां रक्षकाणां परिवारम् अविगणय्य अवहेल्य। लोहार्गलशृङ्खलासहस्रनद्धानि = लौहस्य लोहस्य अर्गलानां

जंजीराणां शृंखलाणां पंक्तीनां सहस्त्रं ते नद्धानि, बद्धानि, करिकुम्भाघात = सहानि = करीणाम्, इमानां कुम्भानां मस्तकानाम्, आघातं प्रहारं सहन्ते ये ते। द्वाराणि, प्रविश्य = प्रवेशं कृत्वा, विकोशचन्द्रहासऽसिधेनुकारिष्टितोमरशक्तित्रिशूलमुद्‍गर-भुशुण्डीकराणां = नयनचन्द्रहासऽसिधेनुकारिष्टितोमशक्ति-त्रिशूलमुद्गरभुशुण्डीहस्तानां, रक्षकाणां = पालकानां, मण्डलं, समूहम्, अवहेल्य = अवगण्य्य, प्रियाभि: = कान्ताभि:, सह पर्य्यङ्केषु, शयनेषु = सुप्तानां, निद्राप्राप्तानां, प्रत्यर्थिनां = शत्रूणां, वक्ष:स्थलम् = उर:स्थलम्, आरोहति, निद्रासु = शयनेषु, अपि, तान् = शत्रून्, न, जहाति = मुञ्चति, स्वप्नेषु, अपि, च, विदारति = हन्ति। कथं = केन प्रकारेण, एतस्य = शिववीरस्य, चञ्चच्चन्द्रहास-चमत्कारचाकचक्यचिल्लीभूतचक्षुष्का: = समराङ्गणे = युद्धक्षेत्रे, स्थास्याम: = योत्स्यामहे? इति, चिन्ताचक्रं = चिन्ताया: आशंकाया:, चक्रम्, आरूढा: = धृता:, बहव: = अनेके यवनसैनिका:, कथं = कथमपि, येन येन प्रकारेण, कैश्चित्, वीरवरै: = वीरेषु शूरेषु वरै: श्रेष्ठै:, वर्धितोत्साहा:, वर्धितं वितानितम् उत्साहं, साहसं येषां, ते समरभूमिं, युद्धक्षेत्रम्, अवातरन् = आगच्छन्।

गद्यांशव्याख्या - एकस्मिन् पक्षे तु सूर्यस्य प्रकाशेन यदा पृथ्वी रक्तवर्णीया सञ्जाता तदा रक्तश्मश्रुयवनसेना अपि सुसज्जिता: सञ्जाता:। अनेके यवनसैनिका: तु - अद्य अस्माभि: शिववीर: नूनमेव जेतव्य:, परन्तु न जानीम: यत् अस्माकं हृदयं कथं कम्पमानमिव अस्ति। अहो! अस्य शिववीरस्य प्रताप: महान् अस्ति। अत एव पवनस्य प्रवाहेऽपि खगस्य उड्डयनेऽपि, पत्राणां मर्मर् इति ध्वनिनापि च स: शिव एव आगत: इत्येव अस्माकं शङ्का भवति। अहह! विचित्र: अयं वीर:, य: दुर्गप्राकारं उल्लंघ्य प्रहरिगणम् उपेक्ष्य लोहार्गलशृंखलासहस्रबद्धानि करिकुम्भानामाघातान् सोढुं योग्यानि द्वाराणि प्रवेशं कृत्वा नग्नचन्द्रहासऽसिधेनुकारिष्टितोमशक्तित्रिशूलमुद्‍गर-भुशुण्डिहस्तानां रक्षकाणां समूहम् अवगण्य्य कान्ताभि: सह शय्यासु सुप्तानामपि शत्रूणां हृदयम् आरोहति निद्रासु अपि तान् न त्यजति स्वप्नेषु अपि विदारयति च। अस्य शिववीरस्य चञ्चलखड्गचमत्कारस्य चाकचक्येन चमत्कृतनेत्रा: वयं कथं युद्धक्षेत्रे युद्धं करिष्याम:? इत्येवं प्रकारेण चिन्ताग्रस्ता: अपि यथा कथञ्चित् कैश्चित् श्रेष्ठवीरै: प्रेरिता: सन्त: युद्धभूमिम् आगच्छन्।

विशेष: - मर्मरीभवति - मर्मर+च्वि+भू+शतृ (सप्तमी विभक्ति:, एकवचनम्)।

आरुढा - आ+रूह्+क्त+जस्।

अवहेल्य = अव+हेल्+क्त्वा (ल्यप्)।

पतति = पत्+शतृ (सप्तमी विभक्ति:, एकवचनम्)।

मूलम् - **अथ कथंचित् प्रकाश-बहुले संवृत्ते नभ:स्थले, परस्परं परिचीयमानासु आकृतिषु, कमलेष्विव विकचतामासादयत्सु वीरवदनेषु, भ्रमरालिष्विव परित: प्रस्फुरन्तीषु असि-पंक्तिषु, चाटकैर-चककायितेषु; कवचचमत्कारेषु गोपीनाथ-पण्डितो वारमेकं शिववीरदिशि परतश्च यवनसेनापति-दिशि गतागतं विधाय, सेनाद्वयस्य मध्य एव कस्मिंश्चित् पटकुटीरे अपजलखानमानेतुं प्रबबन्ध।**

शिववीरोऽपि कौशेय-कञ्चुकस्याऽन्तर्लौहवर्म परिधाय, सुवर्णसूत्रग्रथितोष्णीषस्याऽप्यधस्तादयसं शिरस्त्राणं संस्थाप्य, सिंहनख-नामकं शस्त्रविशेषं करयोरारोप्य, दृढबद्धकटिरपजलखानसाक्षात्काराय सज्जस्तिष्ठति स्म।

प्रसङ्ग: - अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन उभयो: सेनयोर्मध्ये स्थिते पटकुटीरे अपजलखान शिववीरयो: सम्मेलनं कारयितुम् उद्यतस्य गोपीनाथपण्डितस्य क्रियाकलाप: वर्णित: अस्ति।

पर्यायशब्दा: - अथ = तदनन्तरं, कथञ्चित् प्रकाश-बहुले = ज्योत्यधिके, संवृत्ते = प्रसृते, नभ:स्थले = आकाशे, परस्पर, परिचीयमानासु = अवगम्यमानासु, आकृतिषु = मुखाकृतिषु, कमलेषु = सरोजेषु, इव, विकचतां =

प्रफुल्लतां, आसादयत्सु = वीरवदनेषु = वीराणां शूराणां वदनेषु, मुखेषु, भ्रमरालिषु = भ्रमराणां मधुराणां आलिषु पंक्तिषु, परितः = समन्तात्, प्रस्फुरन्तीषु = सचलनतीषु, असि-पंक्तिषु = असीनां चन्द्रहासां पंक्तिषु आलिषु, चटकैः चटकनामकैः = पक्षिविशेषैः, चकचकायितेषु = कवच-चमत्कारेषु वर्मशब्दायितेषु, गोपीनाथः = पण्डितः, वारमेकं = सकृत्, शिववीर - दिशि = शिववीरस्य, दिशि = आशायां, परतश्च = ततश्च, यवन-सेनापतिदिशि = यवनानां सेनापतेः, सेनाध्यक्षस्य दिशि = आशायां, गतागतं = गमनागमनं, विधाय = कृत्वा, सेनाद्वयस्य = मराठायवनकटकयोः, मध्ये = अन्तरे, एव कस्मिंश्चित् = कस्मिन्, पट-कुटीरे = वस्त्रगृहे, अपजलखानम्, आनेतुं प्रबबन्ध = व्यवस्थामकरोत्।

शिववीरोऽपि, कौशेयकञ्चुस्य = कौशेयं दुकूलं कञ्चुकं शरीरपरिवेष्टनाय वस्त्रं तस्य, अन्तः = अधस्तात्, वर्मं = कवचं, परिधाय = गृहीत्वा, सुवर्णसूत्रग्रथितोष्णीषस्य = सुवर्णस्य कञ्चनस्य सूत्रैः तारैः ग्रथित निर्मितः उष्णीषशिरोवेष्टनः तस्य अपि, अधस्तात् = अधः, आयसं = लौहं शिरस्त्राणः = शिरसः, रक्षाकवचं, संस्थाप्य = धारित्वा, सिंहनखनामकं = शस्त्रविशेषं = विशिष्टं शस्त्रं, करयोः = भुजयोः, आरोप्य - परिधाय, दृढबद्धकटिः = दृढेन प्रगाढेन बद्धः नद्धः कटिः शरीर मध्यभागः यस्य सः, अपजलखानसाक्षात्काराय = अपजलखानस्य, साक्षात्काराय, मेलितुं सज्जः तिष्ठति = उपविशति स्म।

गद्यांशव्याख्या - तदनन्तरम् आकाशे अत्यधिकप्रकाशे प्रसृते सति, परस्परम् अवगम्यमानासु मुखाकृतिषु, सरोजेषु इव प्रफुल्लितवीरमुखेषु, भ्रमरपङ्क्तिषु इव खड्गपङ्क्तिषु परितः प्रस्फुरन्तीषु, चकचकायमानेषु चाटकैः पक्षिषु, शब्दायमानेषु कवचेषु (सत्सु) गोपीनाथपण्डितः एकवारं शिववीरस्य दिशि ततश्च यवनसेनापतिदिशि च गमनागमनं कृत्वा उभयोः सेनयोर्मध्ये एकस्मिन् पर्णकुटीरे अपजलखानम् आनेतुं व्यवस्थाम् अकरोत्।

शिववीरोऽपि कौशेयकञ्चुकस्य अधः लौहकवचं परिधाय, सुवर्णसूत्रछूरितोष्णीषस्य अधः लौहमयं शिरस्त्राणं हस्तयोश्च सिंहनखनामकं शस्त्रविशेषं धारयित्वा कटिं दृढं बद्ध्वा अपजलखानस्य साक्षात्काराय सज्जः उपविष्टः आसीत्।

विशेषः - संवृत्ते = सम्+वृत्+क्त+ङि।

परिचीयमानासु = परि+चि+शानच्+सुप्।

आसादयत्सु = आ+सद्+णिच्+शतृ+सुप्।

प्रस्फुरन्तीषु = प्र+स्फुर्+शतृ+ङीप्+सुप्।

विधाय = वि+धा+क्त्वा (ल्यप्)।

संस्थाप्य = सम्+स्था+णिच्+क्त्वा (ल्यप्)।

सज्जः = सज ् +क्त+सु।

मूलम् - अपजलखानोऽपि च - "यदाऽहमेनं साक्षात्कृत्य, करताडनमेकं कुर्य्याम्, तदैव तालिकाध्वनिसमकालमेव अमुकामुकैः श्येनैरिवाऽभिपत्य पाशैरेष बन्धनीयः, सेनया च क्षणात् तत्सेना झङ्क ाया घनघटेवापनेया"। इति संकेत्य, सूक्ष्म-वसन-परिधानः, वज्रक-जटितोष्णीषिकः, गलविलुलित- पद्मरागमालः; मुक्ता-गुच्छ-चोचुम्ब्यमान-भालः, निश्वास-प्रश्वास-परिमथित-मद्यगन्ध-परिपूरित-पार्श्व-देशान्तरालः, शोण-श्मश्रुकूर्च-विजित-नूतन-प्रवालः, कञ्चुक-स्यूत-काञ्चन-कुसुमजालः, विविधवर्ण-वर्णनीय-शिविकामारुह्य निर्दिष्टपटकुटीराभिमुखं प्रतस्थे।

इतस्तु कुरङ्गमिव तुरङ्गं नर्त्तयन् रश्मिग्राह-वेषेण गौरसिंहेनाऽनुगम्यमानः माल्यश्रीक-प्रभृतिभिर्वीरवैर्युद्ध-सज्जैः सतर्कं निरीक्ष्यमाणः शिववीरोऽपि तस्यैव संकेतितस्य समागमस्थानस्य

निकटे एव सव्यकरेण वल्गामाकृष्याऽश्वमवारुधत्।

प्रसङ्गः – अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन स्वसैनिकान् प्रति कूटयोजनां निर्दिश्य शिववीरेण सह साक्षात्काराय गतस्य अपजलखानस्य वर्णनं कृतमस्ति।

पर्यायशब्दाः – अफजलखानोऽपिच ,य दा,अ हम्= अ फजलखानः,ए वं= ि शववीरं,स ाक्षात्कृत्य= मिलित्वा, एकं केवलं, करताडनं = करध्वनिं, कुर्यां = विधेयं, तदैव = तत्क्षणमेव, तालिकाध्वनिसमकालं = तालिकायाः तालस्य ध्वनेः शब्दस्य समकालम्, एव = समम् एव, अमुकामुकैः = निर्दिष्टवीरैः, श्येनैः = बाजैः, इव, अभिपत्य = आक्रमणं कृत्वा, पाशैः = बन्धनैः, बन्धनीयः = बन्धितुं योग्यः, सेनया = वाहिन्या, च, क्षणात् = तत्क्षणं, तत्सेना = तत् शिववीरस्य सेना = वाहिनी, झझ् ाया = तीव्रवायुना, घनघटा = अविरला मेघमाला, अपनेया = नष्टव्या, इति, संकेत्य = आदिश्य, सूक्ष्मवसनपरिधानः = सूक्ष्मवसनानां = सूक्ष्मपटानां परिधानानि यस्य सः, वज्रकजटितोष्णीषिकः = वज्रकेण हीरेण जटितः खचितः उष्णीषः शिरोवेष्टनः यस्य सः, गलविलुलितपद्मरागमालाः = गले कण्ठे विलुलिता शोभिता, पद्मरागाणां रक्तवर्णानां रक्तवर्णमणीनां माला स्रग् यस्मिन् सः, मुक्तागुच्छचोचुम्ब्य–मानभालः = मुक्तानां मौक्तिकाना गुच्छेन स्तब्केन चोचुम्ब्यमानं स्पर्शमाणं भाल मस्तकं यस्य सः, निश्वासप्रश्वासपरिमथित–मद्यगन्धपरिपूरितपार्श्वदेशान्तरालः = निश्वासप्रश्वासाभ्यां प्राणवायवाागमननिगमनाभ्यां परिमथितः निसृतः मद्यस्य सुरायाः गन्धेन दुर्गन्धेन परिपूरिताः व्याप्ताः पार्श्वस्य समीपस्य देशस्य, अन्तरालः येन सः, शोणश्मश्रुकूर्चविजितनूतनप्रवालः = शोणौ रक्तवर्णौ श्मश्रूकूर्चौ ताभ्यां विजितं तिरस्कृतं नूतनं नवीनं प्रवालं पत्रं येन सः कञ्चुकस्यूतकाञ्चकुसुमजालः कञ्चुके = वस्त्रे, स्यूतः = ग्रथितं, काञ्चनानां = सौवर्णानां, कुसुमानां = पुष्पाणां, जालं = समूहं यस्मिन् सः, विविधवर्णवर्णनीयशिविकां – विविधानि = अनेकानि, वर्णानि अत एव वर्णनीया प्रशंसनीयां शिविकां पालकीम्, आरुह्य = स्थित्वा, निर्दिष्टपटकुटीराभिमुखं = निर्दिष्टः निश्चितः पटकुटीरः तस्य अभिमुखं, प्रतस्थे = प्रस्थानम् अकरोत्। इतस्तु = अत्र, कुरङ्ग = हरिणं, इव, तुरङ्ग = अश्वं, नर्त्तयन् = रश्मिग्राह–वेषेण = रश्मिग्राहस्य सारथेः वेषेण रूपेण, गौरसिंहेन, अनुगम्यमानः = पश्चाद्गम्यमानः, युद्धसज्जैः = युद्धाय रणाय सज्जैः, तत्परैः, माल्यश्रीकप्रभृतिभिः = माल्यश्रीकादिभिः, वीरवरैः = वीरेषु शूरेषु वरैः श्रेष्ठैः, सतर्कं = सतर्कतापूर्वकं, निरीक्ष्यमाणः = प्रेक्ष्यमाणः, शिववीरोऽपि तस्यैव संकेतितस्य = तस्यैव निर्दिष्टस्य, समागमस्थानस्य = समागमस्य मिलनस्य स्थानं प्रदेशं तस्य, निकटे एव = समीपे एव, सव्यकरेण = वामकरेण, बल्गां = खलीलम्,आकृष्य = दृढं कृत्वा, अश्वं = तुरङ्गम्, अवारुधत् = अरुधत्।

गद्यांशव्याख्या– अपजलखानश्चापि – ''यदैव अहं तेन शिववीरेण सह मिलित्वा एकवारं करताडनं करिष्यामि तदैव करताडनध्वनिं श्रवणसमनन्तरमेव श्येनैः इव अमुकामुकैः सैनिकैः सहसैव आक्रमणं कृत्वा अस्य शिववीरस्य पाशैः बन्धनं कर्त्तव्यम्। सेनाऽपि तत्क्षणमेव, तीव्रवायुयुक्तमेघमालेव तस्य शिववीरस्य सेनां नाशयतु एवं प्रकारेण निर्देशनं कृत्वा सूक्ष्मवस्त्राणि धृत्वा हीरकखचितोष्णीषं धृत्वा,कण्ठे पद्मरागमणिमालां धृत्वा, मुक्तागुच्छेन चोचुम्ब्यमानभालः, निःश्वासप्रश्वासाभ्यां निःसृतेन मद्यगन्धेन समीपस्थान् भूभागान् पूरयन्, रक्तश्मश्रुकूर्चाभ्यां तिरस्कृतनवपल्लवः कञ्चुके स्यूतकाञ्चनकुसुमजालः अनेकवर्णैः युक्तां शिविकाम् आरुह्य निर्दिष्टपटकुटीरं प्रति प्रस्थितवान्।

अपरस्मिन् पक्षे तु हरिणमिव अश्वं नर्त्तयन् सारथिवेषेण गौरसिंहेन अनुगम्यमानः युद्धार्थं तत्परैः माल्यश्रीकादीभिः वीरश्रेष्ठैः सावधानतया विलोक्यमानः शिववीरोऽपि तस्यैव संकेतितस्य सम्मेलनस्थलस्य समीपे एव वामहस्तेन खलीलम् आकृष्य अश्वम् अरुधत्।

विशेषः – साक्षात्कृत्य = साक्षात्+कृ+क्त्वा (ल्यप्)।

अभिपत्य = अभि+पत्+क्त्वा (ल्यप्)।

बन्धनीयः = बन्ध्+अनीयर्+सु।

अपनेया = अपनेतुं योग्या, अप+नी+यत्+टाप्।

परिधानः = परि+धा+ल्युट्+सु।

चोचुम्ब्यमानः = चुबि+यङ्+शानच्+सु।

निःश्वासः = निर्+श्वस्+घञ्।

विजित = वि+जि+क्त।

प्रतस्थे = प्र+स्था+लिट्+त।

नर्त्तयन् = नृत्+णिच्+शतृ+सु।

अनुगम्यमानः = अनु+गम्+शानच्+सु।

मूलम् - ततस्तु, इतोऽश्वात् शिववीरः, ततस्तु शिविकातोऽपजलखानः अपि युगपदेवावाऽतरतां, परस्परं साक्षात्कृत्य च, उभावप्युत्सुकाभ्यां नयनाभ्यां, सत्वराभ्यां पादाभ्यां, स्वागताऽऽम्रेडनतत्परेण वदनेन, आश्लेषाय प्रसारिताभ्यां च हस्ताभ्यां कौशेयास्तरण-विरोचितायां बहिर्वेदिकायां धावमानौ परस्परमालिलिङ्गतुः।

शिववीरस्तु आलिङ्गन-च्छलेनैव स्वहस्ताभ्यां तस्य स्कन्धौ दृढं गृहीत्वा सिंहनखैर्जत्रुणी कन्धरां च व्यपाटयत्।रुधिरदिग्धं च तच्छरीरं कटि-प्रदेशे समुत्तोल्य भूपृष्ठेऽपोथयत्।

प्रसङ्गः - अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन शिववीरेण हतस्य अपजलखानस्य हननघटना वर्णिता अस्ति।

पर्यायशब्दाः - ततस्तु = तदनन्तरम्, इतः = अत्र, अश्वात् = तुरङ्गात्, शिववीरः, ततः = तत्र, तु शिविकातः = शिविकायाः, अपजलखानोऽपि, युगपदेव = सहैव, अवतरताम् = अवारुहतां, परस्परं, साक्षात्कृत्य = प्रेक्ष्य, च, उभौ = शिववीरापजलखानौ, अपि, उत्सुकाभ्याम् = उत्कण्ठिताभ्यां, नयनाभ्यां = नेत्राभ्यां, सत्वराभ्यां = तीव्राभ्यां, पादाभ्यां = चरणाभ्यां, स्वागताऽऽम्रेडनतत्परेण = वारं वारं स्वागतनिवेदनतत्परेण, वदनेन = मुखेन, आश्लेषाय = आलिङ्गनाय, प्रसारिताभ्यां = विस्तारिताभ्यां, हस्ताभ्यां = कराभ्यां, कौशयास्तरणविरोचितायां = कौशेयेन दुकूलेन अस्तरणेन वस्त्रेण विरोचितास ुशोभिताता स्यां,ब हिः,व ेदिकायांम ार्गं,ध ावमानौ= त ीव्रगतिनाग च्छन्तौ,प रस्परम्,अ ालिलिङ्गतुः= आलिङ्गनमकुरुताम्। शिववीरस्तु = आलिङ्गनेच्छलेन = आलङ्गनस्य आश्लेषस्य छलेन व्याजेन, एव, स्वहस्ताभ्यां = स्वकराभ्यां, तस्य = अफजलखानस्य, स्कन्धौ = अंसौ, दृढं = बलेन, गृहीत्वा = धारयित्वा, सिंहनखैः = सिंहनखनामकैः, अस्त्रविशेषैः, जत्रुणी = स्कन्धयोः सन्धी, कन्धरां ग्रीवां च, व्यपाटयत् = अविदारयत्। रुधिरदिग्धं = रुधिरेण रक्तेन दिग्धं व्याप्तं च, तच्छरीरं = तस्य शरीरं, देहं, कटिप्रदेशे = शरीरमध्यभागे, समुत्तोल्य = उत्क्षिप्य, भूपृष्ठे भुवः पृथिव्यां, पृष्ठे तले, अपोथयत् = अक्षिपत्।

गद्यांशव्याख्या - तदनन्तरम् एक भागात् अश्वात् शिववीरः अपरभागाच्च शिविकातः अपजलखानः युगपदेव अवतरितवन्तौ परस्परञ्च दृष्ट्वा द्वौ अपि उत्कण्ठित नेत्राभ्यां तीव्रचरणाभ्यां मुखेन वारं वारं स्वगतवचनानि उक्त्वा मिथ आलिङ्गनार्थं प्रसारितहस्ताभ्यां कौशेयप्रच्छदसुशोभितायां बहिर्वेदिकायां धावमानौ अन्योन्यम् आलिङ्गनम् अकुरुताम्।

शिववीरः तु आलिङ्गनव्याजेनैव स्वहस्ताभ्यां तस्य अपजलखानस्य स्कन्धौ सुदृढं गृहीत्वा सिंहनखनामकैः अस्त्रविशेषैः अंसयोः सन्धीकन्धरां च व्यदारयत्, रुधिरयुक्तञ्च तस्य शरीरं कटिप्रदेशे उत्क्षिप्य धरायाम् अपातयत्।

विशेषः - अवातरताम् = अव+तृ+लङ्+तस्।

आश्लेषाय = आ+श्लिष+घञ्+ङे।

धावमानौ = धाव्+शानच्+औ।
व्यपाटयत् = वि+पट्+णिच्+लङ्+तिप्।
दिग्ध = दिह्+क्त।
समुतोल्य = सम्+उत्+तुल्+णिच्+क्त्वा (ल्यप्)।
अपोथयत् = पुथ्+णिच्+लङ्-तिप्।

मूलम् - तत्क्षणादेव च शिववीरध्वजिन्यां महाध्वज एकः समुच्छ्रितः। तत्समकालमेव यवन-शिविरस्य पृष्ठस्थिता शिववीर-सेना शिविरमग्निसात्कृतवती, पुरःस्थितसेनासु च अकस्मादेव महाराष्ट्र-केसरिणः समपतन्। तेषां 'हर हर-महादेव' गर्जनपुरस्सरं छिन्धि-भिन्धि-मारय-विपोथय इति कोलाहलः, प्रत्यर्थिनां च 'खुदा तोबा अल्लादि' पारस्य-पदमयः कलकलो रोदसी समपूरयत्।

प्रसङ्गः - अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन अपजलखानवधानन्तरं शिवसेनायाः आक्रमणं ततश्चोभ्योः सेनयोः कालोहलश्च वर्णितः अस्ति।

पर्यायशब्दाः - तत्क्षणादेव = तत्कालमेव, च, शिववीरध्वजिन्यां = शिववीरस्य ध्वजिन्यां सेनायां, महाध्वजः = महापताकाः, एकः, समुच्छ्रितः = आकाशे समुल्लसितः। तत्समकालमेव, यवन-शिविरस्य = यवनानां शिविरस्य पटकुटीरस्य पृष्ठस्थिता = विपरीतदिक्स्था, शिववीरसेना = शिववीरस्य, सेनावाहिनी, शिविरं = पटकुटीरम्, अग्निसात्कृतवती = अज्वलत्, पुरःस्थितसेनासु = पुरः अग्रे स्थितासु सेनासु वाहिन्यासु च, अकस्मादेव, महाराष्ट्रस्य केसरिणः सिंहसदृशाः वीराः, समपतन् आक्रमणम् अकुर्वन्। तेषां = शिववीरसैनिकानां, हरहरमहादेव गर्जनपुरस्सरं = कथनपूर्वकं, छिन्धि = छेदनं कुरु, भिन्दि = भेदनं कुरु, मारय = जहि, विपोथय = निपातय, इति, कोलाहलेन = कलकलेन, च, प्रत्यर्थिनां = शत्रूणां, खुदा-तोबा-अल्लादि पारस्यपदमयः = पारसीशब्दमयः, कलकलः = कोलाहलः, रोदसी = द्यावापृथिवी, समपूरयत् = पूर्णम् अकरोत्।

गद्यांशव्याख्या - तत्कालमेव च शिववीरस्य सेनायाम् एका महापताका समुल्लसिता। तत्समकालमेव यवनशिविरस्य पृष्ठभागे स्थिताः शिवसैनिकाः यवनशिविरं दग्धवन्तः। अग्रे स्थितासु सेनासु च सहसैव महाराष्ट्रसिंहाः आक्रमणं कृतवन्तः। तेषां 'हर हर-महादेव' इति गर्जनापूर्वकं छिन्धि, भिन्धि, मारय निपातय चेति कोलाहलेन शत्रूणां च "खुदा-तोबा-अल्लादि" फारसीशब्दमयेन कलकलेन द्यावापृथिवी पूर्णे सञ्जाते।

विशेषः - समुच्छ्रितः = सम्+उद्+श्रि+क्त+सु।
स्थिता = स्था+क्त+टाप्।
समपतन् = सम्+पत्+लङ् (झि)।
छिन्धि = छिद्+लोट्लकारः (सिप्)।
भिन्धि = भिद्+लोट्लकारः (सिप्)।
मारय = मृ+णिच्+लोट् लकारः (सिप्)।
विपोथय = वि+पुथ्+णिच्+लोट्लकारः (सिप्)।
समपूरयत् = सम्+पुर्+णिच्+लङ् (तिप्)।

मूलम् - ततो यवन-सेनासु शतशः सादिनः, गगनं चोचुम्ब्यमानाः, कृत-दिगन्त प्रकाशाः कडकडाध्वनिधर्षितप्रान्तप्रजाः उड्डीयमान-दन्दह्यमानपरस्सहस्र-पटखण्ड-विहित-हैम-विहङ्गम-

विभ्रमाः ख ोतिरिङ्गणायितपरस्कोटिस्फुलिङ्गरिङ्गितपिङ्गीकृतप्रान्ताः दोधूयमानधूमघटापटल-परिपात्यमान-भसित-सितीकृतानोकहाः, सकलकलध्वनि पलायमानैः पतत्रिपटलैरिव सोसूच्यमानाः शिविरघस्मरा ज्वालामाला अवलोक्य, सहाहाकारं तदभिमुखं प्रयाताः अपरे च महाराष्ट्रऽसिभुजङ्गिनीभिः दन्दश्यमानाः, केचन ''त्रायस्व, त्रायस्व'' इति साम्रेडं व्याहरमाणाः पलायमानाः, अन्ये धीरा वीराश्च - 'तिष्ठत रे तिष्ठत धूर्तधुरीणाः! महाराष्ट्रहतकाः! किमिति चौरा इव लुण्ठका इव दस्यव इव च यवनसेनापतिनाक्राम्यथ? समागच्छत सम्मुखं, यथा शाम्येदस्मच्चन्द्रहासानां चिरप्रवृद्धा महाराष्ट्ररुधिराऽऽस्वादतृषा इति सक्ष्वेडं सङ्गर्ज्य, युद्धाय सज्जाः समतिष्ठन्त।

तेषां चाऽश्वानां सव्यापसव्यमार्गैः खुरक्षुण्णा व्यदीर्यत वसुधा। खड्ग खटखटाशब्दैः सह च प्रादुरभूवन् स्फुलिङ्गाः।रुधिरधाराभिः जपासुमनस्समाच्छन्नमिवाभूद्रणाङ्गणम्।

प्रसङ्गः - अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन यवनसैनिकानां शिववीरसैनिकानाञ्च मध्ये प्रारब्धयुद्धस्य स्थितिः वर्णिता विद्यते।

पर्यायशब्दाः - ततः = तदनन्तरं, यवनसेनां = म्लेच्छपताकिनीसु, शतशः, सादिनः अश्वारोहिणः, गगनं चोचुम्ब्यमाना = आकाशं स्पर्शमाणाः, कृतदिगन्तप्रकाशः = प्रकाशिताशाः, कडकडाध्वनिधर्षितप्रान्तप्रजाः = कडकडाध्वनित्रासित् निकटस्थ प्रजाः, उड्डीयमानैः = उद्गच्छद्भिः, दन्दह्यमानैः = नितरां ज्वलद्भिः, परस्सहस्रः = सहस्राधिकैः, पटखण्डैः = वस्त्रशकलैः, विहितः = सम्पादितः, हैमानां = सौवर्णानां, विहङ्गामानां = पक्षिणां, विभ्रमाः = भ्रमः याभिस्ताः। ज्योतिरिङ्गणायितानां = खद्योतायितानां, परस्कोटिनां = कोट्यधिकानां, स्फुलिङ्गानाम् अग्नि कणानां, रिङ्गितैः = उड्डयनैः, पिङ्गीकृताः = पिञ्जरीकृताः, प्रान्ताः = परिसरभूमयः याभिस्ताः। दोधूयमानानां = अतितरां वृद्धिगच्छन्तीनां, धूमचटानां = धूमलेखानां, पटलेन = समूहेन, परिपात्यमानैः = विकीर्यमाणैः, भासितैः = भस्नाभिः, सितीकृताः, अनोकहाः = वृक्षाः, याभिस्ताः। सकलध्वनिपलायमानैः = कलकलशब्देन सह पालयमानैः, पतत्रिपटलैरिव = पक्षिसमूहैरिव, सोसूच्यमानाः = बोबुध्यमानाः, शिविरघस्मराः = पटगृहभक्षिकाः, ज्वालमानाः = ज्वालापंक्तीः, अवलोक्य, सहाहाकारं स, तदभिमुखं = शिविराभिमुखं, प्रयाताः = प्रचलिताः। अपरे = अन्ये, महाराष्ट्रासिभुजङ्गिनीभिः = महाराष्ट्रकृपाणसर्पिणीभिः, दन्दश्यमानाः = भृशं द्रक्ष्यमानाः केचन त्रायस्व त्रायस्व = पाहि-पाहि इति साम्रेडम् = अनेकशः, व्याहरमाणाः = उच्चार्यमाणाः, पलायमानाः = प्रस्थाप्यमाणाः, अन्ये, धीराः = वीराश्च = धैर्यशालिनः भटाश्च, तिष्ठत रे तिष्ठत धूर्तधूरीणाः = धूर्तधौरेयाः, महाराष्ट्रहतकाः = दुष्टमहाराष्ट्राः, किमिति-कथमिति, चौरा इव = परिग्रहिण इव, लुण्टका इव, दस्यव इव, च यवन सेनापतीन् = अपजलखानम्, आक्राम्यथ = आक्रमण कुरुथ? समागच्छत् - आयात, सम्मुखम् = अभिमुखं, यथा = येन, शाम्येत् = शान्तिं नयेत्, अस्मच्चन्द्रहासानाम् = अस्मत्कृपाणानां, चिरप्रवृद्धा = चिरकालात् वृद्धि गता, महाराष्ट्ररुधिराऽऽस्वाद्तृषा = महाराष्ट्राणां रक्तास्वादपिपासा इति = एवं, सक्ष्वेडं = ससिहंनादं, संगर्ज्य = गर्जनं कृत्वा, युद्धाय = संग्रामाय, सज्जाः = सजगाः, समतिष्ठन्त = स्थिताः बभूवुः।

तेषां = यवनानां, च, सव्यापसव्यमार्गैः = दक्षिणवामपथैः, खुरक्षुण्णा = खुरहता, वसुधा = पृथ्वी, व्यदीर्यत = अभिद्यत्। खडग्कटकटाशब्दैः = कृपाणकटकटारवैः, सह च, प्रादुरभूत् = सञ्जाताः, स्फुलिङ्गाः = अग्निकणाः। रुधिरधाराभिः = रक्तप्रवाहैः, जपासुमनस्समाच्छन्नं = जपाकुसुमाच्छादितम्, इव, अभूत्, रणाङ्गणं = युद्धप्राङ्गणम्।

गद्यांशव्याख्या - तदनन्तरं यवनवाहिनीषु शतशः अश्वरोहिणः, आकाशं संस्पृश्यमानाः दिशः प्रकाशायित्रीः कडकडेतिध्वनिना समीपस्थानां प्रजानां भीतिप्रदायकाः, उद्गच्छद्भिः नितरां ज्वलद्भिः सहस्राधिकैः पटखण्डैः स्वर्णिमपक्षिणां भ्रान्तिं जनयित्रीः, खद्योतसमपरस्कोटिरग्निकणानाम् उद्गमनेन प्रान्तभागं पीतं कुर्वतीः, उत्पतन्तीनां घनघटानां पटलेन परिपात्यमानेन भसितेन वृक्षान् सितीकुर्वतीः, कलकलध्वनिना सह पलायमानैः पक्षिसमूहैरिव

बोबुध्यमानाः पटगृहभक्षिकाः अग्निज्वालाः दृष्ट्वा हाहाकारं कुर्वन्तः शिविरं प्रति धावितवन्तः। अन्ये च यवनसैनिकाः महाराष्ट्राणां खड्गसर्पिणीभिः भृशं दंश्यमानाः आसन्। केचित्तु पुनः पुनः "त्रायताम्" इति शब्दं कुर्वाणाः धावितवन्तः। अन्ये केचन धीराः वीराश्च "तिष्ठत रे तिष्ठत धूर्तधुरन्धराः! महाराष्ट्रहतकाः! चौरा इव लुण्ठका इव, दस्यव इव च सेनापतिं कथम् आक्रामथ? समक्षम् आगम्यतां, येन अस्माकं खड्गानां चिरकालात् वृद्धिगता महाराष्ट्राणां रुधिरास्वादपिपासा शान्ता भवेत् इति सिंहनादपूर्वकं गर्जनां कृत्वा युद्धार्थं तत्पराः सञ्जाताः।

तेषां यवनानामश्वानां दक्षिणवामपथैः खुरैः क्षुण्णा वसुधा विदीर्णा सञ्जाता। कृपाणानां खटखटेति शब्दैः सह अग्निकणाः समुत्पन्नाः। रक्तप्रवाहैः युद्धप्राङ्गणं जपापुष्पाच्छादितमिव सञ्जातम्।

विशेषः – चोचुम्ब्यमानाः = चुबि+यङ्+लट्+शानच्+टाप् (शस्)।

उड्डीयमान – उद्+डि+यक्+लट्+शानच्।

दन्दह्यमान = दह्+यङ्+लट्+शानच्।

ज्योतिरिङ्गणः इव आचरति = ज्योतिरिङ्गणायते –ज्योतिरिङ्गण+क्यच्+इट्+क्त।

पिङ्गीकृता = अपिङ्ग पिङ्गाकृता इति, पिङ्ग+च्वि+कृ+क्त (जस्)।

व्याहरमाणाः = वि+आ+हृ+शानच् (जस्)।

आस्वाद = आ+स्वद्+घञ्।

सङ्गर्ज्य – सम्+गर्ज्+क्त्वा (ल्यप्)।

समतिष्ठन्त = सम्+स्था+लङ् (झ)।

व्यदीर्यत = वि+दॄ+यक्+लङ्।

मूलम् – तदवलोक्य गौरसिंहो मृतस्याऽपजलखानस्य शोणितशोणं शोणशरीरं प्रलम्बवेणुदण्डाग्रेषु बद्ध्वा समुत्तोल्य सर्वान् संदर्श्य सभेरीनादं घोषितवान् यद् – "दृश्यतां, दृश्यतामितो हतोऽयं यवन-सेनापतिः, ततश्चाऽग्निसात्कृतानि ससकल-सामग्री-जातानि-शिविराणि परितश्च बहूनि विनाशितानि यवनवीर-कदम्बकानि, तत्किमिति अवशिष्टा यूयं मुधा बकगृध्रशृगालानां भोज्याः संवर्तध्वे? शस्त्राणि त्यक्त्वा पलायध्वं, यथा नेयं भूः कदुष्णैः भवतां सद्यश्छिन्न-कन्धरागलद्रुधिरप्रवाहैर्भवद्रमणीनां च कज्जलमलिनैर्वाष्पपूरैरार्द्रा भवेद्" इति। तदवधार्य, दृष्ट्वा च रुधिरदग्धं क्रीडापुत्तलायितं स्वस्वामिशरीरं, सर्वे ते हतोत्साहा विसृज्य शस्त्राणि कान्दिशीका दिशो भेजुः।

ससेनः शिववीरश्च विजयशङ्खनादैः रोदसी सम्पूर्य रणाङ्गणशोधनाधिकारं माल्यश्रीकाय समर्प्य, प्रतापदुर्गं प्रविश्य मातुः चरणौ प्रणनाम।

प्रसङ्गः – अस्मिन् गद्यांशे महाकविना श्रीमदम्बिकादत्तव्यासेन हतम् अपजलखानं दृष्ट्वा यवनसैनिकानां पलायनं शिववीरस्य च मातुः समीपे गमनमिति वर्णितमस्ति।

पर्यायशब्दाः – तदवलोक्य= तद्दृष्ट्वा, गौरसिंहः= पूर्वोक्तः ब्रह्मचारिबटुः, मृतस्य= त्यक्तशरीरस्य, अपजलखानस्य = सेनापतेः, शोणितशोणं = रक्तशोणं, शोणं = रक्तयुक्तं, शरीरं = देहं, प्रलम्बवेणुदण्डाग्रेषु दीर्घवंशाग्रेषु, बद्ध्वा, समुत्तोल्य = उत्थाप्य, सर्वान् = यवनानां, सन्दर्श्य = दर्शयित्वा, सभेरीनादं = सडिण्डिभिनादं, घोषितवान् = घोषणां कृतवान्, यद् – दृश्यतां, पश्यतु, इतः = अत्र, अयं, सेनापतिम् = अपजलखानः, हतः = नष्टः, ततश्च = तत्रपक्षेऽपि च अग्निसात्, कृतानि = प्रज्वलितानि, ससकलसामग्रीजातानिशिविराणि = समग्रसामग्रीयुक्तानि पटगृहाणि, परितश्च =

समन्तात्, बहूनि = अनेकानि, विनाशितानि नष्टानि, यवनवीरकदम्बानि = म्लेच्छभटसमूह:, तत्किं = तत्कथम्, अवशिष्ट: = शेषजात:, येयं = भवन्तं, मुधा = वृथैव, वकगृधशृगालानां = पशुपक्षिणां, भोज्या: = खाद्या:, संवर्तध्वे = भवथ? शस्त्राणि = आयुधानि, त्यक्त्वा = परित्यज्य, पलायध्वं = अपसरत्, यथा = येन, नेयं, भू: = पृथिवी, कदुष्णै: = ईषदुष्णै:, भवतां = युष्माकं, सद्य: = सपदि, छिन्ना: = कर्तिता:, कन्धरा: ग्रीवा:, तासां, गलेभ्य: = कण्ठेभ्य:, ये रुधिराणां = रक्तानां प्रवाहा: धारा: तै:, भवद्रमणीनां = भवद्दाराणां, च कज्जलमनिलै: = नेत्राञ्जनदूषितै:, वाष्पपूरे: = अश्रुप्रवाहै:, आर्द्रा = सिक्ता, भवेत् = स्यात्? तदवधार्य = दृष्ट्वा, अवलोक्य, च, रुधिरदिग्धं = रक्तक्लिन्नं, क्रीडापुत्तलायितं = खेलाय निर्मितपरादिमूर्तिवदाचरितं, स्वस्वामिशरीरम् = अफजलखानदेहं, सर्वे ते = यवनसैनिका:, हतोत्साहा: = निरुत्साहिता:, शस्त्राणि = आयुधानि, विसृज्य = त्यक्त्वा,, कान्दिशीका: = भीता:, दिश: = पारित:, भेजु: = प्रापु:।

ससेन:, सेनया सहित:, शिववीर: = शिव:, विजयशङ्खनादे: = विजयशङ्खादिध्वनिभि:, रोदसी = द्यावापृथिवी, सम्पूर्य = पूरयित्वा, रणाङ्गणशोधनाधिकारं, युद्धस्थलशोधनकार्यं, माल्यश्रीकाय = एतन्नाम्ने, समर्प्य = अर्पयित्वा, प्रतापदुर्गं = एतन्नामकं दुर्गं, प्रविश्यं = प्रवेशं कृत्वा, मातु: = जनन्या:, चरणौ = पादौ, प्रणनाम = नमस्कार:।

गद्यांशव्याख्या – तत्सर्वं दृष्ट्वा गौरसिंह: मृतस्य अपजलखानस्य रक्तयुक्तं रक्तशरीरं दीर्घवंशदण्डाग्रभागे बद्ध्वाउ त्थाप्यच स र्वान्य वनान्द र्शयित्वास डिण्डिभिनादंउ द्घोषितवान्य त्अ त्रप श्यन्तु,अ त्रप श्यन्तु,अ यं यवनसेनापति: हत:, अन्यत्र च समग्रसामग्रीयुक्तानि पटगृहाणि अपि प्रज्वलितानि, चतुर्दिक्षु च यवनवीरसमूह: विनाशित:, अत्र: अवशिष्टा: यूयं कथं व्यर्थमेव बकगृध्रशृगालानां खाद्यपदार्था: भवथ? शस्त्राणि परित्यज्य पलायनं कुरुत, पलायनं कुरुत। यस्मात् इयं भूमि: युष्माकं सद्यकर्तितग्रीवाकण्ठाभ्यां प्रवहद्भि: रुधिरप्रवाहै: कज्जलमलीनैश्च युष्माकं दाराणाम् अश्रुप्रवाहैश्च सिक्ता न भवेत्? तच्छ्रुत्वा दृष्ट्वा च रक्तयुक्तं क्रीडापुत्तलिकेव प्रतीयमानं स्वस्वामिन: शरीरं च दृष्ट्वा सर्वे यवनसैनिका: निरुत्साहिता: भूत्वा शस्त्राणि परित्यज्य भीता: परित: प्रत्यधावन् (धावितवन्त:)।

तत: परं सेनासहित: शिववीर: विजयशङ्खनादै: द्यावापृथिवी पूरयित्वा युद्धस्थलस्वच्छताकार्यं माल्यश्रीकनामक स्वीय प्रमुखम् आदिश्य च प्रतापदुर्गं प्रविश्य मातु: चरणौ नमस्कृतवान्।

विशेष: – बद्ध्वा = बध्+क्त्वा।

समुत्तोल्य – सम्+उद्+तुल्+णिच्+क्त्वा (ल्यप्)।

संदर्श्य = सम्+दृश्+णिच्+क्त्वा (ल्यप्)।

घोषितवान् = घुष्+क्तवतु (सु)।

दृश्यताम् = दृश्+यक्+लोट् (त)।

हत: – हन्+क्त (सु)।

संवर्तध्वे = सम्+वृत्+लट् (ध्वम्)।

दिग्धम् – दिह्+क्त (अम्)।

प्रणनाम = प्र+नम्+लिट् (तिप्)।

प्रलम्बवेणुदण्डाग्रेषु – प्रलम्बाश्च ते वेणुदण्डा:, प्रलम्बवेणुदण्डा:, तेषाम् अग्रेषु (षष्ठीतत्पुरुष:)।

हतोत्साहा: – हत: उत्साह: येषां ते हतोत्साहा: (बहुव्रीहिसमास:)।

रणाङ्गणशोधनाधिकारम् – रणाङ्गणस्य शोधनं तस्य अधिकार:, तम् (षष्ठी तत्पुरुष:)।

॥ इति द्वितीयो नि:श्वास: ॥

अभ्यास-प्रश्नाः

बहुविकल्पात्मकप्रश्नाः –

अधोलिखितानां प्रश्नानां शुद्धोत्तरक्रमः कोष्ठकेषु लेखनीयः –

१. शिवराजविजयस्य लेखकस्य नाम किम्?

(क) दण्डी (ख) सुबन्धुः

(ग) बाणभट्टः (घ) अम्बिकादत्तव्यासः ( )

२. शिवराजविजयमहाकाव्यस्य नायकोऽस्ति –

(क) शिववीरः (ख) गौरसिंहः

(ग) अपजलखानः (घ) अवरंगजीवः ( )

३. शिववीरः निवसति स्म –

(क) जयदुर्गे (ख) प्रतापदुर्गे

(ग) सिंहदुर्गे (घ) रक्तदुर्गे ( )

४. यवनराजदूतरूपेण शिववीरस्य सविधे समागतः –

(क) गोपीनाथ पण्डितः (ख) गौरसिंहः

(ग) अपजलखानः (घ) द्वारपालः ( )

अतिलघूत्तरात्मकप्रश्नाः –

१. 'शिवराजविजयः' पुस्तकस्य लेखकः कः अस्ति?

२. तानरंगः कः आसीत्?

३. गोपीनाथपण्डितः कस्य राजदूतः आसीत्?

४. अपजलखानं शिववीरस्य हननार्थं ग्रहणार्थं वा कः प्रेषितवान्?

५. दौवारिकं परीक्षितुं गौरसिंह किं कृतवान्?

६. शिवराजविजयः कतिविरामेषु विभक्तः अस्ति?

७. शिवराजविजयः आधुनिकसंस्कृत-उपन्यासः अस्ति अथवा प्राचीन-संस्कृत-उपन्यासः?

लघूत्तरात्मकप्रश्नाः –

१. गौरसिंह-अपजलखानयोः सञ्जातसंवादः लेखनीयः।

२. अपजलखानस्य शिविरव्यवस्था लेखनीया।

३. शिववीरस्य विषये पञ्चवाक्यानि लेख्यानि।

४. शिववीरः अपजलखानं कथं हतवान्?

५. गौरसिंहद्वारपालयोः सञ्जातसंवादः स्वशब्देषु लेखनीयः।

६. 'शिवराजविजयः' इत्यस्याध्ययनेन का शिक्षा प्राप्ता भवति?

दीर्घोत्तरात्मकप्रश्नाः –

१. श्रीमदम्बिकादत्तव्यासस्य संक्षिप्तपरिचयः लेख्यः।

२. शिवराजविजयस्य प्रथमविरामस्य द्वितीयनिःश्वासस्य कथावस्तु संक्षेपेण लेखनीयम्।

३. शिवराजविजयस्य काव्यगतवैशिष्ट्यं किम्?

४. अधोलिखितगद्यांशानां सप्रसङ्गभावार्थाः लेखनीयाः –

(क) ततः संवृत्ते किञ्चिदन्धकारे .... कः कोऽत्र भोः? इति।

(ख) शिववीरस्तु कस्याञ्चिच्चन्द्रचम्बिन्यां .... आसीत्।

(ग) ततो बाढमित्युक्त्वा .... कर्णान्तिकं व्याहार्षीत्।

(घ) ततस्तानपूरिकायाः .... समधात्।

(ङ) अथ कथञ्चित् प्रकाशबहुले .... प्रबबन्ध।

५. अधोलिखितगद्यांशानां सप्रसंगव्याख्याः लेखनीयाः –

(क) ततः पुनर्बद्धाञ्जलेर्दौवारिकस्य .... प्रतिष्ठत्।

(ख) इतस्तु छलेनाऽस्मत्स्वामिसहचराः .... विकीर्यन्ते।

(ग) तदवधार्य समस्तकूर्चान्दोलनं .... प्रविवेश।

(घ) इतस्तु कुरङ्गमिव .... अवरुधत्।

(ङ) तत्क्षणादेव च शिववीरध्वजिन्यां .... समपूरयत्।